ततः शिरसि चन्द्रमण्डलं तस्योपरि ॐकारपरिणतं चक्रं शुक्लवर्णं तन्मध्ये चन्द्रस्थ ॐकारं चेति भगवतः कायविशुद्धिभावना । कण्ठे चन्द्रमण्डलं तस्योपरि आः-कारपरिणताष्टदलपद्मं रक्तवर्णं तन्मध्ये चन्द्रमण्डलस्थं आः कारमिति भगवतो वाग्विशुद्धिभावना । नाभेरूर्ध्वं चन्द्रमण्डलं तस्योपरि हुँकारपरिणतं वज्रं कृष्णवर्णं तन्मध्ये चन्द्रमण्डलस्थं हुँकारमिति भगवतश्चित्तविशुद्धि-भावना । बुद्धत्वफलदायिनी बुद्धमिद्धिरिति । ततः आकाशस्थितं भगवन्तं हृद्बीजरश्मिना आकृष्य जः हुं वं होः इत्यक्षरचतुष्टयेन पुरतः स्थापयेत् । तस्मै अर्घ्य-पाद्याचमनं प्रोक्षणं च दद्यात् । पश्चात् क्षीरादिभोजनं प्रयच्छेत् इत्यमृतास्वादः विहितः । ततः सर्व्वबुद्धान नमस्यामीत्यनया स्तुत्या स्तुतिं कुर्य्यात् । ततो ज्ञानसत्त्वेन सह समयसत्त्वमेकीकृत्य समयस्त्वं समयस्त्वं समयमहं ॐ आः हुं इत्यनेन मन्त्रेणाहृयं कुर्य्यात् । पश्चाद्

---

[1] Ab ०मानं वज्र [2] AN ०मम्य । [3] C मत्त्वम्बि०
[4] A चित्त [5] ANC मण्डलस्योपरि ।
AN आकार० [6] A तन्मध्य ।
[7] Ab omits आःकारमिति.....०मण्डलस्थं ।
[8] A ०मण्डल ।
[9] N हृदयबीज, C ०श्मना Ab हृद्बीजार्चिषा ।
[10] N ०द्यामनं, C ०द्याचमं [11] AC प्रोक्षं ।
[12] A ०तास्वादा । [13] स्तुत्या dropped in AN.
[14] N adds a third समयस्त्वं । [15] ॐ dropped in N.

भावनाखिन्नो जपं कुर्य्यात्। ॐ आः वज्र हुँ स्वाहा इति जपमन्त्रः। पश्चात् सम्यक्सम्बोधौ पुण्यं परिणाम्य विसर्ज्य विहरेत् यथेच्छयेति। अनेन पुण्येन सर्व्वसत्त्वास्तथागतज्ञानप्राप्ताः शीघ्रं भवन्तु।

॥ वज्रासनभट्टारकसाधनोपदेशविधिः परिसमाप्तः ॥

4.

पूर्व्वोक्तेन विधानेन शून्यताभावनानन्तरं चन्द्रमण्डले नीलं हुँकारमकारादिमितषोड़शस्वरपरिवेष्टितं ततः सितककारादिचतुस्त्रिंशद्व्यञ्जनपरिवेष्टितं सर्व्वमेतत्परिणम्य चन्द्रमण्डलं तदुपरि पुनस्तदेव बीजं तत्परिणामेन पीतवज्रं तद्वरटकेऽपि तद्बीजं सर्व्वमेतत् परिणम्य श्रीमद्वज्रासनबुद्धभट्टारकमात्मानं झटिति निष्पादयेत्। द्विभुजैकमुखं पीतं चतुर्म्मारसंघटितमहासिंहासनवरं, तदुपरि विश्वपद्मवज्रे वज्रपर्य्यङ्कमंस्थितं वामोत्सङ्गस्थितवामकरं भूस्पर्शमुद्रादक्षिणकरं बन्धूकरागारुणवस्त्रावगुण्ठिततनुं सर्व्वाङ्गप्रत्यङ्गसेचनकविग्रहं विचिन्त्य ॐ धर्म्मधातुस्वभावात्मकोऽहमिति अद्वयाह-

---

[1] AC ॐ पट। [2] A अयं [3] Ab विसर्ज्जयित्वा।
[4] सर्व्वं dropped in Ab. [5] C ०सामर्थ्ये।
[6] N पूर्व्वोक्तवि०। [7] A षोड़शस्वर०। [8] A तस्त्रिंश०।
[9] A व्यञ्जन० [10] AN विष्या०। [11] C भूस्पृ०

ङ्कारं कुर्य्यात् । तदनु भगवतो दक्षिणे मैत्रेयं बोधिसत्त्वं सुवर्णगौरं द्विभुजं जटामकुटधारिणं गृहीतचामरदक्षिणकरं नागकेशरपल्लवधरं वामकरम् । तथा वामे लोकेश्वरं बोधिसत्त्वं शुक्लं जटामुकुटिनं चामरधारिदक्षिणभुजं कमलधारिवामकरम् । एतद्द्वयं भगवन्मुखमभिवीक्ष्यमाणं पश्येत् । ततः षड़ङ्गन्यासं कुर्य्यात् । भगवतश्चक्षुषोश्चन्द्रस्थं-सितक्षिँकारं श्रोत्रयोश्चन्द्रस्थनीलजंकारं ततो नासापुटे चन्द्रस्थपीतखँकारं जिह्वायां चन्द्रस्थलोहितगँकारं ललाटे चन्द्रस्थहरितस्कँकारं स्तनान्तराले चन्द्रस्थमितमँकारं । ततो हृदि चन्द्रस्थ हुंकारजवज्रं तदुरटकेऽपि मचन्द्रहुँकारं, कण्ठे चन्द्रमण्डले आःकारजपद्मे चन्द्रस्थ आःकारमिति वाग्विशुद्धिभावना । शिरसि चन्द्रे मित ॐकारजाष्टारचक्रे चन्द्रस्थ ॐकारमिति कायविशुद्धिभावना । नाभेरूर्द्ध्वं चन्द्रस्थमवज्रहुँकारमिति चित्तविशुद्धिभावनेति । ततो हृद्बीजसमाकृष्टज्ञानसत्त्वमर्घ्यपाद्या दिनानाविधपूजासन्तर्पणस्तुतिप्रणामपूर्व्वकं समयसत्त्वेन महैकीकृत्य ॐ समयस्त्वं समयस्त्वं समयमहं ॐ आः हुँ इति मन्त्रेणाहयाहङ्कारमुत्पादयेत् । ततो भावना खिन्नो मन्त्रं जपेत् । ॐ आः वज्र हुँ स्वाहा ।

॥ इति वज्रामनसाधनं समाप्तम् ॥

(1) मैत्रियं (2) °पल्लवाम° (3) A चामरकरं ;
(4) A जटमुकुटि (5) (6) कुर्व्वीत (7) A °चन्द्रस्थितं
(8) N ततो पटे ; A omits ततो (9) A चन्द्रहुंकार°
(10) A चन्द्र आः°
(11) C °पाद्यनाना° (12) (13) °खोनो ।

5.

नमो वज्रात्मनाथ ।

आदौ मुखादिशुद्धिं विधाय स्वहृद्यकारपरिणतचन्द्रे पीतहुँकारं पश्येत्। तत्किरणैराकृष्य गुरुबुद्धादीन् पूजयेत्। ततोऽपि पापदेशनादिकं विधाय शून्यतां चामुखीकृत्य तन्मन्त्रेणाधितिष्ठेत्। ततः पूर्व्वप्रणिधानमंचोदनया[1] रूपकायमभिनिर्म्मापयेत् मन्त्रार्थविधये। शशिमण्डलमध्ये पीतहुँकारं पश्येत् अकारादिमितषोड़शस्वरवेष्टितम्, ततोऽपि बहिः मितककारादिवर्णसमूहै[2]र्वेष्टितं तत्सकल-परिणतं शशिमण्डलमकलङ्कमवलोक्य सव्यकरेण भूस्पर्श-मुद्रं उत्सङ्गस्थितावसव्यहस्तं कषायवस्त्रावगुण्ठनं नील-गौररक्तश्यामचतुर्म्मारोपरि विश्वपद्मवज्रावस्थितं शान्तं लक्षणव्यञ्जनेनान्वितगात्रम्[3]। तस्य भगवतो दक्षिणे मैत्रेय-बोधिमत्त्वं गौरं द्विभुजं जटामुकुटिनं[4] सव्यकरेण चामर-रत्नधारिणं अवसव्येन नागकेशरपुष्पच्छटा[5] धारिणम्। तथा वामतो लोकेश्वरं शुक्लं दक्षिणकरेण चामरधरं वामकरेण कमलधरम्[6]। भगवन्मुखावलोकनपरौ च तौ भावयेत्। ततः षड़ङ्गन्यासं कुर्य्यात्। भगवतश्चक्षुषोश्चन्द्रस्थितशुक्लक्षिँकारं, श्रोत्रयोः शशिमण्डलावस्थितं जँकारं नीलं, नासापुटे

[1] AX ०चोदना। [2] ०मित० dropped in X.
[3] A ०लक्षण०। [4] C drops ०गौ०.....०बोधिमत्त्वं
[5] A ०मुकुटिनं। [6] A ०च्छत्र०।
[7] A drops वामकरेण कमलधरं।
[8] A स्थितस्वक०।

चन्द्रस्थपीतखँकारं, जिह्वायां चन्द्रस्थं रक्तगँकारं, ललाटे चन्द्रस्थं श्यामस्कँकारं, स्तनमध्ये चन्द्रस्थशुक्लसँकारं चिन्तयेत्। तदनु ज्ञानसत्त्वभावनां कृत्वा शिरसि चन्द्रमण्डलोपरि ॐकारजं सितमष्टारचक्रं तदुपरि चन्द्रस्थं ॐकारं, कण्ठे चन्द्रोपरि आःकारजमष्टदलपद्मं तन्मध्ये चन्द्रस्थं आःकारं, हृदि चन्द्रस्थहुंकारजं वज्रं स्वबीजगर्भं कायवाक्चित्तविशुद्ध्या च एतद्देवं भावयेत्। इति भगवन्तमाखेदं यावद् भावयित्वा मन्त्रं जपेत्। तच्चैष मन्त्रः। ॐ आः वज्र हुँ स्वाहा।

॥ इति वज्रासनसाधनं समाप्तम् ॥

---

[1] (ँ) ग्रंकारं ।
[2] A आकारं ।
[3] A वज्रसत्त्व ।
[4] AN आकारं
[5] A ग्रवज्रयं ।

6.

आर्यषड्क्षरीमहाविद्यायै नमः[1] ।

आदौ तावन्मन्त्री सुखासनोपविष्टः मुखशौचादिकं कृत्वा स्वहृदि[2] चन्द्रस्थसितह्रीःकारविनिर्गतरश्मिभिर्गुरुबुद्धबोधिसत्त्वान् पुरतो बुद्धादीन्[3] दृष्ट्वा सम्पूज्य त्रिशरणगमनादिकं कुर्य्याद् रत्नत्रयं मे शरणमित्यादिना[4]। यावन्तः सत्त्वाः सत्त्वसंग्रहेन संगृहीताः अण्डजा वा जरायुजा वा संस्वेदजा वा औपपादुका वा रूपिणो वा अरूपिणो वा संज्ञिनो वा असंज्ञिनो वा नैवसंज्ञानासंज्ञिनो वा यावत् कश्चित् सत्त्वधातुः प्रज्ञप्यमानः प्रज्ञप्यते[5] सर्व्वे मया अनुपधिशेष[6] निर्व्वाणधातौ प्रतिष्ठापयितव्या इति। ततः ॐ स्वभावशुद्धाः सर्व्वधर्म्माः स्वभावशुद्धोऽहं इति वारत्रयमुच्चारयेत्[7]। तदनु शून्यतां मुहूर्त्तमालम्बयेत्[8]। तदनन्तरं[9] स्वहृदये[10] सितपद्मोपरि चन्द्रमण्डलं तस्योपरि सितह्रीःकारं ततो निश्चरद्[11] नेकरश्मिशतसहस्रं ध्यात्वा तेन सर्व्वसत्त्वानामशेषा[12]नादिकाल-[13]सञ्चितं रागादिक्लेशसमूहं सत्त्वानां विशोधयन्ते[14]। तत्

[1] This *Namaskāra* is given only in Ab.
[2] स्वहृदि.....पुरतो is dropped in Ab and B.
[3] बुद्धादीन् dropped in ANC.
[4] A शरणादिकं ।
[5] A ०त्रयशरणा० ।
[6] A सख० ।
[7] N यावान् ।
[8] te dropped in NC.
[9] A अनुपधिशेषण ।
[10] Ab ०चार्य्य ।
[11] Ab मुहूर्त्तमात्रं ध्यात्वा ।
[12] Ab तदनु ।
[13] ABNC हृदये ।
[14] Ab ततोऽनेक० ।
[15] ABNC तेनाशेषा० ।
[16] A अन्वित ।
[17] AB विशोध्य तत् ।

पुनस्तत्रैव प्रवेशयेत्[1]। तत्परिणतमात्मानं लोकेश्वररूपं सर्व्वालङ्कारभूषितं शुक्लवर्णं चतुर्भुजं वामतः पद्मधरं, दक्षिणतो अक्षसूत्रधरं, अपराभ्यां हस्ताभ्यां हृदि संपुटाञ्जलिस्थितं ध्यायात्[2]। दक्षिण मणिधरं तद्वद्वर्णभुजान्वितं पद्मान्तरोपरिस्थं वामे तथैव अपरपद्मस्थां षड्क्षरीं महाविद्याम्। ततः ॐ महासुख वज्रसत्त्व जः हुँ वँ होः[3] सुरतस्त्वं अललललहोः अः अ. अः अः इत्यधिष्ठानमन्त्रराजमुच्चारयेत्[4]। एवं ध्यात्वा ततो लोकेश्वरात्महृदय[5]चन्द्रमण्डलादक्षसूत्राकारं शुक्लवर्णं मुखेन निर्गत्य नाभौ प्रविशन्तं चक्रभ्रमणयोगेन इमं मन्त्रराजं सर्व्वबुद्धहृदयचिन्तामणिकल्पं पश्येदनिमित्तयोगेन। ततो जपं कृत्वा [11]भ्रमणप्रवेशनादिकं प्राप्याचिरेणैव[12] कालेन श्राद्धः [13]कृपावान् गुरुभक्तो योगी सिध्यति।

ॐ मणिपद्मे हुँ इति[14] जापमन्त्रः। तत उत्थानकाले इमं मन्त्रराज[15]मुच्चार्य्योत्तिष्ठेत्। ॐ वज्रसत्त्व समयमनुपालय[16] वज्र[17]सत्त्वत्वेनोपतिष्ठ, दृढो मे भव, सुतोष्यो मे भव;

[1] A प्रवेशयन्तन।
[2] ध्यायात् omitted in Ab.
[3] A तद्वर्ण० N तत्तद्वर्ण०।
[4] A पद्मस्था।
[5] A हृः।
[6] Ab मन्त्रम्०।
[7] Ab ध्यानं कृत्वा।
[8] AN ०हृदये।
[9] A ०भ्रम०।
[10] AC इयं, Ab इदं।
[11] A भ्रमणावेशेना०, BN भ्रमणावेशना०।
[12] A प्राप्यादि०।
[13] A क्रिया०।
[14] इति dropped in ANC.
[15] A मुच्चारयेति०।
[16] A ०पालयन।
[17] A ० सत्त्वो तेनो०।

सुपोष्यो मे भव, अनुरक्तो मे भव, सर्व्वसिद्धिं मे प्रयच्छ, सर्व्वकर्म्मसु च मे चित्तं श्रेयः कुरु, हुँ हहहह होः भगवन् सर्व्वतथागतवज्रमा मे मुञ्च वज्रीभव महाममयमत्त्व आः। एवमुक्त्वा यथासुखं विहरेदिति।

॥ आर्य्यषडक्षरीमहाविद्यासाधनं समाप्तम ॥

7.

पद्मकुलोद्भवं नाथं सर्व्वज्ञकृतमौलिनम।
प्रणम्य साधनं वक्ष्ये सर्व्वरोगविनाशनम।

प्रथमं तावदाचार्य्यानुगता सिद्धिः—

[1]तस्माच्च सर्व्वभावेन गुरुं पूजयेद् यत्नतः।
गुरुणा परितुष्टेन कर्म्मसिद्धिः प्रजायते॥
मण्डलप्रविष्टस्य सिद्धिरनुज्ञाता च सर्व्वथा।
स्वसमयसम्वरं रक्षयन् सिध्यते ध्रुवम्॥

मुखशौचादिपूर्व्वकं देवगृहे पटादिगतभट्टारकमवतार्य्य स्वहृदये [2]आद्यक्षरेण चन्द्रमण्डलं तस्योपरि अष्टमस्य चतुर्थकं बीजं सप्तमद्वितीयेना[3]नं प्रथमचतुर्थेन मण्डितं षोड़शेन संयुक्तं शुक्लवर्णं मनोरमं ततो विश्वरश्मीन्निःसार्य्य तै रश्मिभिर्निष्पन्नान् गुरून् सबुद्धमूर्त्तीन् दृष्ट्वा पूजयित्वा अभिवन्द्य चानेन मन्त्रेण ॐ वज्रपुष्पे हुँ, ॐ वज्रधूपे हुँ, ॐ वज्रदीपे हुँ, ॐ वज्रगन्धे हुँ, ॐ वज्रनैवेद्ये हुँ ततो—

[1] AN हो। [2] C माल। [3] A चाद्यान् गता।
[4] The metre in both these *Ślokas* is faulty.
[5] A परितुष्टो न। [6] A आद्याद्य०। [7] AC द्वितीय ना०

रत्नत्रयं मे शरणं सर्व्वं प्रतिदिशाम्यघम्[1]।
अनुमोदे[2] जगत्पुण्यं बुद्धबोधौ दधे मनः॥
आबोधेः शरणं यामि बुद्धं धर्म्मं गणोत्तमम्।
बोधौ चित्तं करोम्येष स्वपरार्थप्रसिद्धये॥
[3]उत्पादयामि परमं वरबोधिचित्तं
निमन्त्रयामि बहुसर्व्वमत्त्वान्।
इष्टां चरिष्ये वरबोधिचारिकां
बुद्धो भवेयं जगतो हिताय॥

इति। प्रणिधिपूर्व्वकं सर्व्वधर्म्मनैरात्म्यं भावयेत् अनेन मन्त्रेण। ॐ शून्यताज्ञानवज्रस्वभावात्मकोऽहम्।

बीजं मायोपमाकारं[4] चैधातुकमगोपतः।
दृश्यते स्पृश्यते चैव यथा माया हि सर्व्वतः।
न चोपलभ्यते चैव सर्व्वत्र जगतः स्थितिः॥

इत्यधिमुच्य। ततोऽनादिकालीनममत्कल्पनाबीजमपनीय स्वभावमधिमुच्चेत्[5]। ॐ स्वभावशुद्धाः सर्व्वधर्माः स्वभावशुद्धोऽहम्। ततः पूर्व्वोक्तबीजनिष्पन्नं पद्मं तस्योपरि ह्रीःकारं तत्सर्व्वं निष्पन्ने मति श्रीमल्लोकनाथं वज्रपद्मगर्भचन्द्रस्थं वज्रपर्य्यङ्कं शशिप्रभं कुन्देन्दुवर्णमुज्ज्वलं जटामकुटधरं शान्तं अमिताभकृतशेखरं[6] व्याघ्रचर्म्मनिवसनं चतुर्भुजं नानालङ्कारभूषितं, दक्षिणा-

[1] A °मोघ। [2] A °मोद्य।
In A instead of these two lines we have उत्पादं यामो बुद्ध In the same *Śloka* N reads बुद्धं instead of बुद्ध।
[3] N adds विचिन्त्य after मायोपमाकारं।
[4] A माया हि। [5] A °मुचेत्। C तत्सव।
[6] A °मल। [7] A °लङ्कशेखरं।

करे अक्षमालाधरं, वामकरे[1] पद्ममणिविभूषितं, द्वौ हस्तौ संयुक्तौ मर्व्वराजेन्द्रमुद्रा हृदि संस्थितं ततोऽहङ्कारं कुर्य्यात् अहमेव लोकेश्वर इति। ततो ज्ञानसत्त्वमाकृष्य यथोपदेशतः स्वमन्त्रेणार्घ्यपाद्यादिकं दद्यात्। समाजमुद्रया एकीकृत्यानेन मन्त्रेण सह विन्यसेत्। ॐ वज्रतवज्र अलललल्होः समयस्त्वं समयस्त्वं समयमहम्[2]। यथोपदेशतो अभिषेकक्रवचपट्टबन्धाधिमोक्षणसमतालपूजास्तुतिं च कृत्वा भावनापूर्व्वकं जपं कुर्य्यात्। स्वहृदि चन्द्रोपरि षडक्षरं प्रदीपमालामिव गृहान्तरद्योतिनीं पश्येत्। मन्त्रः[3] ॐ मणिपद्मे हुँ। अक्षरलक्षं जपेत्। ततो द्वितीयतृतीयेन विगतकल्मषो भवति, पञ्चानन्तर्य्यकारिणोऽपि कोटिजापेन सिद्धति। तत उत्थातुकामोऽर्घ्यादिकं दत्त्वा विशिष्टाहङ्कारेण विहरेत्। चतुःसन्ध्यं जपित्वा कुशलमूलं परिणम्याभिप्रेतसिद्धये अर्द्धरात्रौ[4] ज्ञानसत्त्वं विसर्ज्ज्य शताक्षरं चोच्चार्य्य कायवाक्चित्तरक्षां च कृत्वा यथासुखं विहरेदिति। यदि रोगादि नाशयितुं इच्छति तदा यथोपदेशतः पुष्यनक्षत्रेणापतितगोमयेन भट्टारकस्याग्रतश्चतुरस्रं मण्डलकं कुर्य्यात्। अभिप्रेतषड़क्षरविदर्भितमष्टोत्तरशतं जपेत्। षण्मासेन सिध्यति न संशय इति।

॥ कारण्डव्यूहाम्नायेन रचितं साधनं समाप्तम् ॥

[1] AN चामर। [2] स्वहृदिन्द्रो०। [3] मन्त्रः dropped in A.
[4] A ०तुमामा०। [5] A ०गम्याभिज०। [6] A दुर्द्धरात्रौ।
[7] A विहरेच्च। [8] A यथोग्र०।
[9] A ०मष्टाक्षर०। [10] A वशंसय, C शतय।

8.

पूर्व्वविधानेन चन्द्रमण्डलं सप्ततृतीयकं बीजं चयोदशाक्रान्तं इन्दुबिन्दुविभूषितं तेनैव निष्पन्नं श्रीमल्लोकनाथं जटामकुटधरं शान्तं चन्द्रांशुमिव निर्म्मलं सर्व्वालङ्कारभूषितं वामेन पद्मधरं दक्षिणेन वरदं पद्मचन्द्रासनस्थं भावयेत्। हस्तद्वयेन मुष्टिं कृत्वा मध्यमपद्मसंकोचमिव अनया मुद्रया मुद्रयेत्। ततो जापं कुर्य्यात् ॐ मणिपद्मे हुं। अष्टाभिर्लक्षैर्ण विगतकल्मषो भवति, द्वितीये तृतीये स्वप्नानि पश्यति, पञ्चानन्तर्य्यकारिणोऽपि कोटिजापेन सिध्यति।

॥ श्रीमल्लोकनाथसाधनं समाप्तम् ॥

9.

ह्रीःकारजाननिष्पन्नो हालाहलो[1] महद्वपुः।
त्रिनेत्रं त्रिमुखं चैव जटामकुटमण्डितम्॥
अर्द्धचन्द्रधरं देवं कपालकृतशेखरम्।
जिनबिम्बजटान्तःस्थं सर्व्वाभरणभूषितम्॥
सितारविन्दनिर्भासं शृङ्गारादिरसान्वितम।
षड्भुजं हसितं[2] वक्त्रं व्याघ्रचर्म्म[3]सुवाससम्॥

[1] मध्यसं०।
[2] A सहितं।
[3] A त्वग्प्रावि।
[4] C महावपुः।
[5] C ०चर्म्मोत्तमवाससं

दक्षिणे करे वरदं द्वितीये चाक्षमालिकम्[1] ।
तृतीये शरनर्त्तनं वामे पद्मविभूषितम् ॥
द्वितीये कुचधरं चैव तृतीये धनुरेव च ।
दक्षिणे चिशूलं चैव सर्पेण परिवेष्टितम् ॥
वामे पूर्णकपालं तु पुष्पैर्नानासुगन्धिभिः ।
रक्तपद्मस्थितं चैव ललिताक्षेप संस्थितम् ॥
रत्नाचलगुहान्तःस्थं भावयेद् योगचिन्तकः ।
स्फुरद्दुमयैर्बिम्बैः[2] विविधैः प्रातिहार्य्यकैः ॥
सर्व्वाहारं तु भुञ्जानो निर्विकल्पसमाधिना ।
अन्तर्ज्जल्पो जपेन्मन्त्रान् भावयेत् क्रमयोगतः ।
क्षिप्रं च प्राप्यते बोधिरनुत्तरसुखावहा[5] ॥

॥ सर्व्वकामप्रसाधनहालाहलपरितोष[6]णवज्रा
नाम समाधिः ॥

[1] A ०मालिकां ।
[2] A ०लश्च A ०लन्तु ।
[3] A ०ताक्षय० ।
[4] A मयोत्तम्बै
[5] A ०सुखामहा ।
[6] A परितो वज्र० ।

10.

हृच्चन्द्रे न्यस्य ह्रीःकारं धर्म्मनैरात्म्यभावनम् ।
कृत्वा संस्कार्य्य[2] तस्माच्च रक्तरश्मीन् नभःसमान् ॥
तैश्च लोकेश्वराकारं जगत् स्थावरजङ्गमम् ।
कृत्वा सम्बोधिसत्त्वार्थं जातं हृदि प्रवेश्य च ॥
तं ह्रीःकारं परावृत्य झटिति ज्ञानयोगतः ।
तं सितं रक्तवर्णं तु पद्मराग[3] समद्युतिम् ॥
पञ्चबुद्धमकुटधरं हर्षेणोत्फुल्ललोचनम्[5] ।
वामतो स्पर्द्धया नार्त्तं धृत्वा षोड़शपद्मकम्[6] ॥
पद्मं विकाशयन्तं च हृदि दक्षिणपाणिना ।
मयूरोपरि मध्यस्थे निषण्णं चन्द्रमण्डले ॥
सत्त्वपर्य्यङ्कमाभुज्य मशृङ्गाररसोत्सवम्[7] ।
चैत्यान्तःस्थमहाकर्म्म कूटागारविहारिणम्[8] ।
भावयेद् वज्रधर्म्माग्र्यं[9] नित्यं बोधिमवाप्नुयात् ॥

भावनाखिन्नो हृच्चन्द्रे न्यस्य मालामिवाविक्षिप्त-चित्तो जपेत् । तचायं जप्यो मन्त्रः ॐ वज्रधर्म्म ह्रीः ।

॥ साधनोपायिका संक्षिप्ता वज्रधर्म्मस्य ॥

---

[1] A ज्रीःकारं ।
[2] AN संस्थार्य्य ।
[3] C ०मयं ।
[4] AN ०मुकुटं ।
[5] N हर्षोत्फुल्ललोचनं । A हर्षोत्फुल्लवनं ।
[6] N ०यन्नकं ।
[7] A ०मातुष्य ।
[8] A सहृत्कसार० ।
[9] A ०धर्म्मग्रः ।

11.

नमः षड्वक्त्रलोकेश्वराय ।

ममाक् परहितोद्युक्तमनसाऽऽलम्ब्य देहिनाम् ।
निःशेषदुःखोपशमं मत्सुखे च प्रतिष्ठितम् ॥
तन्मना हृदि मच्चिन्त्य भावयेच्छुभ्रदीधितिम ।
तत्प्रभाभिः स्फुरन्तीभिस्तनुं स्वामवभासयेत् ॥
विश्रम्य विधिवन्मन्त्री संहृत्य मदितर्कितः ।
स्फुटमुच्चारयेन्मन्त्रं श्वेतदीधितिभास्वरम् ॥
स्वनाभिमण्डलेनैवं प्रवेश्य हृदि संहरेत ।
इति कुर्व्वन् त्रिधा ध्यायात् कायवाक्चित्तशोधनम् ॥
तच्च स्वदेहसंस्थेन कायादेः शुद्धिमात्मनः ।
बहिर्गतेन मन्त्रेण प्राणिनां तु विचिन्तयेत् ॥
दृष्टोच्चारित मन्त्रोत्थं पुरतो देवतात्रयम् ।
मन्त्रोच्चारणसंहारक्रमात् प्रत्येकमाचरेत् ॥
विचित्रपूजानिर्म्माणं तन्निष्पादनमेव च ।
परिपूरिं ततः शुद्धिमिष्टार्थे परिणामनाम् ॥
मन्त्रजापं ततः कुर्य्यात् विधिनाऽन्ते जपस्य तु ।
पूजादि पूर्व्ववत् कृत्वा देवतां हृदि संहरेत् ॥
समाधिप्रतिलम्भादौ चतुःसन्ध्यमिमं विधिम् ।
कुर्व्वन् लक्षं जपेन्मन्त्री विजनेषु गृहादिषु ॥

A(' संहृ० । ' A प्रभातिस्फुरतो०
A ममत्व० । ' ABN ०लेनैनं ।
A प्राणिनात्र विचि० ; N प्राणिना भुवि ।
(' मन्त्रौर्घे । ' BN तन्निष्पातन०

श्वासचिन्तां विना[1] कार्य्यो जापस्फुरणसंस्कृतैः ।
पापक्षयादौ सर्व्वत्र चतुरस्रं च मण्डलम् ॥
कारयित्वा पटाद्यस्य पुरो ध्यात्वाथवा विभुम् ।
मण्डलार्चनमर्च्चां वा कृत्वा कुर्य्यादमून् विधीन् ॥

तत्रायं देवताकारोपदेशः —

पर्य्यङ्कनं सितं माक्षमालाजं[2] सम्पुटाञ्जलिम् ।
दृष्ट्वा विभुं तत्प्रतिमां देवीं वीरासनाश्रिताम्[3] ॥
आर्य्यां तु चिन्तयेत् पीतां वामे रत्नच्छटाभृताम्[4] ।
रिक्तमव्यकरां रत्नमौलिं वीरासनानुगाम् ॥

॥ इत्यार्य्यषड्क्षरी[5] महाविद्यालोकेश्वरभट्टारकोपदेश-परम्परायातसाधनविधिः ॥

[1] A श्वासचिन्तोपिना ।
[2] A मर्थाम्बा, C सर्वाम्बा ।
[3] A ०च्छत्रा भूमं ।
[4] AC विभुं मना० ।
[5] A ०षड्क्षर० ।
[1] A स्फुरणात्कृतैः ।
[2] A ०मालाजं, C ०मनोज्ञं ।
[3] AC रक्त०
[4] AC इत्याचार्य्य० ।

12.

क्वचित्[1] षड़क्षरीसाधने भगवान् समणि[2]पुस्तकाङ्कित-पद्मधरः, मणिधरस्तु पुस्तकरहितमणिपद्मधरः, षड़क्षरी तु मणिरहितपुस्तकपद्मधरा। पूजामन्त्रः[3] ॐ लोकेश्वर पुष्पं प्रतीच्छ स्वाहा एवं धूपं दीपं[4] इत्यादि बोद्धव्यम्। अन्यदेवतायां तत्सम्बोधनं कार्य्यम्। ज्ञानमण्डलाकृष्टावयं मन्त्रः, ॐ महासुख वज्रसत्त्व जः[5] हुँ वं होः[6] सुरतस्त्वं अललललहोः[7] अः अः अः अः॥

[षडक्षरीसाधनम्]

13.

नमः खसर्पणाय।

प्रथमं तावन्मन्त्री सुखासनोपविष्टः कृतमुखशौचादिकः शुचाववकाशे[8] स्वहृदि[9] अकारेण चन्द्रमण्डलं विभाव्य तदुपरि सितह्रीःकारं तद्रश्मिभिराकृष्याग्रतोऽम्बरे गुरुबुद्ध-

---

[1] A इति।
[2] A सपुस्त०।
[3] ABNC ०मन्त्राद्य।
[4] AC नैवेद्यादि।
[5] AC ०सत्त्वा।
[6] होः dropped in A.
[7] Ab अः, C अः अः अः।
[8] Ab drops कृतमुख...०वकाशे।
[9] AB ०काशो।
[10] A हृदि।

बोधिसत्त्वादीनानीय हृद्बीजरश्मिसम्भवपूजामेघैः सम्पूज्य पापदेशनादिकं कृत्वा चतुर्ब्रह्मविहारभावनां च ततः शून्यतां भावयेत्, ॐ[1] शून्यताज्ञानवज्रस्वभावात्मकोऽहमिति चाधितिष्ठेत्। तदनु पूर्ववत् ह्रीःकारं विभाव्य गगनकुहरे संस्फार्य्य[2] संहृत्य तदुद्भूतं[3] लोकेश्वरमात्मानं भावयेत् शीतांशुकोटिप्रभं जटामकुटिनं अमिताभक्षत[4]शेखरं सर्व्वालङ्कारविभूषितं स्मेरमुखं अर्द्धपर्य्यङ्केन[5] पद्मचन्द्रासनस्थं दक्षिणेन वरदं वामेन[6] पद्मधरम्। दक्षिणपार्श्वे आर्य्यतारासुधनकुमारौ वामपार्श्वे भृकुटीहयग्रीवौ। ततः शिरसि ॐकारं, कण्ठे आःकारं, हृदि हुंकारमिति सञ्चिन्त्य खेदपर्य्यन्तं यावत् तिष्ठेत्। खेदे तु मन्त्रं जपेत्। तच्चायं मन्त्रः ॐ ह्रीः स्वाहा।

इत्याय्यखसपणलोकेश्वरसाधनम्

[1] ॐ dropped in A.
[2] A संस्यार्य्य।
[3] A चात्यद्भूतं, B रतदुद्भूतं।
[4] C मेव०।
[5] A ०पर्य्यंकिनो।
[6] AC वामे पद्मं।

14.

नमः खसर्पणाय ।

अभिमतफलदानोद्यामि[1] कल्पद्रुमश्रीः
सुगतनय[2] महाध्वक्षेम कृत्सार्थवाहः ।
भवममममभावः सर्व्वभावस्वभावः[3]
शमयतु जगदंहः[4] सोऽयमम्भोजपाणिः[5] ॥
प्रातर्म्मुखादिमंशुद्धिं विधाय विजनालये[6] ।
हृच्चन्द्रबीजकिरणैः[7] मृदुविष्टरमंस्थितः ॥
स्वबीजं हृदये ध्यात्वा पूर्णेन्दुपरिभास्वरम् ।
संचाद्य[8] तत्करै[9]रग्रे समानीय[10] नभोऽङ्गणं[11] ॥
श्रीमत्खसर्पणं[12] नाथं गुरुबुद्धौघ[13] सन्ततान्[14] ।
पूजयेद् विविधैः पूजामेघैस्तद्बीजसम्भवैः ।
ततोऽभिवन्द्य[15] कुर्व्वीत पापस्य देशनादिकम् ॥

यदनादिमति संसारे संसरता मया कृतमकुशलं कारितं वा क्रियमाणं वा परेणाभ्यनुमोदितं तत् सर्व्वं [16]भगवतामग्रतो देशयामि ।

संबुद्धबुद्धपुत्रैरार्य्यैरन्यैश्च यत् कृतं कुशलम् ।
अनुमोद्य तदवशेषं सम्यक् परिणामयामि सम्बोधौ ॥

---

[1] A ०दानामि०, C ०दाडामि० ।
[2] A ०महाक्षय०, C ०महार्थक्षय० ।
[3] A भुजगदन्तः ।
[4] C ०वये ।
[5] A संवाद्य ।
[6] AC नभोक्षणे ।
[7] ANC तत्सुतान् ।
[8] A भगवतोऽग्रत ।
[9] सुगतनय० ।
[10] स्वभावः dropped in C.
[11] A ०मम्भोवच्च० ।
[12] ANC ०विस्तर०
[13] A तत्किरणै ।
[14] A खसर्व्वनं ।
[15] C ०भिवच्च ।

बुद्धं गच्छामि शरणं करुणामयमुत्तमम्[1] ।
धर्म्मं च सर्व्वधर्म्मेण[2] रसरूपं निरञ्जनम् ॥

मुदितादिभूप्रविष्टं च बोधिसत्त्वगणं तथा निवृत्तिं च कर्त्तुकामान् बुद्धान् परहित[3]विधानाय चिरस्थितये याचयामि सर्व्वावरणविमूलनहेतुभूतायां बोधौ चित्त-मुत्पादयामि ससुतसुगतैकमार्गं[4] च आशयविशुद्धा समा-श्रितोऽस्मि[5] । तत एकानेकवियोगादेतत् सकलमेव चलाचलं जगत् शून्यमिति विचिन्त्य ॐ शून्यताज्ञान-वज्रस्वभावात्मकोऽहं इति शून्यतामधितिष्ठेत् । अधिष्ठाय प्रकृतिविशुद्धाः सर्व्वे इमे धर्म्मास्तथाहमित्यवलोक्य ॐ स्वभावशुद्धाः सर्व्वधर्म्माः स्वभावशुद्धोऽहमिति पठेत्[6] । ततो विज्ञानमात्मकं[7] भावकः पूर्व्वप्रणिधिमच्चो-दितः पंकारपरिणतविश्ववर्णकमले अकारजं पूर्णशशि-मण्डल[8]ममलं तदोपरि ह्रीःकारमतिप्रभास्वरं स्फुरत्[9]-किरणसमूहव्याप्तनभःस्थलं विभाव्य तत्परिणतं स्वबीज-गर्भं नालालङ्कृतं विकचकमल[10]मवलोकयेत्[11] । तत एतत् सकलपरिणतमात्मानं भगवन्तं ध्यायात् हिमकर-

[1] AC °मुत्तमं ।
[2] AC सर्व्वधर्म्मेण सरूपञ्च ।
[3] A ततथा ; तथा dropped in Ab.
[4] AC धर्मं ।
[5] AC चित्तोत्पत्तये ।
[6] A ससुगतसुगतमार्गञ्च, N सत्तसुगतमार्गञ्च ।
[7] इमे dropped in A.
[8] AN मात्रात्मका ।
[9] Ab ह्रींकार° ।
[10] AC मण्डलं ।
[11] N स्फारत्° ।
[12] A स्वबीजं भगं ।
[13] A विकचकनाल, C विकचनाल ।

कोटिकिरणावदातं देहं ऊर्द्ध[1]जटामकुटं अमिताभशेखरं[2] विश्वनलिननिषण्णं शशिमण्डले अर्द्धपर्य्यङ्कनिषण्णं सकलालङ्कारधर विग्रहं स्मेरमुखं दिरष्टवर्ष[3]देशीयं दक्षिणे वरदकरं[4] वामकरेण मनालकमलधरं करविगलत्पीयूष[5]धाराभ्यवहाररसिकं तदधः समारोपितोर्द्धमुखं महाकृष्णमतिकृशमतिशितिवर्णं[6] स्रूचीमुखं तर्पयन्तं श्रीमत्पोतलकाचलोदरनिवासिनं करुणास्निग्धविलोकनं[10] शृङ्गाररसपर्य्युपासितं अतिशान्तं नानालक्षणालङ्कृतम्।

तस्य पुरतस्तारा दक्षिणपार्श्वे सुधनकुमारः। तत्र तारा श्यामा[11] वामकरविधृतं मनालमुत्पलं दक्षिणकरेण विकाशयन्ती[12] नानालङ्कारवती अभिनवयौवनोद्भिन्नकुचभारा। सुधनकुमारश्च कृताञ्जलिपुटः कनकावभासिद्युतिः[13] कुमाररूपधारी[14] वामकक्षविन्यस्तपुस्तकः सकलालङ्कारवान्।

पश्चिमे भृकुटी हयग्रीव उत्तरे। तत्र भृकुटी चतुर्भुजा हेमप्रभा जटाकलापिनी[15] वामे चिदण्डीकमण्डलुधारिहस्ता दक्षिणे[16] वन्दनाभिनयाक्षसूचधरकरा चिनेत्रा।

[1] ABNC ऊर्द्ध०। [2] ANC अमिताभशेखर०।
[3] A वृतजालधर०। [4] AN ०देशीयां, Ab ०देहं।
[5] A नवनकरं। [6] BCb ०लितपीयूष, AC न्यायुषं।
[7] A ०नासिकं। [8] ०मतिशितिवर्णं dropped in Ab.
[9] AC तर्ज्जयन्तं। [10] ABNC ०स्निग्धावलोकनं।
[11] Ab श्यामवर्णा। [12] A omits ०कुचभारा। सुधन०, C ०कुचतारा।
[13] Ab ०भासद्युतिः। [14] A मारूप०।
[15] A जकलपिणी। [16] N वन्धना०।

हयग्रीवो रक्तवर्णः खर्व्वलम्बोदरः ऊर्द्ध्वज्वलत्पिङ्गल-केशः[1] भुजगयज्ञोपवीती कपिलतरश्मश्रुश्रेणीपरिचितमुख-मण्डलः रक्तवर्तुलचिनेत्रः भृकुटीकुटिलभ्रूकः[2] व्याघ्र-चर्म्माम्बरः दण्डायुधः दक्षिणकरेण वन्दनाभिनयी। एते सर्व्व एव स्वनायकाननप्रेरितदृष्टयो यथाशोभमवस्थिता-श्चिन्तनीयाः। ततः स्वहृदि शशिमण्डलोपरि ह्रीःकारं विभाव्य तस्माच्च नानाकारान् रश्मीन् संस्कार्य्य[3] त्रैधातु-कमापूर्य्य सर्व्वमन्त्वान् लोकेश्वरपदे प्रतिष्ठाप्य तान् रश्मीन् पुनस्तत्रैव बीजाक्षरं प्रवेशयेत्। पुनस्तत्किरणैरेव ज्ञानसत्त्वमाकृष्य समयसत्त्वेन सह क्षीरनीरयोरिव एक-रूपतां[4] ध्यायात्। ततः कायवाक्चित्तविशुद्धा यथाक्रमं शिरसि सितं ॐकारं कण्ठे रक्तमाःकारं हृदि कृष्णहुँकारं विचिन्तयेत्। अमी चानवरतनिःसरदनन्त किरणजाल-विध्वस्त निखिलमन्त्वराशिकल्मषसङ्घाता इति भावनां यथाशक्ति स्फुटीकुर्य्यात्।

पाटवं धारणां प्रज्ञां सौभाग्यारोग्यसम्पदम्।
लभते भावनायोगात् साक्षात्कारं च वीर्य्यवान्॥

भावनाखिन्नस्तु मन्त्वमेकाग्रचेतसा जपेत्। तच्चायं मन्त्वः ॐ ह्रीः स्वाहा। अमी च वर्णाः शरद-

---

[1] A भुजग०, C भुजङ्ग०।
[2] AAbC भृकुटी।
[3] AC संस्थाप्य।
[4] AC ०पद०।
[5] AC ०क्षर।
[6] A ०क्षीरयोनि।
[7] A ०रूपतो।
[8] A ०तमोंकारं, C सितमां।
[9] A ०वनतु।
[10] C ०ज्ञान०।
[11] AN ०विध्वस्त०।
[12] Ab संघातो, B संघाता।
[13] AC करजञ्च।

मलतारकामालिकेव प्रभास्वराः स्फुरदनेकरश्मयः। जपखेदात्तु[1] पुण्यं परिणमय्य उत्थाय[2] यथासुखं देवताहङ्कारमुद्वहन् विहरेत्।

विधाय साधनं हृद्यं श्रीमल्लोकेश्वरस्य यत्।
मया पुण्यं समासादि तेनास्तां तत्पदं जगत्[3]॥

॥ इति खसर्पणसाधनं समाप्तम्[4]।
कृतिः पद्माकरमतिपादानाम्[5]॥

15.

नमः श्रीखसर्पणाय।

इह शुभङ्करनामा उपासकः शुभकर्म्मकारी करुणायमानः स किल पोतलकगमनोद्यतः गच्छन् खाड़ीमण्डले[6] खसर्पणनामा ग्रामोऽस्ति तत्रोषितः। तस्य तु भगवतार्य्यावलोकितेश्वरेण प्रत्यादेशो दत्तः। मा गच्छ त्वमिहास्मान् वैरोचनाभिसंबोधितन्त्वराजक्रमेण स्थापय तेन महान्

---

[1] A जपेदातु।
[2] A परिणामोत्थाय।
[3] A गच्छं।
[4] Ab इति।
[5] A खातो.० C खादो०।

सत्त्वार्थो भविष्यति। तचासौ भगवन्तं शीघ्रमेव कारितवान् इत्येषा श्रुतिः। तच्च भगवतः साधनाय दृष्टिसम्पत्तिः[2] क्रियते। तथाहि वरं भिक्षोः शीलविपत्तिर्न पुनर्दृष्टि-विपत्तिरिति अतस्तच तावत् क्षणिकान्[3] निरात्मकान् सर्व्वधर्म्मान् व्यवलोक्य व्यपगतसकलविकल्पः कृपाशयोऽहो बत अमी सत्त्वाः क्लेशकर्म्मादिभिरुपद्रुताः, ततो जाति-जरामरणदुःखैरतीव पीड्यमानाः सन्तोऽनेकप्रकार-दुःखमनुभवन्ति। ततोऽहं लोकेश्वरो भूत्वा तेषां दुःखाद्यप-नयामि सर्व्वज्ञज्ञाने प्रतिष्ठापयामि। इत्येवं प्रतिज्ञा-शयं कृत्वा स्वहृदि पंकारजमहस्रदलपद्मवरटकमध्ये अकारजं चन्द्रमण्डलोपरि आः तां[4] सुं भृं हुं इति पञ्च बीजानि विन्यस्य रतद्रश्मिमालाभिः सञ्चोद्यानीय तान् गुरुबुद्धबोधिसत्त्वान् गगनतले पुरोवर्त्तिनः[5] कृत्वा वन्दना-पूजापापदेशनाशिशरणगमनादि सप्तविधां पूजामेकादश-विधां[6] वा कृत्वा मैत्रीकरुणादिचतुर्ब्रह्मविहार भावनां कुर्य्यात्। ततः ॐ शून्यताज्ञानवज्रस्वभावात्मकोऽहं इत्यु-च्चार्य्य शून्यताबोधिं कृत्वा भगवानवलोकितेश्वरो योगात्मना भूयते। स च शरत्काण्डगौरः जटामकुटी शिरसि अमिताभधारी सर्व्वालङ्कारभूषितः रत्नसिंहासनोपरि सहस्रदलपद्मस्थः ललिताक्षेपः द्विभुजैकमुखः वामेन

[1] A ततोसौ०।
[2] A सम्पत्ति।
[3] A क्षणिकान्।
[4] A चां।
[5] A सं।
[6] A omits चित्तरत्नगमना०।
[7] A ०विहारौ०।
[8] A ललिताक्षयः।

पद्मधारी दक्षिणेनामृतधारा[1] स्रवद्धरदः सत्त्वपर्य्यङ्कासीनः। अग्रतस्तारा कनकश्यामवर्णा उन्नतपीनपयोधरा सर्व्वालङ्कारभूषिता उत्पलकलिकासन्नकरद्वयार्पितनेत्रा[2]। तदनु सुधनकुमारः कनकोज्ज्वलः रत्नाभरणो रत्नमकुटी वामकक्षावसक्तकमलिकः[3] कृताञ्जलिपुटः। तदनु भृकुटी जटामकुटिनी मूर्द्धि चैत्याङ्किता कनकोज्ज्वला रक्तवस्त्रपरिधाना दक्षिणहस्तेन नमस्कारं कुर्व्वाणा अपरेणाक्षमालाधरा वामकराभ्यां चिदण्डीकमण्डलुव्यग्रा। तदनु हयग्रीवो ज्वलद्भासुरः पिङ्गलोर्द्ध्वकेशः नागाभरणो रक्तवर्णः लम्बोदरो व्याघ्रचर्म्माम्बरः दण्डहस्तः। एवं पञ्चात्मको भगवान् भावनीयः सपरिवारः पूजयितव्योऽप्येवंविधः। ततः कृतमण्डले तत्रादौ मण्डलं कृत्वा रक्षां कुर्य्यात्। ॐ मणिधरि वज्रिणि रक्ष रक्ष मां हुँ फट् स्वाहा। ॐ वज्ररेखे[4] हुँ मण्डलमन्त्रः। ॐ आगच्छ भगवन् मण्डलकसिंहासने ॐ आः इति मन्त्रकृतोऽध्येषणायां[5] कृतमण्डलमध्यसिंहासनोपरि सहस्रदलपद्मस्थं पञ्चात्मकं पूजयेदिति। तत्र पूजामन्त्राः— ॐ वज्रपुष्पे हुँ। ॐ वज्रधूपे हुँ। ॐ वज्रगन्धे[6] हुँ। ॐ वज्रालोके[7] हुँ। ॐ वज्राहारे हुँ। इति संपूज्य संस्तुत्य मन्त्रजापं कुर्य्यात्। ॐ सर्व्वतथागतपूजामेघप्रसरसमूहे[8] हुँ। पूजाधिष्ठान-

[1] A drops धारा।
[2] C त्रिनेत्रा।
[3] AC ०सक्तमलिकः।
[4] A ०रेख।
[5] AC ०वज्रगन्धे।
[6] A ०वर्णाः।
[7] A वस्त्राभरणो।
[8] AN नाना०।
[9] A ०ध्येयना।

मन्त्रः ॐ[1] आः ताँ सुँ भृँ हुँ फट् फट् स्वाहा। ॐ सर्व्वतथागतसुललितनमितैर्नमामि भगवन्तं जः हुँ वँ होः प्रतीच्छ कुसुमाञ्जलिं नाथ होः इति वन्दनामन्त्रः। ॐ मुः स्वाहा इति विसर्ज्जनमन्त्रः। ॐ ख ख खाहि खाहि[3] गृह्ण गृह्ण गृह्णन्तु सार्व्वभौतिका इमं बलिं स्वाहा इति बलिमन्त्रः। अथ पूजारम्भकाले एवमुच्चार्य्य चित्तं शोधनीयं यत् सर्व्वदुश्चरितेभ्यो विरतिं करोमि[4], सर्व्वबुद्धबोधिसत्त्वशिक्षां शिक्षिष्ये[5], यावत् पूजाविधिं न समर्थयामि[6]। यद्येवं न क्रियते तदा रागजं द्वेषजं मोहजं कुशलमूलं स्यात्। इह सर्व्व एव मत्त्वा[7] रागद्वेष-मोहाशयाः। तथाहि राग[8]जकुशलमूलेन नन्दोपनन्दौ नागराजानौ, द्वेषजेन रावणः, मोहजेन वैश्रवणो यक्षो भूतः। इत्यतो रागद्वेषमोहादीन् परिहृत्य चित्त-विशुद्धा करुणामयचित्तेन सर्व्वाण्येव दानादिकुशल-मूलानि कर्त्तव्यानि।

॥ इति खसर्पणसाधनं समाप्तम् ॥

---

[1] A ॐ आँ चाँ टँ ठँ फट् स्वाहा। [2] A ०माञ्जलिम्प्रय०।
[3] A खाहिहि०। [4] A ०म्यहोषि।
[5] A शिक्षे। [6] A समन्वयामि, N समन्वयामि।
[7] A सर्व्वत्वा। [8] A रागकु०।
[9] A रागेण C रमणः। [10] A चित्तशुद्धा।

16.

[1]नमः खसर्पणाय ।

प्रथमं तावन्मन्त्री सुखासनोपविष्टः स्वहृदि अकारेण चन्द्रमण्डलं ततः ह्रीःकारं सितवर्णं तदुद्भूतसित-रश्मिभिरग्रतोऽम्बरे गुरुबुद्धबोधिसत्त्वान् पश्येत् । तान् स्वहृद्बीजरश्मिभिः सम्पूज्य पापदेशनादिकं कुर्य्यात् । ॐ शून्यताज्ञानवज्रस्वभावात्मकोऽहमिति अधिष्ठयेत् । आत्मानं शून्यतायां व्यवलोक्य पूर्व्वोक्तह्रीःकारेण स्फुरण-संहरणक्रमेण लोकेश्वररूपमात्मानं भावयेत् सर्व्वाङ्ग-सितवर्णं जटामुकुटमण्डितम् अमिताभकृतशेखरं सर्व्वा-भरणभूषितं अर्द्धपर्य्यङ्किनं दक्षिणे वरदहस्तं वामे पद्मधरं पद्मचन्द्रासनस्थम् । दक्षिणपार्श्वे आर्य्यवसुधारासुधनौ, वामपार्श्वे भृकुटीहयग्रीवौ । भगवतः शिरसि चन्द्रे ॐ कण्ठे आः हृदि हुं एवं विभावयेत् । ध्यानात् खिन्नो योगी मन्त्रं जपेत् । तचायं मन्त्रः ॐ ह्रीः स्वाहा ।

॥ आर्य्यावलोकितेश्वरखसर्पणसाधनं समाप्तमिति ॥

[1] This *Sādhana* is only to be found in Ab. *See* fol. 28.

17.

नमः सिंहनादाय ।

द्विभुजैकमुखं शुक्लं त्रिनेत्रं सिंहवाहनम ।
सिंहनादमहं वन्दे सर्व्वव्याधिहरं गुरुम ॥

आदौ तावन्मन्त्री मुखशौचादिकं कृत्वा मनोऽनुकूले स्थाने सुखासनोपविष्टः शुक्लअकारपरिणतं चन्द्रमण्डलं तदुपरि शुक्लह्रीःकारं हृदि पश्येत् । तद्रश्मिभिस्त्रैधातुकमवभास्याकनिष्ठभुवनवर्त्तिनं सिंहनादं सर्व्वगुरुबुद्धबोधिसत्त्वानाकृष्य पुरत आकाशदेशे संस्थाप्य तदनु पुजापापदेशनादिकं कृत्वा चतुर्ब्रह्मविहारान् विभाव्य शून्यताज्ञानवज्रस्वभावाः सर्व्वधर्म्माः ॐ शून्यताज्ञानवज्रस्वभावात्मकोऽहं इत्यनेन मन्त्रेण शून्यतामधितिष्ठेत् । ततः प्रणिधानमनुस्मृत्य शुक्लपँकारपरिणतं कमलं तदुपरि शुक्लअकारपरिणतं चन्द्रमण्डलं तदुपरि शुक्लआःकारपरिणतं श्वेतसिंहं तदुपरि शुक्लअँकारपरिणतं श्वेतपद्मं तद्दरटके शुक्लह्रीःकारं स्फुरद्रश्मिविसरं एतत् सर्व्वं परिणम्य सिंहनादरूपमात्मानं पश्येत् सर्व्वाङ्गशुक्लं द्विभुजं एकमुखं त्रिनेत्रं जटामुकुटधरं अमिताभालङ्कृतशिरसं महाराजलीलया स्थितं सिंहासने व्याघ्रचर्म्माम्बरधरं स्फुरत्पञ्चतथागतं अंसलम्बितपञ्चचीरं अर्द्धचन्द्रालङ्कृतं वामहस्तस्थितशुक्लपद्मोपरि सितखड्गं तत्समीपस्थितं शुक्लपद्मोपरि नानासुगन्धिकुसुमपरिपूर्णशुक्लकरोटकं

---

[1] A ह्रीं
[2] N ०मनुस्मृत्य, C ०मत्रस्मृत्य
[3] A आ०
[4] A ०शिरः
[5] A स्वभावात्मको ।
[6] A omits कमलं...०परिणतं ।
[7] N ॐकार०
[8] N ०चन्द्राङ्कितं ।

दक्षिणे सितपद्मोपरि सितफणिवेष्टितं सितचिशूलदण्डं एवंभूतं भगवन्तं ध्यात्वा ध्यानात् खिन्नो मन्त्री मन्त्रं जपेत्। तचायं मन्त्रः ॐ आः सिंहनाद हुँ फट् स्वाहा। विधिरच प्रतिमाकृतेः पटगतस्य वा भगवतः पुरतः प्रतिमण्डलमेकवारधारण्या। तचेयं धारणी— नमो रत्नत्रयाय नम आर्य्यावलोकितेश्वराय बोधिमत्त्वाय महामत्त्वाय महाकारुणिकाय तद्यथा ॐ अकटे विकटे निकटे कटंकटे करोटवीर्य्ये स्वाहा। अपतितगोमयमभिमन्त्र्य अष्टौ मण्डलकान् कुर्य्यात्। प्रतिमण्डलं चयोदश वारान् आवर्त्तयन् धारणीं प्रतिमण्डलामलितगोपगोमयं धारण्या सप्त वारानभिमन्त्र्य तेन व्याधिं प्रलेपयेत्। सप्तमे दिवसे चयोदशे दिवसे एकविंशतितमे वा पञ्चानन्तर्य्यकारिणोऽपि सिध्यन्ति यदि न सिध्यन्ति तदाऽहं पञ्चानन्तर्य्यकारी स्याम्।

॥ सिंहनादसाधनं समाप्तम्।

विधाय साधनं धन्यं यदलाभि शुभं मया।
सिंहनादस्य नाथस्य निर्व्याधि स्यात् ततो जगत्॥

। कृतिरियं पण्डितावधूतश्रीमद्हयवज्रपादानाम्॥

[1] A ०प्रतिमाकृतो। [2] AC reads चिकटे after निकटे।
[3] A ०न्धारणी, N ०न्धारणीं, C ०न्धारणा। [4] A व्याधिं।
[5] A ०विंशतिरात्र०। [6] AC सिध्यति।
[7] AC सिध्यति। [8] A यदचलाभिः।

18.

नमो लोकनाथाय ॥

पूर्व्ववत् क्रमयोगेन लोकनाथं शशिप्रभम् ।
ह्रीःकाराक्षरसंभूतं जटामुकुटमण्डितम् ॥
वज्रधर्म्मजटान्तःस्थं अशेषरोगनाशनम् ।
वरदं दक्षिणे हस्ते वामे पद्मधरं तथा ॥
ललिताक्षेपसंस्थं तु महासौम्यं प्रभास्वरम् ।
वरदोत्पलकरा सौम्या तारा दक्षिणतः स्थिता ॥
वन्दनादण्डहस्तस्तु हयग्रीवोऽथ वामतः ।
रक्तवर्णो महारौद्रो व्याघ्रचर्म्माम्बरप्रियः ॥
तदरटकाष्टदले पद्मे मैत्रेयादिं [च] विन्यसेत् ।
मैत्रेयः पीतवर्णश्च नागपुष्पवरप्रदः ।
क्षितिगर्भः श्यामवर्णः कलशं चाभयं तथा ॥
वज्रपाणिश्च शुक्लाभो वज्रहस्तो वरप्रदः ।
खगर्भो नभःश्यामाभो चिन्तामणिवरप्रदः ॥
मञ्जुघोषः कनकाभः खड्गपुस्तकधारकः(रिणः) ।
गगनगञ्जो रक्तवर्णो नीलोत्पलवरप्रदः ॥

---

[1] A ह्रीःकारस्थसं० । [2] AC अशेषरागगनागरं ।
[3] A वलदालङ्कारा, B वरदोत्पला ।
[4] C ०योवोऽर्थ० । [5] C रक्तार्णो ।
[6] The passages from तदरटकाष्टदले.....मञ्जुघोषस्यानुसारतः cannot be found in any other recension except A.
[7] MS तदाष्टाष्टदले । [8] MS नद्यामाभो ।
[9] MS गगनगजा ।

विष्कम्भी तु क्षारवर्णो रत्नोत्तमवरप्रदः ।
समन्तभद्रः पीताभो रत्नोत्पलवरप्रदः ॥
धूपादिचतुर्देवी च [1]वज्राङ्कुश्यादिद्वारगाः ।
वर्णायुधे यथापूर्वं मण्डलस्यानुसारतः ॥
एवंविधैः समायुक्तं लोकनाथं प्रभावयेत् ।
सर्व्वक्लेशमलातीतो भवेत् पूर्णमनोरथः ॥

अत्र मन्त्रः ॐ ह्रीः स्वाहा ।

॥ इति लोकनाथसाधनं समाप्तम् ॥

19.

[2]लोँबीजात् सर्व्वं पूर्व्ववद् विधाय भ्रुवोर्मध्यपर्य्यन्तं ततो लोँ परिणम्य लोकनाथं चन्द्रप्रभं सर्व्वाभरणोज्ज्वलं जटामुकुटिनं पद्मचन्द्रोपरि पर्य्यङ्कितं वामे पद्मधरं दक्षिणे वरदं चिन्तयेत् । समयमुद्रा । मुष्टिद्वयं बद्ध्वा मध्याङ्गुल्यौ पद्मसंकोचाकारेण [3]योजयेत् । ॐ मणिपद्मे हुँ मन्त्रं जपेत् ।

॥ लोकेश्वरसाधनं समाप्तम् ॥

---

[1] MS वज्रोकुश्यादि० ।
[2] AC लां ।
[3] AC लां ।
[4] A ०सकाचाका० ।

20.

नमः सिंहनादाय ।

प्रथमं मुखशौचादिकं कृत्वा सुखासनस्थो योगी स्वहृदि सूर्य्यमण्डले आःकारं दृष्ट्वा पुरतो गुरुबुद्धादीनानीय पापदेशनादिकं कुर्य्यात् । ततः शून्यतामामुखीकृत्याधिष्ठाय च प्रणिधिमनुस्मरेत् । ततः [1]अकारपरिणतं चन्द्रं तस्योपरि ॐकारपरिणतं रक्तपद्मं तदुपरि आःकारपरिणतं श्वेतसिंहं तस्योपरि चन्द्रे ह्रीःकारसम्भवं सिंहनादभट्टारकं श्वेतं जटामकुटिनं चिनेचं द्विभुजं तपस्विवेशधरं महाराजलीलया स्थितं वामहस्तादुत्थितपद्मोपरि ज्वलदूर्द्धखड्गं दक्षिणे सितचिशूलं सितफणिवेष्टितं वामे नानासुगन्धिपुष्पैः पूर्णं श्वेतकपालं अमिताभमुकुटिनं स्फुरत्पञ्चतथागतं महानिर्म्माणरूपिणं ध्यायात् । जपमन्त्रः ॐ आः ह्रीः सिंहनाद हुँ फट् ।

॥ इति सिंहनादसाधनम् ॥

---

[1] A आकार० ।
[2] A has ॐकारं तत्परिणतं after this.
[3] AC खरवेत् ।

21.

नमो रत्नत्रयाय ।

नम आर्य्यावलोकितेश्वराय बोधिसत्त्वाय महासत्त्वाय महाकारुणिकाय तद्यथा ॐ अकटे विकटे निकटे कटंकटे करोटे करोटवीर्य्ये स्वाहा । एषा भगवत आर्य्यावलोकितेश्वरस्य पुरतः प्रत्यूषे अपतितगोमयेनाष्टौ मण्डलकान् कृत्वा प्रतिमण्डलं चयोदश वारानुच्चारयितव्या । ततः सप्त वारान् गोमयशेषमभिमन्त्र्य व्याधिमुपलेपयेत् सर्व्वव्याधीनुपशमयति । यदि सप्तमे दिवसे चयोदशे वा एकविंशतितमे [1]वा दिवसे पश्चानन्तर्य्यकारिणोऽपि न [2]सिध्यन्ति तदा [3]अहं पश्चानन्तर्य्यकारी स्यामिति ।

॥ सिंहनादानाम धारणी समाप्ता ॥

[1] वा omitted in AN.

[2] A सिध्यति ।

[3] अहं dropped in AN.

22.

[1]नमः सिंहनादाय।

प्रथमं तावन्मन्त्री मुखशौचादिकं कृत्वा [2]मृदुविष्टरे उपविश्य सुखासनस्थः स्वहृदि चन्द्रमण्डले सितह्रीःकारं दृष्ट्वा तद्रश्मिसमाकृष्टान् पुरतो गुरुबुद्धबोधिसत्त्वान् ध्यायात्। तदनु पूजापापदेशनादिकं कृत्वा शून्यतां विभाव्य [3]ॐ शून्यताज्ञानवज्रस्वभावात्मकोऽहं इत्यनेनाधितिष्ठेत्। ततो [4]झटिति पँकारपरिणतं रक्तपद्मं तदुपरि [5]सिँकारपरिणतं श्वेतसिंहं तस्योपरि चन्द्रे ह्रीःकारसम्भवं सिंहनादलोकेश्वररूपमात्मानं ध्यायात् शुक्लममिताभजटामुकुटिनं चिनेत्रं द्विभुजं तपस्विवेशधरं महाराजलीलया स्थितं वामहस्तादुत्थित[6]पद्मोपरि ज्वलत्खड्गं दक्षिणे सितचिश्रूलं सितफणिवेष्टितं वामे नानासुगन्धिपुष्पैः पूर्णं श्वेतकपालं स्फुरत्पञ्चतथागतं महानिर्म्माणरूपिणं ध्यायात् इति। जपमन्त्रः ॐ आः ह्रीः सिंहनाद हुँ [7]फट्।

॥ सिंहनादसाधनं समाप्तम्[8] ॥

This *Namaskāra* is only to be found in Ab.
मृदुविष्टरे उपविश्य not to be found in ANC.
Instead of the *Mantra* ॐ शून्यता etc. Ab has स्वभावशुद्धाः सर्व्वधर्म्माः स्वभावशुद्धोऽहं।

[1] Ab पश्चात्। [5] A तदुपरिसितं।
[2] A ०दुत्थितपरि। [6] Ab ०तथागताः।
[3] Ab रूपं, C रूपितां। [7] Ab adds स्वाहा after फट्।
[4] This Colophon is not to be found in any other MS except Ab.

23.

तदनन्तरं धारणी भवति। नमो रत्नत्रयाय नम आर्य्यावलोकितेश्वराय बोधिसत्त्वाय महासत्त्वाय महाकारुणिकाय तद्यथा ॐ अकटे विकटे निकटे कटंकटे करोटे करोटवीर्य्ये स्वाहा। अयं [1]मन्त्रोपचारः भगवतोऽग्रतः प्रत्यूषे अपतितगोमयेनाष्टौ मण्डलकान् कृत्वा प्रतिमण्डलकें [2]त्रयोदश वारानुच्चारयेत्। गोमयशेषं सप्ताभिमन्त्र्य [3]व्याधिमुपलेपयेत् सर्व्वव्याधीनुपशमयति। यदि सप्तमे दिवसे त्रयोदशे दिवसे [4]एकविंशतितमे वा दिवसे पश्चानन्तर्य्यकारिणोऽपि न सिध्यत्ययं तदाऽहमेव पश्चानन्तर्य्यकारी भविष्यामि।

॥ सिंहनादधारणी समाप्ता ॥

24.

नमः खसर्पणाय।

नत्वा खसर्पणं नाथं नाथभूतं च दुःखिनाम्।
संक्षिप्तात् विस्तरं किञ्चित् साधनं तस्य लिख्यते॥

प्रथमं तावन्मन्त्री पाणिपादादिकं वारिणा प्रक्षाल्य परमशुचिर्भूत्वा विजनगिरिगुहायां स्थाने शुचौ वा क्वचित् चित्तानुकूले मृदुविष्टरामलोपविष्टः स्वहृदि प्रथमस्वरपरिणतं निर्दोषदोषाकरमण्डलमालोक्य चेतसा तन्मध्ये

---

[1] C अत्रोप०। [2] Ab ०मण्डले।
[3] A व्याधिमूलेपयेत्। [4] AC ०विंशतितमे।

शरदिन्दुगतं किरणावलीप्रोज्ज्वलं ह्रीःकार[1] बीजं पश्येत् । ततोऽपि ह्रीःकारबीजात् निःसृत्य जगन्मोहतम[2]स्तोमध्वंस-[3]कारिभिरङ्कुशाकारैर्म्मरीचिविसरैर्दशसु दिक्षु ये चानन्त-लोकधातवः अवतिष्ठन्ते तान् सर्व्वान् प्रकाश्य तत्र स्थिता अप्यसंख्येया अप्रमेयाश्च गुरुबुद्धबोधिसत्त्वा नभो-देशे चाकृष्य संस्थाप्यन्ते । पश्चात् तेषां नभोदेश-वर्त्तिनां[4] परमकारुणिकानां गुरुबुद्धबोधिसत्त्वानां पुष्पधूप-दीपगन्धमाल्यविलेपनचूर्णचीवरच्छत्रध्वजघण्टापताकादि-भिरतिशयवतीं पूजां विधाय पापदेशनां कुर्य्यात् । [5]यत्किञ्चित् अस्यां जातावन्यासु वा जातिष्वनादिनिधने जातिसंसारे संसरता मया पापकं कर्म्म कायेन वाचा मनसापि कृतं कारितं क्रियमाणमनुमोदितं तत्सर्व्वं [6]भगवतां त्रैलोक्यमहोत्सवानां गुरुबुद्धबोधिसत्त्वानां पुरतः प्रतिदेशयामीत्यनेन विधिना प्रदेश्य [7]पुनरकरणसंवरं प्रतिगृह्य पुण्यानुमोदनां कुर्य्यात् । [8]संबुद्धप्रत्येक श्रावक-बुद्धानां तत्सुतानामपि बोधिसत्त्वानां सत्त्वानामपि त्रैलोक्योदरवर्त्तिनां यदेव कुशलं तत्सर्व्वं अनुमोदयामीति । तदनु रत्नत्रयशरणगमनम् । बुद्धं शरणं गच्छामि द्विपदाना-मग्र्यम्, धर्म्मशरणं गच्छामि विरागाणामग्र्यम्, सङ्घशरणं

[1] C शरदिन्दुगतं ।
[2] AC ह्रीःकारं ।
[3] AC जनमो ।
[4] AC ओम० ।
[5] AC यन्त्र० ।
[6] C कृत्ति ।
[7] NA omits यत्किञ्चित् .....पुण्यानुमोदनां कुर्य्यात् ।
[8] A सुजातिस्वरादि० ।
[9] C भगवतो ।
[10] A प्रतिदेश्य ।
[11] A पुनरस्य० ।
[12] A श्रावकानां ।

गच्छामि [1]गणानामग्र्यमिति। [2]पश्चान्मार्गाश्रयणम्। मार्गः सम्बुद्धोक्तः स चाश्रयणीयो मया नान्य इति। तदनन्तर-मध्येषणां कुर्य्यात्। सत्त्वार्थमासंसारं कुर्व्वन्तु भगवन्तः[4] संबुद्धास्तत्सुता अपि मह्यबोधिसत्त्वास्तिष्ठन्तु मामा[5] परि-निर्व्वाणादिति[6]। तदनु याचनां तथाविधां निरुत्तरधर्म्म-देशनां भगवन्तस्तथागता[7] देशयन्तु[8] यया त्वरितमेव सत्त्वाः संसारागाधसागरं तरन्तीति। तदनु याचनानन्तरं पुण्य-परिणामनां कुर्य्यात्। सप्तविधानुत्तरपूजया यदेव कुशल-मुत्पन्नं तदेव [9]संबोधये परिणामयामीति। अथवा समा-सतः सप्तविधानुत्तरपूजासूचकान् श्लोकानमून् पठेत्—

कायेन वाचा मनसा कृतं यत्
पापं जिनानां पुरतो दिशामि।
लोकत्रयाणां कुशलं तु सर्व्वं
नित्यं प्रमोदादनुमोदयामि॥

रत्नत्रयं यामि सदाहमत्र
मार्गं जिनोक्तं शरणं [10]व्रजे च।
सत्त्वार्थमत्रापि कुर्व्वन्तु बुद्धाः
सुताश्च तेषां सततं [11]भवस्य॥

[1] A गणना०। [2] A पश्चात्मार्गाश्रयणं।
[3] A मध्येषणां। [4] भगवन्तः omitted in ANA.
[5] A मापरि०, NA महापरि०, C मां परि०।
[6] A निर्व्वाप्तिति, C निर्व्वान्विति।
[7] A ०स्तथागत०। [8] A देशायं।
[9] A संबोधिं। [10] A व्रजे, C व्रजे।
[11] C वस्य।

तिष्ठन्तु यावत् स्थितिरेव तावत्
निर्व्वान्तु मां ते पितरः प्रजानाम् ।
संदेशनां ते ननु तादृशीं वा
धर्म्मस्य कुर्व्वन्तु महाप्रभावाः ॥
संसारसिन्धोः सहसापि सत्त्वाः
पारं यथा यान्ति सुखं प्रभूतम् ।
पुण्यं प्रभूतं यदिहापि सर्व्वं
संबोधये तत् परिणामयामि ॥

जिनेभ्यस्तत्सुतेभ्यश्च गुरुभ्यो जगतामहम् ।
आत्मानं सर्व्वभावेन निर्य्यातयामि सर्व्वदा ॥

इत्यमीभिः सप्तविधां पूजां विधाय ॐ आः हुँ मुरिति विसर्ज्जयेत् । तदनन्तरमप्रमाणानि चत्वारि मैत्रीकरुणा-मुदितोपेक्षाणि वक्ष्यमाणक्रमेण ध्यायात् । तत्रेयं मैत्री सर्व्वसत्त्वेषु अतिशयितहितैकपुरःकक्लेहलक्षणा । करुणा तु कीदृशी ? अगाधापारसंसार सागरमध्ये पतितानन्तसत्त्व-धातून् समुद्धरामीत्यध्याशयः । मुदिता पुनः कीदृशी ? धातुत्रयावस्थितानां सत्त्वानां यानि सुचरितानि तेषु तद्भोगैश्वर्य्यादिषु हृष्टचित्तता । केयमुपेक्षा ? प्रतिघानु-नयनिबन्धनमपहाय हिताहितेषु सत्त्वेषु परम हिता-चरणं चतुःप्रमाणभावनानन्तरं सर्व्वधर्म्मप्रकृतिपरिशुद्धतां

---

[1] AC ०यच्छामि ।
[2] Nb लक्षयमान० ।
[3] A ०सत्त्वैरतिशयित०
[4] ANb ०पुत्रकेह० ।
[5] AC ०संसारसारसागर० ।
[6] A पानिसुचितानि ।
[7] A omits तद्भोगैश्वर्य्यादिषु ।
[8] A हृष्टदित्तथा ।
[9] ANb प्रतिघातनमनि० ।
[10] A ०हितावरणां ।
[11] A omits तां...अहमपि ।

चिन्तयेत्। सर्व्व एवामी धर्म्माः प्रकृत्या स्वरूपेण परिशुद्धाः अहमपि प्रकृतिपरिशुद्ध इत्यादिकमामुखयेत्। इमामेव सर्व्वधर्म्मप्रकृतिपरिशुद्धतां ॐ स्वभावशुद्धाः सर्व्वधर्म्माः स्वभावशुद्धोऽहमित्यनेन दृढीकुर्य्यात्। न च प्रकृतिपरिशुद्धे सर्व्वधर्म्मे सद्यो मुक्तिप्रसङ्गो दुर्व्वारः स्यात्। सत्यं परमयं प्रसङ्गोऽसङ्गत एव। कुतोऽसङ्गतः? संसारहेतुकरागादिमलशबलत्वात् सर्व्वधर्म्माणाम्। कथं पुनः तदपगमः स्यात्? विशिष्टमार्गभावनया। तया म निरुद्ध्यते। अत एवाह भगवान् निरोधः साक्षात् कर्त्तव्य इति। तस्मात् प्रकृतिपरिशुद्धाः सर्व्वधर्म्मा इत्यादि वचनमुपपन्नमेव इत्यलं बहुभाषितया। सर्व्वधर्म्मप्रकृतिपरिशुद्धतामामुखीकृत्य सर्व्वधर्म्मशून्यतां ध्यायात्। तत्रेयं शून्यता मनोमात्रमेवेदं तेन तेनाकारेण प्रकाशात्मकं प्रतिभासते यथा स्वप्ने नास्ति मनसो बाह्यं मनोग्राह्यं ग्राह्याभावात्। ग्राहकमपि मनो नास्ति। ततश्च मनःस्वरूपाः सर्व्वधर्म्माः। तेषां ग्राह्यग्राहकादिसकलकल्पनाप्रपञ्चशून्यतातत्त्वं परमार्थ इति यावत्। अयमर्थ अद्वैतप्रकाशमात्मकं सचराचरं जगदिति चिन्तनीयम्। इमामेव शून्यतां ॐ शून्यताज्ञानवज्रस्वभावात्मकोऽहं इत्यमुना मन्त्रेणाधितिष्ठेत्। तदनु कलङ्काङ्कनिर्म्मुक्त-

---

[1] ANb ०परिशुद्धि।
[2] A तदुपग्रमः।
[3] ANb बाह्यं।
[4] A ग्राह्या।
[5] A ग्राह्य०।
[6] ANb सर्व्वधर्म्मे।
[7] A प्रकाशात्मं।
[8] A ०स्वरूपाः।
[9] A सकल्प।

क्षपाकरमण्डलारूढं[1] शुभ्रातिशुभ्रं ह्रीःकारबीजं भगवन्तं श्रीमत्खसर्पणलोकेश्वरं शरद्मलहरिणाङ्कमण्डलशतोदयातिशुभ्रदेहं परमशृङ्गारोज्ज्वलरमणीयमूर्त्तिं नानारत्नाद्याभरणविराजित[2]विग्रहं जटामकुटधारिणं[3] विकसितपुण्डरीकलोचनं भगवदमिताभजिनरत्नविशोभितशिरोदेशं हेम[4]वालुकासलिलक्षालितावदाताम्बराहृतशरीरं शकटचक्र[5]प्रमाणमतिकमनीयमितामोरुहोपरि स्थितं निष्कलङ्कविधुमण्डलासनस्थं अर्द्धपर्य्यङ्किनं सव्यकरेण वरदं अवसव्येन[10] विकसितमनोहारिसितारविन्दधरं एवम्भूतं भगवन्तं निष्पाद्य तद्रूपमात्मानं विभावयेत्। भगवतो दक्षिणपार्श्वे चार्य्यतारा-सुधनौ वामपार्श्वे च भृकुटी-हयग्रीवौ चिन्तनीयाविति। शिरसि निष्कलङ्केन्दुमण्डलोपरि ॐकारम्, तदनु कण्ठे विमलसोममण्डलोपरि आःकारम्, हृदये त्वमलकुमुदबन्धुमण्डलोपरि हुँकारं पश्येत्। तदनेन क्रमेण यावदिच्छति तावद् भावयेत्। तदनन्तरमस्यैव समयसत्त्वरूपस्य भगवतो लोकनाथरूपस्य[11] हृदिस्थ[12]कलङ्काङ्कविविक्तशशिमण्डलोपरिस्थितकार्त्तिकेन्दुकुन्दसन्निभह्रीःकारबीजविनिर्गतापर्य्यन्तरश्मिविसरैस्त्रैलोक्याज्ञानान्धकारा-

[1] A रूढा Nb रूढा । [2] A शुभातिशुभ्यत्, Nb शुभातिशुभ्रा
[3] A शरदमलहरि० । [4] A ०विराजिविग्रहं ।
[5] A drops ०ओं.....०रूढोपरि ।
[6] C हिम० । [7] Nb ०वालुकाग्रनिक्षालि० ।
[9] Nb ०दातां वरा० । [9] Nb शतचक्र० ।
[10] वरदं अवसव्येन dropped in A.
[11] A ०नाथस्य । [12] C reads कमलं after हृदिस्थ० ।
[13] C omits ०न्धकारापहारिभिः ।

पद्मारिभिर्गत्वा अनादिसंसिद्धो भगवान् ज्ञानसत्त्वरूपः सुदूराद् द्वीपदेशादानीयते। समानीय तमेव भगवन्तं पुरतो नभःप्रदेशे च संस्थाप्य नानारत्नखचितचामीकरादिभाजनावस्थितसुगन्धोदकेन सुरभिकुसुमेन च तस्यैवानीतज्ञानसत्त्वरूपस्य भगवतो लोकनाथस्य चरणार्घं दत्त्वा तदनु दिव्यपुष्पधूपदीपनैवेद्यगन्धमाल्यविलेपनचूर्णचीवरच्छत्रध्वजघण्टापताकादिभिर्बाह्यगुह्यपूजानिवहैर्नानाप्रकारैस्तमेव भगवन्तं ज्ञानसत्त्वात्मकमर्चयेत्। पुनः पुनरभ्यर्च्य स्तुत्वा च जः हुँ वँ होः इत्यनेनाक्षरचतुष्टयेन मुद्रां दर्शयेत्। किञ्चिदुच्छ्रितं संपुटाञ्जलिं कृत्वा मध्यमे सूचीकुर्य्यात्, शेषाश्चाङ्गुल्यः किञ्चित् सङ्कोच्य सम्मुखमसंश्लिष्टा धारयेत्, अङ्गुष्ठौ तर्जनीद्वयसमीपे स्थापयेदिति विकसितकमलमुद्रेयम्। अनया मुद्रया तमेवानीतं भगवन्तं ज्ञानसत्त्वलक्षणं परितोष्यापि समयसत्त्वरूपे भगवत्यन्तर्भाव्य ॐ आः हुँ इत्यनेनानयोरद्वैतमधिमुच्चेत्। तदनन्तरं कलङ्कपटलनिर्मुक्त शुभ्रांशुमण्डलमध्यावलोनां अनौषधीशमण्डलशतकरनिकरोज्ज्वलह्रीःकारबीजविनिर्गता असंख्येया अप्रमेयाश्च भगवतः श्रीखसर्पणलोकेश्वरभट्टारकदश दिग्वर्त्तिनोऽनेकलोकधातून् अवभास्य तत्र स्थिता-

[1] C omits गत्वा.....ज्ञान०। [2] ANb सुदूरादिपं देशा०।
[3] A ०दानीय। [4] समानीय omitted in A.
[5] A भवन्तं। [6] A ०सत्त्वस्य।
[7] ध्वज dropped in A.
[8] A ०दुच्छ्रितं, Na ०दुच्छृतं, C ०दुच्छ्रुतं। [9] A भाः।
[10] A ०सुतांसु०। [11] ANb ०कादशे०।

नामपि सत्त्वानां स्वर्णमाणिक्यमुक्ताराजपट्टप्रवाल-वैडूर्येन्द्रनीलादिरत्नवर्षणेन दारिद्र्यादिदुःखमपहरन्ति। निरुत्तरक्षणिकनैरात्म्यादिधर्म्मदेशनायाः पीयूषधारा-प्रबन्धेन तान् सन्तर्पयन्ति। पुनः पुनरनवरतं नानाप्रकारं परार्थं कृत्वा जगदपि भगवल्लोकेश्वररूपेण निष्पाद्य तत्रापि हिमार्चिर्मण्डलमध्यवर्त्तिनि स्फटिकमणिकिरणसङ्काश-ह्रीःकारबीजे त एव भगवन्तः समागत्यान्तर्भवन्तीत्येव-मादिस्फुरणसंहरणक्रमेण यावत् खेदो न जायते तावद् भावयेत्। तत्रापि भावना खिन्नो मन्त्रं जपेत्। तत्रायं मन्त्रः ॐ ह्रीः स्वाहा। मन्त्रोऽयं भगवतो लोकनाथस्य हृदयम्। असाधारणप्रभाव एवासौ मन्त्रराजः सर्व्वैरेव जिनवरैरभ्यर्चितः सत्कृतो नमस्कृतश्चेति। समाधेरुत्थितो जगल्लोकेश्वररूपं वीक्ष्य तदहङ्कारेण यथेष्टं विहरेत् इति। प्रायोऽनेन विधिना भगवन्तं चिन्तयेत् खड्गाञ्जनादि-प्रमुखसकला महासिद्धयः समागत्य पादयोः पतन्ति, किं पुनः क्षुद्रसिद्धयः! अपि तु ताश्च नितरामेव। ये विजनवनश्मशानगिरिगुहासीना भगवन्तं भावयन्ति ते च अचिराद्देव नियतमचभगवन्तं पश्यन्ति। स्वयमेव भगवांस्तेषां आश्वासप्रश्वासादिकं दद्यात्। यातु किं बहु-

---

[1] AC ॰राजपट्ट॰।
[2] A पुनश्चरणत, Na भरणवत।
[3] A मार्चि॰।
[4] A भावणात्।
[5] Nb वभ्यर्च्च॰।
[6] AC ॰प्रख॰।
[7] ANb ॰वर॰।
[8] A आश्वासादिकं।
[9] ANb यावत्।

वच[1]नीयं परमातिदुर्ल्लभं बुद्धत्वं[2] अपि तेषां पाणितलाव-
लीनबदरकफलमि[3]वावतिष्ठति इति ।

॥ किञ्चिद् विस्तरं श्रीखसर्पणलोकेश्वरसाधनं समाप्तम् ।

श्रीखसर्ष्पणनाथस्य कृत्वा साधनमुत्तमम् ।
यत् पुण्यमर्ज्जितं तेन यातु लोकः पुरं मुनेः ॥

। कृतिः स्थविरानुपमरक्षितानाम् ॥

25.

सिंहनादमहं वन्दे सर्व्वव्याधिहरं गुरुम् ।
भावनायोगमात्रेण मुच्यते सर्व्वकिल्बिषात्[4] ॥

प्रथमं तावत् मुखशौचादिकं कृत्वा शुचिवस्त्रप्रावृतः पवित्रभूमौ सुखासनोपविष्टः स्वहृदि चन्द्रे ह्रीःकारं विभाव्य तेन रश्मिनाकृष्य सर्व्वतथागतान् पूजयित्वा पापदेशनादिकं कुर्य्यात् । ततो मैत्रीकरुणामुदितोपेक्षा[5]श्च विभाव्य स्वभावशुद्धमन्त्रोच्चारणपूर्व्वकं शून्यतां भावयेत् ॐ स्वभावशुद्धाः सर्व्वधर्म्माः स्वभावशुद्धोऽहं ॐ शून्यताज्ञानवज्रस्वभावात्मकोऽहं इति। [6]एतदनन्तरं प्रतिभासमात्रकं स्वकायमवलोक्य रक्तरेफ[7]परिणतं रक्ताष्ट-

---

[1] A किञ्चनीयं ।
[2] बुद्धत्वं dropped in A.
[3] ANb •मिव तिष्ठति ।
[4] N •किल्बिषैः ।
[5] A चतुर्विभाव्य ।
[6] A तदन• ।
[7] C •रिष• ।

दलपद्मोपरि ह्रीःकारपरिणामेन श्वेतसिंहं तस्योपरि पृष्ठ-चन्द्रे ह्रीःकारं सरश्मिकं तेनैवाह्वाह्य सर्व्वतथागतप्रवेशे-नात्मानं सिंहनादं लोकेश्वररूपं भावयेत् श्वेतवर्णं त्रिनेत्रं जटामुकुटिनं निर्भूषणं व्याघ्रचर्म्मप्रावृतं सिंहासनस्थं महा-राजलीलं चन्द्रासनं चन्द्रप्रभं भावयेत्। दक्षिणे सित-फणिवेष्टितं त्रिशूलं श्वेतं, वामे नानासुगन्धिकुसुमपरि-पूरितपद्मभाजनं, वामहस्तादुत्थपद्मोपरि ज्वलत्खड्गं, स्वकाये पञ्चतथागतं स्फुरन्तं पश्येत्। ततो हृदीजेनाह्वाह्य ज्ञानसत्त्वं प्रवेशयित्वा तथागतान् स्फार्य्याभिषिञ्चेदात्मानं मौलावमिताभमुद्रणं चिन्तयेत्। ततो मन्त्रं जपेत् देवतामूर्त्तिना। तच्चायं मन्त्रः ॐ आः ह्रीः सिंहनाद हुँ फट् स्वाहा। तदनु सुगन्धादिमण्डलं कृत्वा पूजार्थं पुष्पादिकं ढौकयित्वा अर्च्चयेत्। पुनर्म्मालामन्त्रं जपेत्। ॐ नमो रत्नत्रयाय नम आर्य्यावलोकितेश्वराय बोधि-सत्त्वाय महासत्त्वाय महाकारुणिकाय। तद्यथा ॐ अकटे विकटे निकटे कटङ्कटे करोटे करोटवीर्य्ये स्वाहा। अनेन मन्त्रेण मण्डलमृत्तिकां गृहीत्वा एकविंशतिवारान् आवर्त्त्य व्याधिं प्रलेप्य स्वस्थो भवति।

॥ इति सिंहनादलोकेश्वरसाधनं समाप्तम् ॥

---

[1] C विभूषणं। [2] चन्द्रासनं dropped in A.
[3] N ०दुपस्थितं। [4] A स्थाप्य०।
[5] A ढौकयित्वा। [6] A adds कटके and N त्रिकटे after निकटे।
[7] A आर्य्य। [8] N omits इति and समाप्तं in the Colophon.

26.

प्रथमं तावत् मन्त्री सुखासनोपविष्टः स्वहृदि पँकार-परिणताष्टदलकमलस्योपरि [1]अकारपरिणामेन चन्द्र-मण्डलं तस्योपरि ह्रीःकारं मरश्मिकं दृष्ट्वा तेन [2]रश्मिना-क्षष्याकनिष्ठभुवनवर्त्तिलोकेश्वरं पुरतो नभःस्थलं दृष्ट्वा पापदेशनादिकं कुर्य्यात्। तद्यथा पापदेशना, पुण्यानु-मोदना, पुण्यपरिणामना, त्रिशरणगमनं, आत्म-भावनिर्य्यातना, अध्येषणा, बोधिचित्तोत्पादनं कृत्वा चतुर्ब्रह्मविहारवान् भावयेत्— मैत्रीकरुणामुदितोपेक्षाः। ततः शून्यतां भावयेत् ॐ शून्यताज्ञानवज्रस्वभावात्म-कोऽहम्। प्रतिभासमात्रं स्वकायं व्यवलोक्य हृदि मध्ये पँका[3]रजाष्टदलपद्मस्योपरि अकारेण[4] चन्द्रमण्डलं तस्यो-परि रक्तह्रीःकाररश्मिनाकृष्टसर्व्वतथागतप्रवेशेनात्मानं लोकेश्वररूपं विभावयेत्। शुक्लवर्णं जटामुकुटिनं दक्षिण-हस्तवरदं तदितरशुभ्रपद्म[5]हस्तं अर्द्धपर्य्यङ्किनं सर्व्वालङ्कार-भूषितं अमिताभमकुटिनं द्वात्रिंशल्लक्षणधरं अशीत्यनु-व्यञ्जनं चन्द्रासनं चन्द्रप्रभमात्मानं विभावयेत्। ततो दक्षिणे आर्य्यतारासुधनौ, वामे भृकुटीहयग्रीवौ, पूर्व्वे वैरोचनः, दक्षिणे रत्नसम्भवः, पश्चिमे अमिताभः, उत्तरे अमोघसिद्धिः, आग्नेय्यां लोचना, नैर्ऋत्यां मामकी,

[1] A omits अकारपरि०।
[2] A adds तेन रश्मिना after प्रतिभासमात्रं।
[3] A स्वकार्यं।
[4] A पं रजा०।
[5] A आकार०।
[6] C यमहस्तं।

वायव्यां पाण्डरा, ऐशान्यां वज्रधात्वीश्वरी । ततो हृद्-बीजरश्मिनाकृष्य ज्ञानसत्त्वं प्रवेशयेत्। चक्षुराद्यधिष्ठानं कायवाक्चित्ताधिष्ठानं कृत्वा अभिषेकं प्रार्थयेत् ।

यथाहि जातमात्रेण स्नापिताः सर्व्वतथागताः ।
तथाहं स्नापयिष्यामि बुद्धं दिव्येन वारिणा ॥

ॐ सर्व्वतथागताभिषेकसमयश्रिये हुं फट् स्वाहा । लोचनादिदशदेवतां संस्कार्य्य पूजास्तुतिं कृत्वा मन्त्रमा-जपेत् । तचायं मन्त्रः ॐ ह्रौः स्वाहा ।

॥ खमर्पणसाधनं समाप्तम् ॥

27.

ॐ नमो हालाहलाय ।

पूर्व्ववच्छून्यतापर्य्यन्तं भावयित्वा—

ह्रौःकारबीजनिष्पन्नं हालाहलं महाद्भुतम् ।
त्रिनेत्रं त्रिमुखं चैव जटामकुटमण्डितम् ॥
प्रथमास्यं मितं नीलदक्षिणं वामलोहितम् ।
शशाङ्कार्द्धधरं मूर्द्ध्नि कपालकृतशेखरम् ॥
जटान्तःस्थजिनं सम्यक् सर्व्वाभरणभूषितम् ।
मितारविन्दनिर्भासं शृङ्गाररसमुन्दरम् ॥

AC °धातं ।
A adds तु after बुद्धं ।
A माभ्यषे ।
A शशाङ्कार्द्ध° ।
A यथाभि ।
A has आः ॐ after ॐ ।
A संस्थार्थ्य ।

षड्भुजं सोरवक्त्रं च व्याघ्रचर्म्माम्बरप्रियम् ॥
वरदं दक्षिणे पाणौ द्वितीये चाक्षमालिकम्[1] ।
तृतीये शरनर्त्तनं च वामे चापधरं[2] तथा ।
द्वितीये सितपद्मं च तृतीये स्तनमेव च ॥

वामजानुना मितां स्वाभ[3]देवीं दधानं। वामेन कमलधरां दक्षिणेन भुजेन भगवदालिङ्गनपरां कुसुमशोभितजटाकलापां। दक्षिणपार्श्वे सर्प्पवेष्टितं त्रिशूलं, वामपार्श्वे पद्मस्थकपालं नानासुगन्धिकुसुमैः सम्पूर्णं, रक्तपद्मचन्द्रे लीलाश्लेष[4]स्थितं विभावयेत् भगवन्तम्। ततो मन्त्रं जपेत् ॐ वज्रधर्म्म ह्रीः।

॥ इति हालाहललोकेश्वरसाधनम् ॥

28.

[5]नमो हालाहलाय।

सिद्धं हालाहलं नत्वा जगद्व्याधिविनाशनम्।
महामायामयं तस्य वक्ष्यामि साधनक्रमम् ॥

तत्रादौ तावन्मन्त्री क्वचिन्मनोऽनुकूले पृथिवीप्रदेशे स्थित्वा आद्यनुत्पन्नाः सर्व्वधर्म्माः प्रकृतिपरिनिर्वृता माया-स्वप्नगन्धर्व्वनगरोपमा इत्यधिमोक्षेण आध्यात्मिकमेवमहं-

---

[1] N ॰मालिनं।
[2] A ॰नामितामदेवीं।
[3] A लीलाश्लोषस्थितं।
[4] A श्लेषरन्तथा. C श्लेषरन्तथा।
[5] B begins. Fol. 43.
[6] This *Sādhana* is only to be found in Ab.

ज्ञानमधिष्ठाय दशदिगनन्तपर्य्यन्तलोकधातुव्यवस्थितान् बुद्धबोधिसत्त्वविद्याक्रोधगणानवलम्ब्य ॐ सर्व्ववित् पूर पूर आवर्त्त आवर्त्त हेरित्यनेन विविधपूजामेघान् स्फारयित्वा मनसाभ्यर्च्चाभावेन प्रणम्य धरणीतलविन्यस्तजानुमण्डलो हृदि कृताञ्जलिरेवं ब्रूयात् समन्वाहरन्तु मां बुद्धा भगवन्तो बोधिसत्त्वा महाकृपाविद्यादेव्या महाक्रोधाः सर्व्वलोकधातुव्यवस्थिताः—

आबोधिशरणं यामि बुद्धं धर्म्मं गणोत्तमम्।
ददामि तेभ्य आत्मानं प्रतिगृह्णन्तु नायकाः॥

अनादिमति संसारे संसरता मयास्मिन् वा जन्मनि यत्कायवाक्यमनोभिः पापकं कर्म्म रत्नत्रयाचार्य्योपाध्यायमातापिताभिक्षुभिक्षुणीसामान्यमत्त्वानां मावद्याभ्याख्यानं संवर्त्तनीयं दारिद्र्यं संवर्त्तनीयं व्याधिं संवर्त्तनीयं। अथवा यत् स्वतः कर्म्म कृतं कारितमनुमोदितं च तत्सर्व्वं युष्माकं पुरस्तात् यदा सद्यः कृतं यच्च तत् सर्व्वं अनिमित्तयोगेनानुपलभमानः प्रतिदेशयामि। अनन्तभूयोऽप्येवं करिष्यामि। यच्च प्रथमचित्तोत्पादमुपादाय यावदनुत्तरा सम्यक्सम्बोधिर्यावच्च निरुपाधिशेषो निर्व्वाणधातुरत्यन्तरे सर्व्वबुद्धबोधिसत्त्वविद्याक्रोधगणश्रावकप्रत्येकबुद्धानां अन्येषां च पृथग्जनानां कुशलमूलं तत्सर्व्वमनुमोदयामि। बुद्धप्रेमस्तावदनुमोदनया—

उत्पादयामि परमं बोधिचित्तमनुत्तरम्।
यथा चैयधिका नाथाः सम्बोधौ कृतनिश्चयाः॥

सर्व्वं चैतत् कुशलमूलं परिणामयामि। सम्यक्सम्बोधौ सम्यक्सम्बुद्धवर्त्तितया परिणामनया ततो वज्राञ्जलि-

विभाव्य ॐ सर्व्वतथागतसंश्रिताः सत्त्वानां सर्व्वसिद्धयः संपद्यन्तां सर्व्वतथागताश्च मामधितिष्ठेताम्। ॐ स्वभावशुद्धाः सर्व्वधर्म्माः स्वभावशुद्धोऽहमिति उदीरयन् स्वशिरसि मुञ्चेत्। अत एव स्वभावशुद्धाः सर्व्वधर्म्मा विमोक्षात् विघ्नोपशमो भवति इति नात्र सन्देहः कार्य्यः। प्रोक्तविकल्पप्रबन्धाद् विघ्नान्।

तदनु स्वहृच्चन्द्रे अकारोद्भवहृदयं स्फुरदमितमयूखं विन्यस्य सर्व्वधर्म्मनैरात्म्यं भावयेत्। तेभ्यः स्वहृदयाक्षरेभ्यो रश्मिमेघान संस्फार्य्य तत् सम्पश्येत् स्थिरचलान् सर्व्वभावान्। हालाहलरूपं निष्पाद्य विचिन्तयेत् तथैवं प्रवेश्य मायोपमं सकलं जगदित्यवगच्छन् आत्मानं हालाहलरूपं—

शशाङ्ककोटिसंस्पृष्टं जटामकुटधारिणम्।
सितारविन्दनिर्भासं नीलकण्ठं त्रिनेत्रकम्॥
महापन्नगमुद्धृतरक्तपद्मोपरि स्थितम्।
रत्नाचलगुहान्तःस्थं व्याघ्रचर्म्माम्बरसुवाससम्॥
पर्य्यङ्केन समाधिस्थं स्थितं चतुर्भुजविराजितम्।
कुण्डिकाक्षधरं वीरं अमिताभकृतशेखरम्॥
त्रिशूलमूर्द्धखट्वाङ्गं कुलिकाबद्धयष्टिकम्।
चिन्तयेत् तस्य वामेन दक्षिणेन कपालकम्॥
कुसुमपरिपूर्णं कुलिकं च क्षतफणं भगवन्तमवलोकयन्तम्।

ततः पञ्चाङ्गविन्यासं मुद्राभिर्मन्त्रसंहताभिः कुर्य्यात्। उत्तानभाजो करयोर्निबन्धपार्श्वे चञ्चलतया शिखायाः पर्व्वद्वितीयं खलु संस्पृशेत्। न्यस्येत तालौ करपार्श्वतश्च मूलमुद्रेयम्।

अस्या एव तु मुद्रायास्तर्ज्जन्या विपरीततः।
वेष्टयित्वा च ताभ्यां अवष्टभ्य शिरो भवेत्॥
इमामेव न्यसेत् मूर्द्धि विपरीतप्रयोगतः।
शिखा भवति तस्यैव हालाहलनिषेविनः॥
पृथग् मुष्टिद्वयं बद्ध्वा मध्यमे क्षतशृङ्खले।
तारे भ्रूची च तालौ च पार्श्वतः कवचो भवेत्।
विक्षिप्य तालतामेव कल्पयेदस्त्रकर्म्मभिः॥

तारा तर्ज्जनी, तालोऽङ्गुष्ठः, धाराऽनामिका, मध्या शिखेति पर्य्यायः। अथामां मुद्राणां मन्त्रा भवन्ति। ॐ मः स्वाहा हालाहलहृदयः। ॐ ज्वलिनि स्वाहा शिरः। ॐ प्रज्वालनदीपाय स्वाहा शिखा। ॐ अघ्राय स्वाहा कवचः सर्व्वाङ्गे। अनन्तशक्तिगर्भो फट् अस्त्रं करद्वये। तदेव स्वयमेवाहं आर्य्यहालाहल इत्यहङ्कारवानात्मानं हालाहलं भावयेद् यावत् खेदो न जायते। सति च खेदे स्वहृच्चन्द्रे स्वज्वालहुँकारं विन्यस्य तन्मयूखावभासिनि च पर्य्यन्तेषु मन्त्रेषु—

मन्त्राक्षराणि विन्यस्य कुर्य्यात् जपं समाहितः।
हृदयं वा जपेन्मन्त्रं मालामन्त्रमथापि वा॥
हृन्मन्त्रकोटिजप्ते तु मालाया लक्षजापया।
सर्व्वथा तस्य सिध्यन्ति सम्पत्तिव्याधयोऽखिलाः॥
यावदिच्छं जपं कृत्वा भावनामपि शक्तितः।
क्षमयित्वा ततो नाथं प्रेषयेत् मूलमुद्रया॥

अथ पटविधानेन भगवन्तमाराधयितुमिच्छति तदा पटे पूर्व्वोक्तरूपं लक्षयेत् इत्ययं पटविधिः।

द्वितीयं कथ्यते—

सुवर्णवर्णं यदि वा चिनेचं
भुजद्वयोपेतसुनीलकण्ठम् ।
रत्नाचलस्थं सुसमाहितं तनुं
हलाहलं पिङ्गलजटं लिखेच्च ॥
आक्रान्तपादौ (पुच्छौ) वसुनीलरूपा-
वर्द्धगतोद्दण्डकृतस्वकायौ ।
पार्श्वद्वये नाथमुदीक्षमाणौ
लिखेच्च सर्प्पौ पुरतः कपालम् ॥
पुष्पैर्विचित्रैः परिपूर्णमेतत्
पदद्वयं हस्तद्वयं समन्तात् ।
(प्रमाणमेतत् कथितं जिनेन)
अधस्तु जानुस्थितधूपहस्तो
निवेशनीयः खलु साधकोऽत्र ॥

अतोऽन्यतमपटं प्रसार्य्य प्रातरेवापतितगोमयेन मण्डलकं कृत्वा मूलमुद्रया मन्त्रसहितया आवाहयेदभिनयेन पटाङ्कतौ पश्चाङ्गन्यासं च कुर्य्यात् पूर्व्वोक्तविधिभिरेव मुद्राभिः समन्त्रसहिताभिः । ततो मूलमुद्रयैव पञ्चोपचारेण मानसीभिश्च पूजाभिः सम्पूज्य भगवन्तं सम्बोधयन् मुद्रामुपदर्शयेत् कन्यसृङ्खले(ला) वा सन्धितारापृष्ठे निवेशेतां । शिखाधाराविधिः यौ तर्ज्जन्यौ कृतसूचकौ । ॐ विस्फुलिङ्गाट्टहासकेशरि इति मन्त्रः । ततः पूर्व्वोक्तरूपमात्मानं विचिन्तयेत् । तद्रूपरहितो वा नवस्तृतं पूर्व्ववत् मालामन्त्रं चयोदश वारानुच्चारयेत् । मण्डलकगोमयेन व्याधिं प्रलेपयेत् । षण्मासैः सर्व्वव्याधयः

प्रशाम्यन्ति। अथवा लक्षमेकं जपेत्। सर्व्वाशापरिपूरिणोऽच न कार्य्या विचारणा। तचार्य्यमार्य्यहालाहलहृदयमन्त्रः। नमः सर्व्वबुद्धबोधिसत्त्वेभ्यो महापुरुषवृषभेभ्यो नमः आर्य्यावलोकितेश्वर-महेश्वर-महास्थामप्राप्त-आर्य्यमैचेय-समन्तभद्र-आर्य्यवज्रपाणिप्रभृतिभ्यो महाबोधिसत्त्वप्रभृतिभ्यो नमस्कृत्वा भगवन्नार्य्यावलोकितेश्वर तव—

हृदयमावर्त्तयिष्यामि सर्व्वकामप्रसाधनम्।
अदृष्टं सर्व्वभूतेभ्यो भवमार्गविनाशनम्॥

तद्यथा। हे बोधिसत्त्व प्रियबोधिसत्त्व महाबोधिसत्त्व हे हले आर्य्यावलोकितेश्वर परममैचचित्त हितचित्त महाकारुणिक कुरु कुरु महाविद्येति धुरु धुरु धराधर चलेन्द्राचल नमस्तेऽस्तु ह्रीः सर्व्वसत्त्वाभयप्रद हरिहरिहरिवाहनोद्भव भवाभव भवानघ कुरु कुरु कुरु कुरु घुरु घुरु सुरु सुरु मुरु मुरु चुरु चुरु सुप्रसादितामलविमलमूर्त्ति आर्य्यावलोकितेश्वर महाकारुणिक कृष्णाजिनधर अक्षधर दण्डधर जटामकुटावलम्बितप्रलम्बधर मल मल कल कल चल चल तल तल नल नल फल फल हुलु हुलु हुलुल हलाहल हो बोधिसत्त्व महाबोधिसत्त्व नमस्तेऽस्तु हूँ हूँ हूँ कुरु कुरु हृदयमनुस्मर ममयमनुस्मर जातिमनुस्मर इदं मे कार्य्यं कृतमनोरथं मे परिपूरय स्वाहा। प्रेषणं च सर्व्ववदिति।

इति पुण्यजनः सर्व्वो भूयाद् हालाहल इति।
अहं च मञ्जुघोषः स्यां जगदाशाप्रपूरकः॥
आबोधि मञ्जुघोषस्य पादाम्बुजरजोरसा।
प्रज्ञापालितनाम्नायं कथितः पद्मभृद्विधिः॥

॥ आर्य्यहालाहलसाधनं समाप्तम् ॥

29.

नत्वा हालाहलं भक्त्या सर्व्वाशापरिपूरकं ।
संक्षेपादुच्यते तस्य साधनं करुणात्मनः ॥
आदौ मनोहरे स्थाने सुलिप्ते[1] चन्दनादिना ।
अवतार्य्य पटादिस्थं भगवन्तं पूजयेदिति ॥

पुष्पादिढौकनमन्त्रः ॐ वज्रपुष्पे हुँ, ॐ वज्रधूपे हुँ, ॐ वज्रदीपे हुँ इत्यादिना[2] । ॐ सर्व्वतथागतपूजामेघ-प्रसरसमूहे स्फुर[3] हिमं गगनकं हुँ सर्व्वपूजाढौकनमन्त्रः ।

प्रपूज्य पुरतस्तस्य निषद्य च सुखासने ।
मैत्रीं विभाव्य जगति करुणां च महाकृपः ॥
विन्यस्य हृदये मन्त्रं ह्रीःकारं चन्द्रपृष्ठतः[4] ।
पश्येद्गगनमापूर्णं सम्बुद्धैः मन्त्रतैः[5] स्फुटम् ॥
ह्रीःकारांशुज पूजाभिस्तान् प्रपूज्य गतभ्रमः[6] ।
देशनाद्यं तु पापादेर्विदध्यात् पुण्यवृद्धये ॥
चिरत्नशरणाद्यग्र्यं मन्त्रमेनमुदीरयेत्[7] ।
सर्व्वधर्म्माग्रनैरात्म्य द्योतकं करुणात्मनः[8] ॥

ॐ स्वभावशुद्धाः सर्व्वधर्म्माः स्वभावशुद्धोऽहमिति ।

A सुलिप्त । A ढोघना० ।
ANC इत्यादि । AN omits ॐ ।
A स्फरहिमं, Ab धुरहिमं । A फ्रोकलं ।
AC ०पृष्ठकः । B पश्येद्गगवन्मा० ।
ANC सम्बुद्धैस्तत्सुतैः । ह्रीःकारोशुक्र० ।
C मतभ्रमः, Ab प्रतभ्रमः । A मन्त्रेण मुदी० ।
A धर्म्माग्रनैरात्म्य । A करुणामलः, BC करुणावलः

मन्त्रार्थमामुखीकुर्व्वन् सर्व्वं[1] वस्तु महात्मना ।
ग्राह्यग्राहकनिर्म्मुक्तं भावयेत् ज्ञानमाचकम् ॥
प्रत्यात्मवेद्यं तं दृष्ट्वा ह्रौःकारं शशिसंस्थितम् ।
तज्जमज्जं मितं ध्यायात्[2] ह्रौःकारान्वितपुष्करम् ॥
ततः संस्फार्य्य बुद्बुदौघं जगद् बुद्बुदं विधाय च ।
पुनः प्रवेश्य तत्रैव भृयाद् हालाहलः स्वयम् ॥
त्रिमुखः षड्भुजः शान्तो रत्नाचलगुहाश्रयः ।
रक्तपद्मस्थिते[3] चन्द्रे ललिताक्षेपसंस्थितः ॥
सितपीतमहानीलमूलवामेतराननः ।
व्याघ्रचर्म्माम्बरस्त्र्यक्षः सर्व्वाभरणसुन्दरः ॥
वरदाक्षशरान् सव्ये वामे मत्कामिनीकुचम् ।
सितपद्मं च कोदण्डं बिभ्राणं करपल्लवैः ॥
कपालं वामतो न्यस्य[4] नानापुष्पैः प्रपूरितम् ।
विषभृद्वेष्टितं सव्ये त्रिशूलं च तथाम्बुजे ॥
अमिताभमणिमच्चूड़ः कपालकृतशेखरः ।
शशिखण्डयुतोत्तुङ्गजटामकुटसञ्चयः ॥
विधृतकल्पनाजालः[5] स्फुरद्बुद्बुदरश्मिकः[6] ।
इत्थं हालाहलो भूत्वा स्वहृत्कण्ठशिरःसु च ॥

[1] A सर्व्वखल्व० ।
[2] A आद्यआवकनि०, Ab ग्राह्यग्राहकविनि० ।
Ab ध्यायाः । [3] B ०स्थिते ।
[4] For this *Carana* A has सितपीतमहानील[ल्य]वामेतरेक्षणः(?) ।
[5] Ab विन्यस्य । [6] A कोपाल० ।
[7] A drops विधृतकल्पनाजालः [8] Ab स्फुरन्बुद्बु० ।

हुँ आः ॐ भावयेच्चन्द्रे नीलारुणसितान् क्रमात् ।
हृत्कण्ठयोस्तथा मध्ये ध्येयो ह्रीः चन्द्रसंस्थितः ॥
ततः [1]स्थिरचलान् भावान् भावयंस्तांस्तदाकृतीन् ।
सर्व्वासत्कल्पनिर्म्मुक्तो जपेन्मन्त्रं समाहितः ॥

ॐ हालाहल ह्रीः ।

अन्तर्ज्जल्पमतिस्पष्टं न द्रुतं न विलम्बितम् ।
यथासुखं जपं कृत्वा विसृष्टौ प्रतिपूज्य च ।
संस्तुत्य च दृढ़ीकृत्य समुच्चार्य्य शताक्षरम् ॥

[2]तच्चेदं शताक्षरम्— ॐ वज्रसत्त्व समयमनुपालय, वज्रसत्त्वत्वेनोपतिष्ठ, दृढ़ो मे भव, सुतोष्यो मे भव, सुपोष्यो मे भव, अनुरक्तो मे भव, सर्व्वसिद्धिं मे प्रयच्छ, सर्व्वकर्म्मसु च मे चित्तं श्रेयः कुरु, हुँ हहहह होः भगवन् सर्व्वतथागत-वज्र मा मे मुञ्च, वज्रीभव महासमयसत्त्व आः ।

[3]ॐ कृतो वः सर्व्वसत्त्वार्थः सिद्धिर्दत्ता यथानुगा ।
गच्छध्वं बुद्धविषयं पुनरागमनाय च ॥

अनेन सञ्चोद्य एनं मन्त्रमुच्चारयेत् । ॐ अकारो मुखं सर्व्वधर्म्माणामाद्यमनुत्पन्नत्वात् मुरिति ।

ध्यानात् समुत्थितो योगी दानं दद्यात् स्वशक्तितः[4] ।

[1] Ab has सर्व्व after स्थिरचलान् ।
[2] तच्चेदं शताक्षरं is dropped in ABNC.
[3] The *Visarjana* formula ॐ कृतो वः etc. is not found in A.
[4] AC •माद्यवत्• । [5] A सशक्तितः N सशक्तितः ।

रूपादिकामान् भुञ्जानो निरस्ताशेषकल्पनः ।
[1]प्राप्नोत्यनुत्तरां बोधिमचिरात् साधकोत्तमः ॥
लिखित्वा साधनं प्राप्तं यन्मया [2]शुभमुत्तमम् ।
तेन कृत्स्नं जगद् भूयादचिरेण हालाहलः ॥

॥ हालाहलसाधनं समाप्तमिति [3] ॥

30.

पूर्व्वोक्तविधानेन विश्वपद्मचन्द्रे रक्तह्रीःकारपरिणतं पद्मनर्त्तेश्वरमात्मानं भावयेत् सत्त्वपर्य्यङ्कनिषण्णं द्विभुजैकमुखं रक्तं सकलालङ्कारधरं अमिताभमुकुटं वामपार्श्वे पाण्डरवासिनीसमाश्लिष्टं आलिङ्गनाभिनयस्थितवामभुजेन रक्तपद्मधरं नर्त्तनाभिनयेन स्रुचीमुद्रया विकाशयद्परदक्षिणकरम् । ततः ॐ कायवाक्चित्तवज्रस्वभावात्मकोऽहं इति मन्त्रमुच्चारयेत् । तदन्वष्टसु दिक्षु अष्टदेवीं चिन्तयेत् । तचाष्टदलरक्तपद्म[4] पूर्व्वपत्रे विलोकिनी शुक्ला रक्तपद्मधरा; दक्षिणपत्रे तारा हरिता पलाशपद्मधरा; पश्चिमदले भूरिणी पीता चक्रनीलोत्पलधरा; उत्तरदले भृकुटी शुक्ला पीतपद्मधरा; पूर्व्वकोणदले पद्मवासिनी पीता माश्लिष्ट-

[1] A omits from प्राप्नोत्यनुत्तरां ..... विश्वपद्मचन्द्र including the Colophon and part of the next *Sādhana*.
[2] NC सुखमु० ।
[3] NC हालाहलसाधनं only ।
[4] A सुदेवीं C सुदेवीं
[5] A पद्मपत्रे N पद्मपूर्व्वपत्रे ।
[6] N यत्ने ।

पद्मधरा; दक्षिणकोणदले वज्रपद्मेश्वरी आकाशवर्णा सितपद्मधरा; पश्चिमकोणदले विश्वपद्मा शुक्ला कृष्ण-पद्मधरा; उत्तरकोणदले विश्ववज्रा विश्ववर्णा विश्व-पद्मधरा। सर्व्वा एताः मत्त्वपर्य्यङ्किन्यो द्विभुजैकमुखाः सौम्याः। कर्णिकायां तु भगवानेव। ततो मन्त्रं जपेत्। मन्त्रः ॐ ह्रीः पद्मनर्त्तेश्वर हुँ।

॥ पद्मनर्त्तेश्वरलोकनाथसाधनम् ॥

31.

नमः पद्मनर्त्तेश्वराय[1]

तच्च विश्वपद्मोपरि चन्द्रे रक्तह्रीःकारपरिणतं पद्मनर्त्ते-श्वरं रक्तवर्णमेकमुखं जटामुकुटिनं चिनेचं[2] अष्टभुजं सर्व्वा-लङ्कारभूषितं सर्प्पयज्ञोपवीतमर्द्ध पर्य्यङ्केन ताण्डवं, प्रथम-भुजद्वयेन नृत्याभिनयं द्वितीयदक्षिणभुजेन हृदि विका-शयन्तं स्रुचीमुद्रां वामभुजेन रक्तपद्मं शिरसि धृतं तृतीय-भुजद्वयेन वज्रवह्निदण्डं शूलधरं चतुर्थभुजद्वयेन अक्षस्रुच-कुण्डिकाधरं अष्टदेवीपरिवृतं एवंभूतं पद्मनर्त्तेश्वरलोक-नाथं भावयेत्।

॥ पद्मनर्त्तेश्वरसाधनम् ॥

---

[1] This *Sādhana* is only to be found in Na.

[2] MS has वचविदण्डि।

32.

पूर्व्वोक्तविधानेन शून्यताभावनानन्तरं विश्वपद्मस्थचन्द्रोपरि सितह्रीःकारं विभाव्य तत्परिणामेन पद्मनर्त्तेश्वरात्मायेनार्य्यावलोकितेश्वरभट्टारकमात्मानं विभावयेत्। एकमुखं अष्टादशभुजमर्द्धपर्य्यङ्कितं अमिताभजटाजूटमण्डलं, सर्व्वकरैर्विश्वपद्मधारिणम्, योगिनीवृन्दपरिवृतं, दक्षिणवामपार्श्वस्थिततारासधनभृकुटीहयग्रीवं, दिव्यालङ्कारवस्त्राभरणं। ततो मन्त्रं जपेत्। ॐ ह्रीः पद्मनर्त्तेश्वर हुं। व्याध्याद्युपशमे महानुशंसः।

॥ इति पद्मनर्त्तेश्वरसाधनम् ॥

33.

पूर्व्वोक्तविधानेन शून्यताभावनानन्तरं सितह्रीःकारनिष्पन्नं हरिहरिहरिवाहनोद्भवं भगवन्तमार्य्यावलोकितेश्वरं सर्व्वाङ्गशुक्लं जटामकुटिनं शान्तवेशं, दक्षिणकरेण भगवन्तं तथागतं मस्तिष्णं कुर्व्वन्तं, द्वितीयेन अक्षमालाधारिणं, तृतीयेन दुःकृतकं लोकमुपदेशयन्तं, वामेन दण्डधरं, द्वितीयेन कृष्णाजिनधरं, तृतीयेन कमण्डलुधरं, सिंहगरुड़विषाणस्कन्धसंस्थितमात्मानं ध्यात्वा ॐ ह्रीः हुं इति मन्त्रं जपेत्।

॥ हरिहरिहरिवाहनोद्भवसाधनम् ॥

A पूर्व्वक० । A भाव० । A दक्षिणपार्श्व० ।
A हरिहर० । A वज्रधारिणं । A ०मुपदर्शयन्तं ।
A ०जिनिन० । C स्कन्धग्रत० ।

34.

आदौ तावन्मन्त्री सुखासनासीनो जगदभ्युद्धरणाशयः पापदेशनादिकसप्तविधानुत्तरपूजां कृत्वा यँकार[1]निष्पन्नं वायुमण्डलं धन्वाकारं नीलपताकाङ्कितं, तस्योपरि रेफोद्भवं रक्तवर्णमग्निमण्डलं, त्रिकोणं रक्तरेखाङ्कितं तदुपरि [2]वँकारपरिनिष्पन्नं [3]वारुणमण्डलं वर्त्तुलं शुक्लवर्णं [4]शुक्लपताकाङ्कितं तदुपरि लँकारसम्भवं माहेन्द्रमण्डलं चतुरस्रं पीतवर्णं पीतचिह्नचिकवज्रचतुष्कोणशोभितं तदुपरि सुँकारनिष्पन्नं सप्तरत्नमयं अष्टाङ्गं सुमेरुं तस्योपरि पँकारपरिणतं विश्वदलकमलं तस्योपरि [5]आत्मानं विचिन्त्य ॐ ह्रीः हुँ क्रमेण शिरसि कण्ठे हृदि विन्यस्यात्मानं अनादिकाल[6]संचितकर्म्मावरणविगतं हरिहरिहरिवाहनोद्भवं लोकेश्वरमूर्त्तिं सुवर्णरत्नरश्मिज्वालाकुलं कुमाररूपं विचिन्तयेत् मन्त्री। पश्चात् स्वहृदि पुण्यज्ञानविशुद्धा चन्द्रमण्डलं सूर्य्यमण्डलं च तच्च ह्रीःकारविनिर्गतरश्मिज्वालाभिर्ज्ञानसत्त्वमाकृष्य वक्ष्यमाणरूपं संपूज्य पूर्व्वोक्तपूजाभिः ज्ञानसत्त्वसमयसत्त्वयोरेकीकरणात् भगवन्तं हरिहरिहरिवाहनोद्भवं [7]भगवल्लोकेश्वरं स्थिरचित्तेनात्मानं विभावयेत् षड्भुजं शुक्लवर्णं जटामुकुटिनं शान्तवेशं दक्षिणकरेण सम्बुद्धं साक्षिणं कुर्व्वन्तं द्वितीयेनाक्षमालाधरं तृतीयेन दुर्गतिस्थितलोकं [8]शुभमुपदेशयन्तं;

[1] AN पङ्कार०। [2] AN पङ्कार०। [3] B वरुण।
[4] BN शुक्लघटमध्याङ्कितं। [5] A मात्मानं। [6] A ०कास०
[7] A ०द्भियतं। [8] BN omits भगवल्०।
[9] ०शुभं omitted in A.

वामेन दण्डधरं द्वितीयेन कृष्णाजिनधरं तृतीयेन कमण्डलुधरं भगवन्तं चिन्तयेत्। तच्च विशुद्धिः। वाय्वग्निमण्डलाभ्यां हरिः, वारुणमण्डलेन गरुड़ः, माहेन्द्रमण्डल[1]सुमेरुभ्यां हरिरिति विशुद्धिः सततं भावयन् योगी सर्व्वसत्त्वार्थकरणसमर्थो[2] भवति, सर्व्वजनप्रियो भवति, महाप्राज्ञो भवति, नीरोगो निरुपद्रवश्च धनाढ्यो भवति, वश[3]विषकर्म्मणि महासमर्थो भवति। जपमन्त्रं गुरूपदेशतो ज्ञेयम्।

॥ हरिहरिहरिवाहनोद्भवलोकेश्वरसाधनम् ॥

35.

प्रथमं तावत् मनोऽनुकूले स्थाने योगिपटं[4] प्रकाश्य तस्याग्रतो माहेन्द्रमण्डलमध्ये कुङ्कुमेन[5] चन्द्रमण्डलं कारयेत् ॐ वज्ररेखे हुँ इति मन्त्रेण। तदनु जः हुँ वँ पद्मस्थहोरिति मन्त्रेणावाहनं कृत्वा मण्डलमध्ये त्रैलोक्यवशङ्करलोकेश्वरभट्टारकं पूजयेदनेन मन्त्रेण ॐ त्रैलोक्यवशङ्कराय वज्रपुष्पे हुँ प्रतीच्छ स्वाहा। ततः ॐ मुनि[6]वज्रे मुरिति विमर्ज्य स्वहृदि रक्तआँकारं विचिन्त्य

[1] N सखहभ्यां।
[2] A ०र्थां अर्थो।
[3] A ग्रव०।
[4] A स्वयं।
[5] A स्थाने पठं, B स्थाने पटं।
[6] A कुङ्कमे।
[7] A प्रतिष्ठ।
[8] B मणिवज्रे।

तत्परिणामेन सूर्य्यं तदुपरि रक्तह्रीःकारं तद्रश्मिसमाकृष्टा-मिताभतथागतं संपूज्य पापदेशनादिकं कृत्वा त्रैलोक्यं च[1] वशं विधाय रश्मीन् स्वबीजे प्रवेश्य तत्परिणामेन झटिति लोकेश्वरं सर्व्वाङ्गमहारागरक्तमेकमुखं द्विभुजं चिनेचं जटा-मकुटमण्डितं वज्राङ्कितपाशाङ्कुशहस्तं रक्तपद्मे वज्रपर्य्यङ्क-निषण्णं दिव्याभरणवस्त्रविभूषितमात्मानं विचिन्त्य त्रिभु-वनमेपद्वयस्थपाशवज्रोपरिस्थितनानानिर्म्माणधारिबुद्ध-बोधिसत्त्ववज्रयोगिनीदेवादिभिरभिषेकं विभाव्य शिरस्य-मिताभं ध्यायात्। ततो हृत्सूर्य्ये ह्रीः हुँ याँ इति जाप्य त्र्यक्षरमन्त्रं ध्यात्वा ॐ शून्यताज्ञानवज्रस्वभावात्म-कोऽहं, ॐ वज्रात्मकाः सर्व्वधर्म्मा वज्रात्मकोऽहं इति वज्रात्मकमन्त्रद्वयं पठेत्। एवमभ्यस्यतो धुननकम्पनादि-गुण उत्पद्यते। तदनु ॐ ह्रीः अः हाँ हारीति यक्षेश्वरी स्वाहा इति पिण्डं दद्यात्। ॐ आँ क्रोँ ह्रीँ मकलगण-वीरवीरेश्वरीणां परिकरैः अ अ अवतर अवतर अवतरन्तु दशदिग्लोकपाला इदं बलिं गृह्ण गृह्ण हुँ स्वाहा इति बलिं दत्त्वा देवतायोगेन विहरेदिति।

॥ सरहपादकृतं ओड्डियानक्रमेण त्रैलोक्यवशङ्कर-लोकेश्वरसाधनं समाप्तम् ॥

A त्रैलोक्यवशं। [2] AB वज्रभृ०।
AN यो, Na आः, C यौ। [3] A अक्षर०।
A जपेत्। [4] AC कम्पनादिषु नोत्पद्यते।
ACNNa क्रौं। [5] C वीरेश्वराणां।
ANCNa ओड्डायन०।

36.

नमो लोकनाथाय।

प्रथमं तावन्मन्त्री मनोऽनुकूले स्थाने योगिपटं प्रकाश्य तत्पुरतो माहेन्द्रमण्डलमध्ये कुङ्कुमेन चन्द्रमण्डलं रचयेत् अनेन मन्त्रेण ॐ वज्ररेखे हुँ। जः हुँ वँ पद्मस्थहोः अनेन मन्त्रेणावाहनं कृत्वा मण्डलमध्ये त्रैलोक्यवशङ्कर-लोकेश्वरभट्टारकं पूजयेत् अनेन मन्त्रेण ॐ त्रैलोक्य-वशङ्कराय वज्रपुष्पे हुँ प्रतीच्छ स्वाहा। ॐ सुनिवज्रे मुः विसर्ज्जनमन्त्रोऽयम्। पश्चात् स्वहृदि आँकारं चिन्तयेत्। तं परिणम्य सूर्य्यमण्डलं निष्पद्यते। तस्योपरि शक्तिबीजं बालारुणसमप्रभं द्रष्टव्यम्। एतस्य रश्मिभिरमिताभं पूजयित्वा पापदेशनादिकं कृत्वा पुनः शरीरे प्रविशन्तं एतत् सर्व्वं परिणम्य झटिति पद्मोपरिस्थं वज्रपर्य्यङ्किनं विकसितचिनेचं जटामकुटधारिणं रक्तवर्णं वज्राङ्कितपाश-ङ्कुशहस्तं त्रिभुवनमेपहृये पाशबद्धवज्रोपरि स्थिता नाना-निर्म्माणधारिण्यो वज्रयोगिन्योऽभिषेकं प्रयच्छन्ति, तथा बोधिसत्त्वा नानाभरणयुक्ताः पूजां कुर्व्वन्ति, विद्या-

This *Namaskara* is absent in all MSS except Ab.
मन्त्री is dropped in all MSS except Ab.
B रचेत्, Ab कारयेत्. ⁴ A मुनिः।
Ab मन्त्रः। ⁵ Ab adds तथागतं after अमिताभं।
ABCN ॰पर्य्यङ्कं।
A पाशबद्धे तद्ध तस्यो॰ NC पाशबद्ध तस्यो॰।
AC ॰संयुक्ता, N ॰सक्ता।

धरहरिहरहिरण्यगर्भनानायोगिनीगणा नृत्यवाद्यादिकं-[कुर्व्वन्ति] नानाभूतगणादिनानानरशिरःकपालमाला-वृतं तथा नानाच्छचचामरादिकं पश्येत्। एतादृशे समये अमिताभस्तथागतः शिरसि द्रष्टव्यः। ईदृशमात्मानं विचिन्तयेत्। पश्चान्नाभेरुपरि सूर्य्यमण्डलं रश्मिमयं विचिन्त्य तस्योपरि वामे शक्तिबीजं हृदि क्रोधबीजं आःकारस्वरभूषितं इति भाव्यमन्त्रः। एतत् सर्व्वं ध्यात्वा वज्रात्मकमन्त्रोच्चारणं कृत्वा वज्रात्मकं चिन्तयेत्। ॐ शून्यताज्ञानवज्रस्वभावात्मकोऽहं इति वज्रात्मकमन्त्रः। एतच्चाभ्यासयोगेन धुननकम्पनावेशनं कृत्वा अद्वैतज्ञान-मुत्पद्यते। स योगी द्विरदवत् गर्ज्जति, मदिरामत्त इव पञ्चवर्णं विहरति। यदि पञ्चवर्णं न विहरति तदा तस्य देहे धुननकम्पनावेशनादिकं न तिष्ठति। एवं प्रतीत्यैव पञ्चवर्णं विहर्त्तव्यम् तेन सिद्धिः स्यात्। सिद्धे सति परदेहे धुननकम्पनावेशनं कृत्वा रागद्वेषा-दिकं निषेधयति। यथा सिद्धिरसेन विद्धं ताम्रं कृष्णतां त्यजति तथा शरीरमेवाद्वैतरसेन विद्धं रागद्वेषादिकं त्यजति। ह्रीः हुँ याँ जप्यमन्त्रः। ॐ ह्रीः अः हाँ हारीति यक्षेश्वरी स्वाहा हारीतिमन्त्रः। ॐ आँ क्रोँ

[1] Ab reads इति भट्टारकस्य हृदयमन्त्रः।
[2] ANC ०कम्पनावेशं।
[3] गर्ज्जति present only in Ab.
[4] Ab देहेनाद्वैतज्ञानादिकं। [5] N प्रतीत्य। [6] ANC विहर्त्तव्यं
[7] ABC ॐ ॐ यां, AB क्रोः ॐ यं, N क्रों ॐ याः।
[8] ACN ॐ क्रों यः, Ab ॐ यः, B ॐ क्रोः यः।

ह्रीँ सकलगणवीरवीरेश्वरीणां परिकरैः अ अ अवतर अवतर अवतरन्तु दशदिग्लोकपाला इदं बलिं गृह्ण गृह्ण हुँ स्वाहा बलिमन्त्रः ।

॥ इति सरहपादावतारित ओड्डियानविनिर्गतत्रैलोक्य-वशङ्करलोकेश्वरसाधनं समाप्तम् ॥

37.

नमो लोकेश्वराय

ॐ चिटि चिनटि विलोलि[1] विलोलि[2] अमुकं मधन-परिवारं मे वशमानय स्वाहा। पूर्वसेवायुतं जप्ता पश्चात् साधनमारभेत्। दक्षिणोत्तरपार्श्वे ताराभृकुटी-देवीद्वयसहितं आर्यावलोकितेश्वरभट्टारकं रक्तवर्णं रक्त-माल्याम्बरानुलेपनं पाशाङ्कुशधनुर्बाणधरं चतुर्भुजं स्मृत्वा-रैकरसं रक्तं कुसुमवता[3] शोकतरोरधस्तादवस्थितमात्मानं विचिन्तयेत् त्रिसन्ध्यम्। लवणाहुतीनां अष्टोत्तरशतं जुहुयात्। सप्ताहात् स्त्रियं पुरुषं वा वशमानयति, त्रिसप्ताहान्महापुरुषम्। लवणसहितेन मदनेन पुत्त-

[1] The reading ओड्डि० is found in Ab only.
[2] The second विलोलि is dropped in Ab.
[3] AC पूर्वसेवाग्र०, Ab पूर्वसेवायाः अयुतं, N पूर्वसेवा अयुतं
[4] AC रक्तसुकुमारिताशोक०, N रक्तकु[सु]मारिताशोक० ।
[5] A लवणादूतीनां, C लवणाद्भूतीनां, N लवणाद्भूतीनां ।

लिकां[1] साधयित्वा प्रतिकृतिं चतुरङ्गुलप्रमाणां कृत्वा-निर्धूमे खदिराङ्गारे मन्त्रमुच्चारयन् त्रिसन्ध्यं तापयेत् यस्य नाम्ना स वशे[2] भवति। वज्रोदकभावितलवणं परिजप्याष्टोत्तरशतवारं यस्य प्रदीयते[3] स भक्षितमात्रेण वशे[4] भवति।

॥ रक्तलोकेश्वरसाधनं समाप्तम् ॥

38.

पूर्वोक्तविधानेन तथैव शून्यतानन्तरं रक्तह्रीःकारज-रक्तपद्मं तन्मध्ये रक्तश्राःकारपरिणतमार्य्यावलोकितेश्वरं रक्तवर्णं ([5]जटामकुटधरं) अमिताभगर्भजटामकुटधरं वाम-करगृहीतरक्तपद्मं तत् च दक्षिणकरेण विकाशयन्तं विविधा-लङ्कारवस्त्रविभूषितमात्मानं निष्पाद्य स्वहृदये ह्रीःकारज-रक्तपद्मदलेषु षोड़शस्वरपरिणतरूपान् शुभ्रभ्रमरान् चिन्तयेत्। ततः साध्यहृदयेऽपि पूर्ववत् पद्मं विचिन्त्य स्वहृदिस्थपद्मात् स्ववज्रमार्गेण भ्रमरान् निःस्सार्य्य ॐ भ्रमराः साध्यहृदि पद्मामृतमाकर्षय जः इति मन्त्रेण साध्यवज्रे प्रवेश्य तत्पद्मस्थामृतं भ्रमरैराकृष्य तान् पुन-

[1] AC मदेन पुत्तिकां।
[2] AC सर्व्वशो।
[3] AC यत् प्रदीपते।
[4] ABCN वशगो।
[5] This जटामकुटधरं seems to be redundant.
[6] AC निर्म्माय।

रपि तद्ध्येण निष्कास्य[1] स्ववज्रमार्गेण तत्रैव प्रवेश्य तच्चित्तामृतमधुबिन्दुमुद्गिरतस्तान् पश्येदिति। मन्त्रः ॐ हुँ तावद् भावयेदविच्छेदं यावद् दिनानि सप्त। साध्यं च पादयोः [2]पतन्तं ध्यायादिति।

॥ लोकेश्वरस्य वश्याधिकारविधिः ॥

39.

नमो लोकनाथाय।

प्रथमं तावत् साधकः प्रातरुत्थाय सुखासने सत्त्व-पर्य्यङ्केनोपविश्य हृदये प्रथमस्वरपरिणतचन्द्रमण्डलोपरि पीतह्रीःकारं विभाव्य तन्मरीचिममृतैर्भगवन्तं भाव्य-मानमानीय तस्मादेव बीजात् स्फारितपुष्पधूपादिभिः संपूज्य तस्य पुरतः पापदेशनादिकं विधाय मैत्र्यादिचतु-र्ब्रह्मविहारभावनां च कुर्य्यात्। तदनु सबाह्याभ्यन्तरं वस्तु शून्यस्वभावं विभाव्य ॐ स्वभावशुद्धाः सर्व्वधर्म्माः स्वभावशुद्धोऽहमिति मन्त्रमावर्त्तयेत्। तदनन्तरं नभःप्रदेशे प्रथमस्वरेण चन्द्रमण्डलं तदुपरि पीतह्रीःकारं तेनैव रक्तपद्मं तद्बीजाधिष्ठितं तत् सर्व्वं परिणम्य भगवन्तं पीतवर्णं अर्द्धचन्द्राङ्कितजटामकुटिनं अमिताभोपलक्षित-शिरःप्रदेशं रक्तपद्मोपरिस्थितं कृष्णसारहरिणचर्म्मणि

[1] C निस्तास्य, N निष्काश्य। [2] A पठतं तं।

[3] AC स्थापित०।

वज्रपर्य्यङ्कनं समाधिमुद्रोपरि नानारत्नपरिपूर्णकपाल-धारिणं गणेयचर्म्मकृतयज्ञोपवीतिनं व्याघ्रचर्म्माम्बरधरं[1] निराभरणं नीलकण्ठं नीलगुलिकाविशिष्टकण्ठं पार्श्वद्वये परस्पराभिमम्बद्धपुच्छमणिफणाविशिष्टभगवदवलोकन-परोर्द्ध्वमुखकृष्णसर्पद्वयोपलक्षितमात्मानमेवं विभावयेत्[2]। ततो मन्त्रं जपेत्। तचायं मन्त्रः ॐ स्फुलिङ्गाट्ट-हास क्षः।

॥ इत्यपरिमितानुशंसं नीलकण्ठार्य्यावलोकितेश्वर-साधनं समाप्तम् ॥

40.

पूर्व्वोक्तविधानेन शून्यताभावनानन्तरमाकाशे रेफो-द्भवसूर्य्यस्थहुँकारजविश्ववज्रपरिणतं वज्रप्राकारं वज्रपञ्जरं च विभाव्य तन्मध्ये घोरश्मशानं तस्य च मध्ये रक्ताष्टदल-कमलं तन्मध्ये च नीलह्रीःकारसम्भवं भगवन्तमार्य्याव-लोकितेश्वरं कृष्णवर्णं प्रत्यालीढस्थं सूर्य्यमण्डलस्थितं पञ्चमुखं त्रिनेत्रं द्वादशभुजं मितरक्तदक्षिणमुखद्वयं तथा-पीतहरितवाममुखद्वयं दक्षिणभुजैः डमरुखड्गाङ्कुश-पाशवज्रशरधरं वामभुजैस्तर्ज्जनीकपालरक्तकमलमणि-चक्रचापधरं दंष्ट्राकरालसकलवदनं षण्मुद्रोपेतं सार्द्र-

[1] A ०मुरां
[2] AC ०चर्म्माम्बरं।
[3] B ०वीतं।
[4] A ०परार्द्ध०।

मुण्डमालालङ्कृतशरीरं नग्नं सर्व्वाङ्गसुन्दरमात्मानं झटिति प्रत्याकलय्य हृच्चन्द्रे ह्रीःकारमध्यवर्त्तौ ॐ आः हुँ मुनिवरवक्त्रे ह्रीँ हुँ जः इति मन्त्रमक्षस्रुवाकारं जपेत्। पञ्चानन्तर्य्यकारिणोऽपि लक्षजापात् सिध्यति।

॥ मायाजालक्रमार्य्यावलोकितेश्वरसाधनम् ॥

41.

नम आर्य्यावलोकितेश्वराय बोधिसत्त्वाय महासत्त्वाय महाकारुणिकाय तद्यथा ॐ चल चल चिलि चिलि चुलु चुलु कुलु कुलु मुलु मुलु हुं हुं हुं हुं फट् फट् फट् फट् पद्महस्ते स्वाहा। दिने दिने पञ्च वारान् चिमन्ध्यमुच्चारयेत्। गर्दभोऽपि ग्रन्थशतत्रयं गृह्णाति। पद्महस्ता धारणीयम्। नम आर्य्यावलोकितेश्वराय बोधिसत्त्वाय महासत्त्वाय महाकारुणिकाय तद्यथा ॐ धरणीधरे[1] धराधरे भद्रे सुभद्रे स्वाहा। सोमग्रहे सूर्य्यग्रहे वा पञ्चगव्येन प्रक्षाल्य अष्टोत्तरशतमापान् मुखे प्रक्षिप्य तावज्जपेत् यावन्न मुक्तो भवति। लोकनाथस्य पटप्रतिमाया अग्रतो भूत्वा[2] घृतेन प्रदीपं प्रज्वाल्य चन्दनेन अपतितगोमयेन वा मण्डलकं कृत्वा शुचिमाचार[3]मुत्तरसाधकं द्वारि स्थापयित्वा स्वयं

A मुण्डा॰ N माङ्गमुण्ड॰
A हल हल, C ऊलु ऊलु।
[1] AC °ग्रतवारान्।
[2] AC प्रदीपोज्वाल्य।
A ऊं जः।
[1] धराधरे omitted in C.
[2] AC भूतो।
[3] A शुचिमा॰ N शुचिसा॰।

चन्द्रसूर्य्यमपश्यन् पूर्व्वसेवायुतं जप्त्वा ब्रह्मचर्य्येण साधयेत्। अश्रुतान्यपि शास्त्राणि वेत्ति तत्क्षणात्।

श्रुतानि न क्षयं यान्ति धारणीबलभावतः।
यस्य मूर्द्ध्नि प्रदीयन्ते चूर्णीकृत्य च पादयोः॥
स सर्व्वावशतां याति यावच्चन्द्रदिवाकरौ।
रोगास्तस्य न जायन्ते डाकिनीग्रहतस्कराः॥
लेपनात् सर्व्वव्याधीनां शान्तिर्भवति नित्यशः।
ह्रीःकारबीजसम्भूतं लोकनाथं विभाव्य च॥
द्विभुजं वरदं सव्ये वामे पद्मधरं मितम्।
जटान्तःस्थामिताभं च विश्वाब्जचन्द्रसंस्थितम्।
वज्रपर्य्यङ्किनं नाथं भावयेद् विधिवद् बुधः॥

॥ सोपचारमाषमुखा धारणी समाप्ता॥

42.

ॐ पूर्व्वोक्तविधानेन शून्यताभावनानन्तरं शुक्लह्रीःकारोद्भवं सुगतिसन्दर्शनलोकेश्वरभट्टारकं शुक्लवर्णं षड्भुजं वरदाभयाक्षमालाधरं दक्षिणे वामे पद्मकुण्डीचिदण्डी[धरं] च रत्नाभरणभूषितं व्रतसूचधारिणं जटामुकुटं पद्मोपरि चन्द्रमण्डलस्थितं सौम्यरूपं भावयेत्। तस्य जापमन्त्रोऽयं ॐ ह्रीः स्वाहा।

॥ इति सुगतिसन्दर्शनलोकेश्वरसाधनम्॥

---

[1] A सर्व्वावग्र०, C सर्व्व। [2] C माषद०।
[3] This *Sādhana* and the following are found only in N.

43.

इति शून्यताभावनानन्तरं श्वेतह्रीःकारोद्भवं जटामुकुटिनं षड्भुजं प्रथमभुजद्वयेन वरदौ द्वितीयभुजद्वयेन रत्नपुस्तकौ तृतीयभुजद्वयेन अक्षमालाचिदण्डिकं सर्व्वालङ्कारभूषितं व्रत(अक्ष)सूत्रधारिणं सौम्यमूर्त्तिं पद्मोपरि चन्द्रमण्डले स्थितं श्वेतवर्णं विभावयेत् । मन्त्रश्च तथैव ।

॥ प्रेतसन्तर्पितलोकेश्वरसाधनम् ॥

44.

नमः स्त्रियचक्राय ।

श्रीमद्गीर्गरिमा[1] निरस्तसकलभ्रान्तिप्रतानोज्ज्वलं
प्रोद्यन्नीरगभस्तिबिम्बविमलं बुद्धं च बालाकृतिम् ।
विद्याणं करवालमुन्नतरुचिं प्रज्ञां च नत्वादरात्
आत्मानुस्मरणाय लिख्यत इदं तच्चक्ररत्नं मया ॥

'दिक्षनन्तान् सुसञ्चिन्त्य सर्व्वज्ञान्' ज्ञानसागरान् ।
सत्त्वस्तानेक[2]सत्त्वौघपरित्राणसमुद्यतान् ॥

[1] A श्रीमन्निन्तरि०, C श्रीमद्गौरिमा० ।
[2] ACNAb दृढ्च ।
[3] Ab ०ग्रप्रलि० ।
[4] AC दिक्षनन्ता, Ab दिक्षनन्ता ।
[5] ACNAb सर्व्वज्ञान० ।
[6] A ०सत्त्वोद्य०, C ०सत्त्वोघ०, N ०सत्त्वोत्य० ।

तेभ्यो नानाविधां पूजां चेत[1]श्चिन्तामणिश्रुताम् ।
कृत्वा लोकं परित्रातुं[2] प्रयच्छेदात्मविग्रहम् ॥

ततः शुभाभिवृद्धये कुर्य्यादिदं मन्त्री—

सर्व्वाणि पापानि दिशामि भीतः
प्रीत्यानुमोदे जगतः शुभानि ।
रत्नत्रयं वै शरणं प्रयामि
संबुद्धबोधौ विदधामि चेतः[3] ॥

पश्चात् पुनरिदमारभेत—

ग्राह्यग्राहकहानितो जगदिदं स्वप्नेन्द्रजालोपमं
शून्यं च प्रकृतिप्रभास्वरतया व्योमोपमामाश्रितम् ।
आत्मानं च मनोविलासकलितं निश्चित्य संक्षेपतो
मुःकारं पुनरंशुजालजटिलं तत्सम्भवं भावयेत्[4] ॥

ततः परावृत्तमखण्ड[5]मण्डलं
हिमार्चिषः कुङ्कुमपङ्कपिञ्जरम् ।
स्वरोज्ज्वलन्मालिकया समाकुलं
विचिन्तयेद् दीधितिदीप्तदिङ्मुखम् ॥

ततः पुनर्मुःकृतिबीजसम्भवं
विभावयेद् रागमरीचिमण्डलम्[6] ।
कखादिवर्णैरखिलं[7] समावृतं
तदूर्ध्वमुद्दीधितिकुङ्कुमारुणम् ॥

---

[1] Ab चेतश्चि० ।
ACAb मे ।
[2] ACN परित्राणं ।
[3] AC दधामि चेतः, Ab विदधामि चित्तं ।
[4] AC ०बोधिं ।
[5] A ०मखण्डलं ।
[6] Ab समावृतं ।
[7] ANCAb ०रखिलै·

तस्मिंश्च मुःकारमुदीक्ष्य मन्त्री
तत्सम्भवं भास्वरपचरम्यम् ।
इन्दीवरं विस्फुरदंशुजालं
विचिन्तयेन्मुःकृतिबीजमध्यम् ॥

तत्सम्भूतमुदंशुबुद्बुदविसरैरापूरयन्तं जगत्
चन्द्रस्थं भ्रमरान्धभास्वरतरैरुद्भास्वरं चीरकैः ।
धुन्वन्तं निबिड़ान्धकारपटलं रक्तांशुजालैरलं
सर्व्वाकारवरप्रदाननिपुणं श्रीमन्निरामीश्वरम् ॥

लालित्यशृङ्गाररसाभिरामं
व्याजृम्भमाणाम्बुरुहास्यलक्ष्मीम् ।
वीरं कुमाराभरणं दधानं
ध्यायात् पदं तस्य ममीहमानः ॥

एवं विचिन्त्य वागीशं मुःकारं भावयेद् हृदि ।
ज्वलन्तं रक्तवर्णाभं निर्गच्छद्दीप्तिमण्डलम् ॥

तस्मात् सञ्जातमष्टारचक्रं हार्हतमोपदृम् ।
पूरयेद् रश्मिभिर्विश्वं पश्येत् ज्ञानमयं प्रभुम् ॥

निर्म्मितं बालतिग्मार्च्ची रोचिषां सञ्चयैरिव ।
आकीर्णमक्षरैः रक्तै रक्तपुष्पोत्करैरिव ॥

---

[1] A ०पुट० ।
A विस्फुरणा० ।
AC ०भासुर०
[2] ०द्भासुर० ।
[3] A निविड़ार्ध०
[4] ANb श्रीमन्नि० ।
A रालिभ्य०, N रालित्य० ।
[5] A व्याजृम्भ०. N व्यज्यन्त० C व्यज्जम्भ० ।
[6] B बीजं ।
[7] A ०श्मिभिश्च ।
[8] A तिग्मार्चावाविषां, N तिग्मार्चांरोचिषां, Ab तिग्मार्चीरोचिषां ।
[9] B आकीर्णं चाक्ष० ।

तचैवं तावदक्षराणि चिन्तयेत् चक्रस्यारेषु पूर्व्वदक्षिण-पश्चिमोत्तरेषु यथाक्रमं अरपचनान्[2] नाभौ नकारं आग्नेयनैर्ऋत्यवायव्यऐशानेषु च पूर्व्ववन्निष्प्रपञ्चान् तथै-वान्तरान्तरे अकारादीन् स्वरौघान् बहिस्तु ककारा-दीनि व्यञ्जनानि इति निश्चलं निश्चित्य पश्चाच्चक्रस्य वर्णसंहतेश्च रश्मिसमूहं हार्दं तमो[3]मण्डलमपनयन्तं स्वशरीररोमकूपविवरेभ्यो निःसृत्य दशदिग्लोकधातुव्यव-स्थिततथागत[4]हृदयज्ञानामृतैः सह[5] समरसीभूय तेभ्यो निर्गत्य तैरेव रोम[6]विवरैः प्रविश्य स्वशरीरमवभासयन्तं चिरं ध्यायात्। स्थिरचित्तस्य पश्चात् स्फुरणसंहरण-न्यायेन तावद् भावयेत् यावत् प्रत्यक्षमाभाति।

मञ्जुश्रियो [1]तैत[7]दशां दधानैः
[8]सहैव वर्णैः [9]परिरोचमानैः।
चक्रे स्फुटाभत्वमुपागतेऽस्मिन्
अहर्निशं ध्यानकृताभियोगात्॥

अदृष्टपूर्व्वैरपि वाङ्मयेषु
कलाकलापेष्वखिलेषु तस्य।
[11]मतिर्यथेष्टं मणिदीप[12]दीप्ता
प्रवर्त्तते हार्दतमो नुदन्ती॥

[1] AC तेनैव०।
[2] AC आरपचान, Ab अरपचन्, N अरपचान्
[3] Ab तमोह०।
[4] AC ०नवकं।
[5] ०तथागत० dropped in Ab.
[6] A सहस्र सरसी०।
[7] A तैनेत्रवाम०।
[8] AC ०दशन्दधाने, N दशान्दधाने
[9] A सह्रं ववर्णैः।
[10] AN वरिरोच०।
[11] Ab यति०।
[12] AC ०दीप्त०।

इदं हि चक्रं हितमोहमानैः
कुतूहलेनापि च पक्षमेकम् ।
परीक्ष्यमाणं सुगतस्वरूपं
प्रबोधयिष्यत्यचिराद् भवेषु ॥
यदीह किमपि पुण्यं चक्रविन्यासजातं
अमनसिजजनानां दीप्यतां तेन चक्रम् ।
नवतरणिरिवास्तमोहसान्द्रान्धकारं
व्रजतु च जनतेयं वाग्विभोः श्रीविलासम् ॥

॥ स्थिरचक्रसाधनं समाप्तमिति[1] ॥

45.

स्थिरचक्रमिदं श्रीमन्मञ्जुवज्रस्य तायिनः ।
तं नत्वा बालबोधाय लिख्यते विशदैः पदैः ॥

सुखासनोपविष्टो योगी गुरुबुद्धबोधिसत्त्वानाकाश-स्थितान् विचिन्त्य तेभ्यो मनोमयीं नानाविधां पूजां विधाय पापदेशनादिकं कुर्य्यात् । ततो विश्वं चित्तमात्रं

[1] N ०द्भवत्स् [2] N मम मनसि ।
A दीप्यतां
[3] ANC ०मिवास्यां, Ab ०मिवास्यं, B ०विनाश्यन् ।
[4] AC व्रजतु वचन० ।
[5] After this Colophon B gives the date in the following words सं २८५ पौष्यमासेति, *i.e.* in the month of Pauṣa in the year 285 (N S.) which corresponds to A.D. 1165 and not 1167 as Bendall puts it.
[6] A ०सत्त्वानां । [7] A ०मात्रो ।

ग्राह्यग्राहकविवर्जितं स्वप्नवत् प्रतिबिम्बवदात्मानं निश्चित्य कुङ्कुमारुणं मुःकारजातं स्फुरदकारादिस्वररश्मिरक्तं चक्रं पश्येत्। तस्योपरि मुःकारजं भास्वत्कारादिप्रभारक्तं शशाङ्कमण्डलं भावयेत्। तस्योपरि मुःकारजं स्फुरदमलमिन्दीवरं मुःकाराधिष्ठितकिञ्जल्कं विचिन्त्य तत्परिणतं कुङ्कुमाभं पञ्चवीरं कुमाराभरणं शृङ्गारैकरसं खड्गपुस्तकधरं वागीश्वरमात्मानं चन्द्रस्थं ध्यायात्। तस्य हृदये मुःकारजं स्थिरमष्टारचक्रं रश्मिमयं ज्वलदकारादिमालिकाकलितं बहिः स्फुरत्ककारादिमालिकोपवीतम्। तस्य च नाभौ अकारं पूर्व्वारे रेफं दक्षिणारे पकारं पश्चिमारे चकारं उत्तरारे नकारं आग्नेयादिकोणेषु च निष्पन्नपञ्चाक्षरान् कुङ्कुमाभान् विचिन्त्य तच्चक्ररश्मिसमूहं अन्तःशरीरमवभास्य प्रतिरोमकूपविवरैर्निःसृत्य दशदिग्लोकधातुमवभास्य पुनस्तैरेव रोमकूपविवरैः प्रविश्यान्तःशरीरमवभासयन्तं चिरं विचिन्तयेत्। ॐ अरपचन मुः इति जपमन्त्रः।

साधनं स्थिरचक्रस्य कृत्वा पुण्यमुपार्जितम्।
तेन भूयात् जगत् सर्व्वं मञ्जुवज्रसमप्रभम्॥

॥ मुक्तकेन स्थिरचक्रसाधनम्॥

---

1 ANC ०वर्ज्जितं।
2 A ०कार, BN कारज, C ०कारज०।
3 A ०रश्मिचन्द्रं, N ०रश्मिचक्रं
4 A मुकारं, C ०मःकारजं।
5 Ab तत्सर्व्व०।
6 B reads ०चीराभरणशृङ्गा०।
7 B ०कलिकं।
8 B मालिकालिको०।
9 A ०कुरान्।
10 AC मन्तःशरीरं।
11 ACN यत्पुण्यमर्ज्जितं।

46.

नमः श्रीवादिराजाय मञ्जघोषाय ।

प्रथमं तावत् मुखप्रक्षालनादिकं कृत्वा मृदुसुखासनोपविष्टः स्वहृदि पँकारजपद्मस्योपरि अकारेण चन्द्रमण्डलं तस्योपरि मँकाररश्मिनाकृष्याकनिष्ठभुवनवर्त्ति अनादिसंसिद्धमञ्जुश्रीकुमारं पुरतो विभाव्य ततो बाह्यपूजां पुष्पधूपादिकां कृत्वा अभिवन्द्य च पश्चात् पापदेशनां पुण्यानुमोदनां पुण्यपरिणामनां त्रिशरणगमनं बोधिचित्तोत्पादं अध्येषणां आत्मभावनिर्य्यातनां कृत्वा चतुर्ब्रह्मविहारान् भावयेत् । पुनः सकलवस्तुतत्त्वसारसंग्राहकभूतां शून्यतां विचिन्तयेत् ॐ शून्यताज्ञानवज्रस्वभावात्मकोऽहमिति । पुनः प्रणिधानमनुस्मृत्य प्रतिभासमात्रं स्वकायं व्यवलोक्य स्वहृदि पद्मचन्द्रस्योपरि मँकारबीजरश्मिना सर्व्वतथागतप्रवेशेनात्मानं मञ्जुश्रीरूपं विभावयेत् । पीतवर्णं व्याख्यानमुद्राधरं रत्नाभरणं रत्नमुकुटिनं वामेनोत्पलं सिंहासनस्थं अक्षोभ्याक्रान्तमौलिनं चन्द्रासनं चन्द्रप्रभं भावयेदात्मानम् । ततो दक्षिणपार्श्वे सुँकारबीजसम्भवं सुधनकुमारं नानारत्नाभरणोज्ज्वलं रत्नमुकुटिनं सर्व्वधर्म्मैकपुस्तककक्षानिक्षिप्तं संपुटाञ्जलिपूर्व्वकं तिष्ठेत् । वामपार्श्वे यमारिः कृष्णवर्णहुँकारबीजोद्भवः विकृताननः मुद्गरहस्तः पिङ्गोर्द्ध्वकेशः

[1] A सुखसुखा० । [2] शून्यतां is dropped in AC.
[3] N adds कुङ्कुमाभासं त्रिरं विचिन्तयेत् after विचिन्तयेत् ।
[4] A चक्रासनं । [5] A संरक्त० ।

नागाभरणभूषितः। ततो दक्षिणोत्तरपार्श्वे चन्द्रप्रभ-सूर्य्यप्रभौ पूर्व्वादिदिग्भागे वैरोचनरत्नसम्भवामिताभा-मोघसिद्धयः, आग्नेयादिकोणेषु लोचना-मामकी-पाण्डरा-तारास्चेति। ततो ज्ञानसत्त्वप्रवेशेन चक्षुराद्यधिष्ठानं कायवाक्चित्ताधिष्ठानाभिषेकपूजास्तुतिं च कृत्वा शिरसि अक्षोभ्यमुद्रणं [1]पश्चाद् ध्यानवान्मन्त्रमाजपेत्। तचायं मन्त्रः ॐ धर्म्मधातुवागीश्वर मुः स्वाहा।

॥ मञ्जुश्रीसाधनम् ॥

47.

मत्सौख्यं परमं समस्तजगतामिच्छोरनिच्छोः सुखं
स्वीयं स्वल्पमपि स्वभावमहतः सम्यग् गुरोराज्ञया।
प्रज्ञापङ्कजिनीविकाशकरणे दक्षस्य[2] संलिख्यते
मन्दस्वल्पधिया मया भगवतो मञ्जुश्रियः साधनम्॥

श्रद्धां शुभस्य जननीं समुपाश्रितेन[3]
त्यक्ता च येन सकलाकुशलक्रियापि।
तेनैव शुद्धमनसा गुरुतो निशम्य
ध्यानादिकं भगवतः सततं विधेयम्॥

आदौ मनोभिरुचिते निचिते[4] सुगन्धि-
पुष्पादिभिर्ब्बहुविधैर्विजनप्रदेशे।

[1] A पश्चाद्ध्या०।
[2] AC दक्षिणस्य।
[3] AC निचिते।
[4] A इच्छोः सुखं।
[5] A ०पाश्रितेन।

घोरध्वनिप्रमुखकण्टकवर्ज्जिते च
निर्वर्त्त्य[1] कृत्यमपरं च सुखं निषद्य ॥
यत्नतश्चञ्चलं चित्तमेकाग्रीकृत्य निर्भरम्।
परार्थमाशये कृत्वा भावयेत् तदनन्तरम् ॥
सत्त्वेषेक[2]तनुजतोषसमतासंलक्षितां मिचतां
दुःखादुःखनिदानतोऽपि जगतामभ्युद्धिधीर्षां[3] दयाम्।
चित्त[4]प्रीतिविशेषलक्षणवतीं सम्मोदिकामन्ततो-
ऽसद्यासङ्गनिवृत्तरूपसहितां ध्यायादुपेक्षां बुधः ॥
तदनु मनसि कृत्वा यावदिच्छाप्रकीर्णं
विमलरुचिहिमार्श्विर्मण्डलं शुक्लवर्णम्।
तदुपरि सुकुमारं निर्म्मलस्वर्ण[5]वर्णं
कमल[6]ममलपत्रं भावयेदष्टपत्रम् ॥
चन्द्राम्भोरुहयोरुदंशुविसरव्यालोलयोरुत्तमा-
मूर्द्धं वर्द्धनशीलरश्मिकुहरं स्वर्णाक्षतिं मँक्षतिम्।
पूर्व्वाभ्यां पिहितं हिताय जगतां मन्त्री चिरं भावयेत्
अत्यन्तोत्तम[7]मञ्जुवज्रपदवीमिच्छन् मनुष्योत्तमः ॥
पश्चाज्जातिविपत्तिबाधकजराजाद्यादि[8] दुःखाकुलं
चन्द्राम्भोरुहयुग्ममँक्षतिभवैश्छन्नौ[9]क्षतं रश्मिभिः।
विश्वं वीक्ष्य [10]निरीक्ष्य चोत्तमसुखे सर्व्वैः समग्नीकृतं
बुद्धैस्तुल्यमतोऽपि पूर्णमनसं स्वात्मानमालोकयेत् ॥

[1] A निहत्य, C निर्घन्य।
[2] A सत्त्वेवक०।
[3] A अभ्युद्धिधाया०, C अभ्युद्धिधार्षा०।
[4] A विसु०।
[5] AC निर्म्मेल खर्ण।
[6] AC कमलपत्रं।
[7] A अत्यन्तोकम०।
[8] AC जापादि०।
[9] C ०न्नमौ०।
[10] निरीक्ष्य dropped in A.

पश्चाद् दिक्षु दशस्ववस्थिततनूनानीय तै रश्मिभिः
सर्व्वानेव गुरूंस्तथैव सुगतान् श्रीबोधिसत्त्वानपि ।
कृत्वा तान् पुरतो मनोरथमयं निष्पाद्य पूजाविधिं
नानापुष्पसुगन्धिधूपविधाकारेण संपूजयेत् ॥
पापादेरपि देशनादिपुरतस्तेषां विदध्यात् ततः
तानेवांशुभिरेकतामुपगतान रोमावलीनां बिलैः ।
पुञ्जाकारतया प्रविश्य हृदये दृष्ट्वा ततस्तद्भवं
ध्यायन् मोहमहाद्रिपाटन पटुं श्रीमञ्जुवज्रं विभुम् ॥
स्वच्छं षोड़शवत्सराकृतिधरं शार्दूलपृष्ठस्थितं
व्याख्याव्याकुलपाणिपद्मयुगलं वामार्द्धपर्य्यङ्किनम् ।
दीर्घं नापि न चापि खर्व्वमसमं सौन्दर्य्यराश्याश्रयं
रत्नस्वर्णमणिप्रकारविविधालङ्कारमालाकुलम् ॥
नासत्यं नाप्यसत्यं मुकुरतलमिव स्पष्टबिम्बायमानं
ध्यात्वा वीरं कुमारं सकलजन परित्राणदं वादिनाथम् ।
पश्चादात्मानमेव व्यपगतकलुषं मञ्जुवज्रस्य मूर्त्त्या
ध्यायेद् दीर्घं न यावद् भवति भगवता तुल्यदेहो मनीषी ।
ताम्तं रान्तं तथा सान्तं व्यञ्जनक्रमसंहितम् ।
ध्यानात् खिन्नो जपेन्मन्त्रं ओकारं सानुनासिकम् ॥
अपरमिह विशेषं सद्गुरोरेव वाचा
विमलममलबुद्धेः प्रग्रहीष्यन्ति सन्तः ।

[1] A सुगन्धिभिर्वि० ।
[2] AC लोकाग्निनैः ।
[3] AC चिरं ।
[4] AC देवादिनाथं ।
[5] A सकारं, C सेकारं, N मैकारं ।
[6] A स्थाने ।
[7] A ०पुटं ।
[8] AC ०परित्राणं ।
[9] AN मान्तं ।
[10] C वाचो ।

प्रवरगुरुकृताज्ञो ध्यानमन्त्रक्रियायाः
नहि सकलविशेषख्यापनेऽहं समर्थः ॥
मञ्जुश्रियो यदि कुतूहलचेतसापि
संराधनं भगवतः सततं विधत्ते ।
आराध्य सद्गुरुपदं मतिमांस्तथापि
जाड्यान्धकारनिकरं नियतं भिनत्ति[1] ॥

श्रीमन्मञ्जुकुमारसाधनमिदं सम्यग् गुरोराज्ञया
कृत्वा मन्दधिया मया यदमितं[2] पुण्यं ममासादितम् ।
तेनायासमपास्य मत्वरमयं श्रीमञ्जुवज्रोपमः
श्रीचिन्तामणिकल्पवृक्षमहशोऽप्यास्तां ममस्तो[3] जनः ॥

॥ श्रीमद्वादिराट्साधनं समाप्तम् ।
। कृतिरियं पण्डितश्रीचिन्तामणिदत्तस्येति ॥

48.

नमो मञ्जुनाथाय

सत्कुङ्कुमारुणकुमारकरुपलक्ष्मीं
संबुद्धरश्मि निहतामितमोहजालाम् ।
पारीन्द्र[4]बद्धललितासनमन्त्रधर्म्म-
व्याख्याकरं नमत कामदवादिराजम् ॥
प्रथमं प्रातरुत्थाय पँ विश्वपद्मे तु[5] हृदि ।
अं-चन्द्रमण्डलस्योर्द्ध्वं ह्रौँकारं कुङ्कुमारुणम् ॥

[1] A छिनत्ति ।
[2] A °मिहित० ।
[3] A गु, N त ।
[4] AC पदमितं ।
[5] A यागेन्द्र, C धारेन्द्र ।

दृष्ट्वा वदनशौचा[1]दिं कृत्वा ध्यानालये शुचौ ।
सुखासनं च संविश्य मन्त्रं बुद्धगुणाकरम् ॥
मैत्रीं सत्पुरुषसम्प्रीतिसहस्रगुणितां जने ।
दुःखहेतोर्दुःखाच्च कृपामुद्वर्त्तुं[2] कामनाम् ॥
नित्यं सद्गुणसंयोजनेच्छां प्रमुदितां तथा ।
निजकार्य्यमनालोच्योपेक्षामन्यार्थकारिताम् ॥
ध्यात्वा [3]मन्त्री स्फुरद्रश्मिं व्यूहेनानीय तान् जिनान् ।
तैर्नभः पूरितं दृष्ट्वा कृत्वा पूजां मनोमयीम् ॥
अभ्यङ्गोद्वर्त्तनस्ना[4]ननानालङ्कारकारिणः ।
स्फुरत्पूजौघसम्भेघान् [5]विश्वक् संस्फार्य्य देवताम् ॥
प्रणम्य निर्म्मितैः कायैरसंख्येयैः पृथक् पृथक् ।
रागविद्वेषसम्मोहैस्त्रिविधं कायमानसम् ॥
संवेगाद् देशयेत् पापं कृतकारितमोदितम् ।
आयत्यां संवरं सत्त्वैः सार्द्धं कुर्य्यात् पुनः पुनः ॥
संबुद्धमन्त्रघोषाद्यैर्हानादिजनितं शुभम् ।
संमोद्याध्येष्य संयाच्य चिरं सद्धर्म्मदेशनाम् ॥
चिरत्नशरणं गत्वा बोधिचित्तं सन्मार्गकम् ।
आस्थित्य ॐ शून्यताज्ञान[8]वज्रात्मकोऽहम् ॥

---

[1] N ०दिकं, AC दि ।
[2] A ०मुर्द्धन्त, N ०मुद्धर्त्तुं ।
[3] मन्त्री dropped in AC.
[4] A reads ०पनानां यतान् जातानु ।
[5] A नभानालङ्कार० ।
[6] A विश्वं संस्थाप्य देवतीं, C विश्वकास्फार्य्य देवतीं, N विश्वक् संस्फार्य्य देवतीं ।
[7] A ०शून्यतात्मान ।
[8] A सन्मार्ग्यकं ।
[9] AC वज्रस्वभावात्मको० ।

ततो विश्वपद्मस्थं मँकारेन्दूर्द्ध्वसंस्थितम् ।
स्फुरत्पिण्डाक्षरं दृष्ट्वा कृत्वा मञ्जुवरं जगत् ॥
प्रविश्याकृष्य सम्मन्त्री वादिराजं विभावयेत् ।
काश्मीरारुणसत्कायमायानिर्ज्जितमन्मथम् ॥
सिंहसिंहासनाक्रान्तं निर्भ्रान्तं ललितासनम् ।
वामप्रकोष्ठपूर्व्वेषु नीलेन्दीवरधारिणम् ॥
संबुद्धगुणसन्दोहं रत्नालङ्कारसोज्ज्वलम् ।
निर्य्यद्रश्मिस्फुरद्बुद्धसन्दोहालोकमालिनम् ॥
धर्म्मचक्रमहामुद्रानिबद्धकरपङ्कजम् ।
तद्वदिन्दीवरे तादृक् विश्वं कृत्मन्त्ररश्मिना ॥
समानीय परं नाथं कूटागारादिभिः समम् ।
महशत्वं समापाद्य संश्राव्य समयं त्रिधा ।
समाकृष्य प्रवेश्याथ बुद्धं सम्यक् वशं नयेत् ॥

ॐ वज्रसत्त्व समयमनुपालय। समयस्त्वं समयोऽहं समयस्त्वमहं जः हुँ वँ होः। ॐ कायाधिष्ठानं आः वागधिष्ठानं हुँ चित्ताधिष्ठानं। उत्पलमुद्रया पिण्डाक्षरेण ज्ञानाधिष्ठानं च कृत्वा रश्मिसञ्चोदितसंबुद्धकायनिर्गत-देवताकारावर्ज्जितं कुम्भाम्बुज्ञानवज्रशिरा भवेत् ।

पूजितो दशदिग्बुद्धैः बुद्धपूजापरायणः ।
सम्भूयोद्भावयेद् भव्यो भवसंसिद्धिमुद्धये ॥

[1] A ०निरूर्यं, N ०निस्तार्यं ।
[2] AC ०कृत् ।
[3] AC स्वयं ।
[4] A ०साद्य ।
[5] A कुम्भाव्, N कुम्भो अव्० ।
[6] A omits बुद्धपूजापरायणः ... प्रकुर्व्वन्तं ।

भूयो विभाव्य संप्राप्य प्रश्रब्धिं कायचित्तयोः ।
हारदोलक्रमेणाथ मन्त्रजापं समारभेत् ॥

विश्वमग्नेपगुणोदधिं कृत्वा प्रवेशादि प्रकुर्व्वन्तं [1]विभावयन् ॐ आः हुँ इत्यानीय क्षमापयेत् ।

स्वयं मञ्जुवरो भूत्वा जगत् पश्यंश्च तन्मयम् ।
यच्च यच्च युज्यते कर्म्म सत्त्वार्थे च तथा न्यसेत् ॥

रत्नत्रयप्रमन्नानां शिष्याणां स्मृतये कृतम् ।
साधनं वादिराजस्य स्याद् ध्रुवं लोकसिद्धये ॥

सर्व्वान् गुरुबुद्धबोधिसत्त्वान् इष्टदेवतामन्तर्भाव्य तदुद्दिश्य मण्डलकमारभेत । ॐ ह्रीः स्वाहा इति हस्तादिप्रक्षालनाचमनमन्त्रः । ॐ हुँ आसनाधिष्ठानमन्त्रः । ॐ वज्रभूमे हुँ भूमिपरिग्रहमन्त्रः । ॐ सर्व्वविघ्नानुत्सारय हुँ स्वाहा गोमयादि[2]पानीयमन्त्रः । ततः सम्मार्জ্জननिष्पन्ने ॐ वज्ररेखे हुँ इति रेखाधिष्ठानमन्त्रः । पुनः पुष्पैकं मण्डलके दत्त्वा ॐ सुरेखे सर्व्वतथागता अधितिष्ठन्तु स्वाहा इति पठित्वा हस्तं प्रक्षालयेत् । तदनु पुष्पैकं गृहीत्वा ॐ मणिधरि वज्रिणि महाप्रतिसरे रक्ष रक्ष मां हुँ फट् स्वाहा इति स्वशिरोदेशे पुष्पं क्षिपन्नात्मरक्षां कुर्य्यात् । पुनः ॐ आः हुँ इत्यात्मरक्षादिमन्त्रः । तन्मण्डलं विश्वपद्मरूपेणालम्ब्य तदुपरि चन्द्रं तदुपरि कुङ्कुमारुणं भगवद्बीजं तद्रश्मिसमाकृष्टमनादिसंसिद्धं भगवन्तं प्रदीपसंक्रमण[3]न्यायेनाकृष्य तत्रैव

[1] A भावयेत् । [2] A पुण्यञ्च ।
[3] A •ताया मन्त्र भाव्य, N •ताया मन्त्रं भाव्य ।
[4] A गामादि• । [5] A •व्यावेन ।

च प्रवेश्य भगवन्तं निष्पादयेत्। ॐ मञ्जुघोषाय वज्रपुष्पे हुँ, ॐ अक्षोभ्याय वज्रपुष्पे हुँ, ॐ वैरोचनाय वज्रपुष्पे हुँ, रत्नसम्भवामिताभामोघसिद्धयः, लोचना-मामकीपाण्डरातारा:। पूर्ववत् पुष्पधूपदीपनैवेद्य-सुगन्धवस्त्र समारम्भेण[1] अधिष्ठानं दातव्यम्। वन्दनापाप-देशनापुण्यानुमोदनां कृत्वा मन्त्रं जपेत्। ततो विसर्ज्ज-येत् ॐ वज्र मुः। ॐ अकारो मुखं सर्व्वधर्म्माणा-मादिमनुत्पन्नत्वात्। ॐ आः हुँ फट् स्वाहा इति सार्व्वभौतिकबलिमन्त्रः[2]। ॐ हारीत्यै महायक्षिण्यै हर हर सर्व्वपापानि मे क्लीं सर्व्वयक्षिणि प्रवेशनि स्वाहा हारीतीमन्त्रः। ॐ अग्रपिण्डामनेभ्यः स्वाहा अग्रपिण्डमन्त्रः। ॐ उत्सृष्टपिण्डामनेभ्यः स्वाहा उत्सृष्ट-पिण्डमन्त्रः। ॐ आः सर्व्वतथागताभिषेकसमयश्रिये हुँ हुँ प्रतिमादेः स्नानमन्त्रः।

॥ वज्रयोगिनीभाषितं वादिराजमञ्जुश्री-साधनं समाप्तम् ॥

A समारम्भा, NC समालम्भन। [1] C तेनाधिष्ठाय।
A ०तोभातिका।

49.

नमो मञ्जुश्रिये ।

पूर्वोक्तविधानेन शून्यताभावनानन्तरं विश्वपद्मोपरि चन्द्रमण्डले रक्तं[1] श्रीँकारं दृष्ट्वा तद्रश्मिभिः समानीत-तथागतज्ञानमत्रैव प्रवेश्य तत्परिणामेनोत्पलं तन्मध्य-चन्द्रस्थं तद्बीजं तद्विनिर्गतरश्मिभिर्वादिराड्मञ्जुश्रीरूपं जगन्निष्पाद्य निजबीज एव प्रवेश्य तत्परिणतमात्मानं झटिति मञ्जुश्रियमभिनिष्पादयेत् । द्विभुजैकमुखं पीतं ललिताक्षेपमुद्रया सिंहासनस्थं व्याख्यानमुद्रासलील-करद्वयं रत्नमकुटिनं दिव्यालङ्कारभूषितमुत्पलवाम-भुजाधिष्ठितमूर्त्तिकमक्षोभ्यमकुटिनं एवं समयसत्त्वमुत्पाद्य हृद्बीजसमाकृष्टज्ञानसत्त्वं पुरतो दृष्ट्वा समयस्त्वं दृश्यहोः समयस्त्वं समयोऽहं समयस्त्वमहमिति समयचोदनां कृत्वा जः हुँ वँ होः इति चतुर्बीजाक्षरैरा[2]कर्षणादिकं कार-येत् । मन्त्रस्त्वयमेव वर्णसन्दोहराजः ।

॥ इति वादिराट्साधनं समाप्तम् ॥

---

[1] AC •तानन्तरं । A •कारं, C •श्रीँकारं ।
[2] A has समयसत्त्वं पुरतो दृष्ट्वा after दृष्ट्वा ।
[3] AC •कर्षादिकं ।

50.

पूर्व्वोक्तविधानेन प्रथमं हृदीन्दुमध्ये बीजं षष्ठस्थ पञ्चमं पञ्चमस्वरेण पूरितं शून्यद्वयदेवेनाक्रान्तं तद्बीजरश्मिज-गुरुबुद्धबोधिसत्त्वान् दृष्ट्वा पूजयित्वाभिवन्द्य च अनेन मन्त्रेण ॐ वज्रपुष्पे हुँ, ॐ वज्रधूपे हुँ, ॐ वज्रदीपे हुँ, ॐ वज्रगन्धे हुँ, ॐ वज्रनैवेद्ये हुँ । ततो रत्नत्रयं मे शरणमित्यादि पठेत्, प्रणिधानपूर्व्वकं [1]सर्व्वधर्म्मनैरात्म्यं भावयेत् ॐ शून्यताज्ञानवज्रस्वभावात्मकोऽहम् । ततो—

बीजं मायोपमाकारं चैधातुकमशेषतः ।
दृश्यते स्पृश्यते चैव यथा माया हि सर्व्वतः ।
न चोपलभ्यते चैव सर्व्वस्य जगतः स्थितिः ॥

इत्यधिमुच्य ॐ स्वभावशुद्धाः सर्व्वधर्म्माः स्वभाव-शुद्धोऽहम् । पूर्व्वोक्तबीजनिष्पन्नं श्रीमञ्जुवज्रं पञ्चवीरक[2]-शेखरं कुमारं सर्व्वाभरणभूषितं कुङ्कुमारुणं वामेनोत्पलं दक्षिणेन लीलया स्थितं सिंहासनस्थमात्मानं कुमार-रूपेण चिन्तयेत् । अस्य मुद्रा भवति— हस्तद्वयं सम्पु-टाञ्जलिं कृत्वा तर्ज्जनीद्वयाभ्यामनामिकानखौ पिधाय उत्पलविकचसंस्थिता । हृदूर्णाकण्ठमूर्द्ध्नि वा लक्षजापः ॐ वागीश्वर मुः ।

॥ मञ्जुघोषसाधनम् ॥

[1] बीजं dropped in A.
[2] A ०द्वयदेवना० ।
[3] ॐ वज्रमन्ये हुँ not to be found in A.
[4] AC पूर्व्वध० ।
[5] AC पञ्चवीरशे० ।
[6] AC वागीश्वरं ।

51.

नमः श्रीवादिराड्मञ्जुघोषाय[1] ।

नत्वा ज्ञानमयं नाथं सर्व्वसिद्धिप्रदायकम्[2] ।
तत्साधनमहं वक्ष्मि क्रियातन्त्रानुसारतः ॥

प्रथमं तावन्मन्त्री मनोऽभिरुचिते स्थाने यथासुखमुपविश्य दुःखार्णवे पतितं सत्त्वधातुं दृष्ट्वा प्रणिधिं कुर्य्यात्[3] । दुःखिता अमी सत्त्वाः संसारे संसरन्ति ते मया मञ्जुघोषेण भूत्वा सर्व्वसत्त्वा[4] अनुत्तरपदे प्रतिष्ठापयितव्या इति । ततः पटादिगतं भगवन्तं मञ्जुघोषं गुरुबुद्धबोधिसत्त्वांश्च पुरतोऽवलम्ब्य पुष्पादिभिः सम्पूज्य प्रणिपत्य पापदेशनामकरणसंवरं पुण्यानुमोदनां आत्मभावनिर्यातनां त्रिशरणगमनं बोधिचित्तोत्पादं च कुर्य्यात् अनेन गाथाद्वयेन[5]—

रत्नत्रयं मे शरणं सर्व्वं प्रतिदिशाम्यघम् ।
अनुमोदे जगत्पुण्यं बुद्धबोधौ दधे मनः ॥
उत्पादयामि वरबोधिचित्तं
निमन्त्रयामि अहं सर्व्वसत्त्वान्[6] ।
दृष्टां चरिष्ये वरबोधिचारिकां
बुद्धो भवेयं जगतो हिताय ॥

ततो मार्गाश्रयणम्[7] । ॐ स्वभावशुद्धाः सर्व्वधर्म्माः स्वभावशुद्धोऽहं इत्यर्थानुगमेन वारत्रयमुच्चार्य्य स्वभावशुद्धमधिमुच्य सर्व्वधर्म्मनैरात्म्यं भावयेत्[8]। वैधातुकं शून्यम-

[1] *Namaskāra* only found in Ab
[2] ANC वक्ष्ये ।
[3] सर्व्वसत्त्वा found only in Ab.
[4] A •त्पादनेन गाथा, N •त्पादनञ्च ।
[5] Ab प्रसाधकं ।
[6] A वचिस्थाने ।
[7] Ab पटादिकं ।
[8] N •म्यहं ।

लक्षणं ग्राह्यग्राहकवर्ज्जितं दृष्ट्वा स्वहृदये[1] अकारेण चन्द्र-
मण्डलं तस्योपरि मुःकारं तप्तचामीकराभं तदुद्भूत[2]-
गर्भास्तिसमूहैः सर्व्वलोकधातुप्रसरानवभास्य यथाभव्यतया
सत्त्वानामर्थं कृत्वा सर्व्वतथागतान् सञ्चोद्य तस्मिन् बीजे
प्रवेश्य तत्सर्व्वं निष्पाद्य मञ्जुघोषस्वरूपमात्मानं भाव-
येद् द्रुतकनकनिभं द्विभुजमेकमुखं सिंहस्योपरि पद्म-
चन्द्रासने अर्द्धपर्य्यङ्कनिषण्णं चिचीरं रत्नमुकुटिनं चन्द्र-
प्रभामण्डलं कुमाराकाररूपिणं सर्व्वालङ्कारभूषितं
शृङ्गाररसमंयुक्तं ईषद्धसितं द्वाभ्यां हस्ताभ्यां धर्म्मचक्र-
मुद्राधरं अवसव्य[3]भुजामक्षप्रज्ञापारमितासहितेन्दीवरं
वामजङ्घाश्रितयमान्तकं[4] महाक्रोधं नीलवर्णं विकटदंष्ट्रा-
करालं पिङ्गलकुटिलकेशमारक्त[5]मण्डलाक्षं भयानकं
भृकुटीघोरमुखं कपालमालाविभूषितशिरसं सव्यकरेण
भगवतो जङ्घावलग्नं वामे दण्डधरं एवं विभाव्य काय-
वाक्चित्तेषु चन्द्रमण्डले ॐ आः हुँ इति [6]अक्षरं
सितरक्तनीलवर्णं यथाक्रमेण विन्यस्य ततः स्तनान्तरित-
चन्द्रमण्डले मुःकारं विचिन्त्य ततः पूज्यपूजकयोरभेद्-
मा लब्ध्य नानाविधदेवताभिः संस्तूयमानमात्मानं दृष्ट्वा
स्फुरणसंहरणेन तावद् भावयेत् यावत् खेदो न जायते

[1] Ab स्वहृद्यका० ।
[2] ANC तदुद्भव० ।
[3] AN निष्पाद्य ।
[4] Ab ०मनार्द्धपर्य्य० ।
[5] C ०मुद्रां दधानं ।
[6] A ०पद्मान्तकं, Ab ०यामान्तकं ।
[7] ANC सत्व० ।
[8] ANC ०मण्डलाक्षं ।
[9] भयानकं ..... ०विभूषितशिरसं found only in Ab.
[10] ANC अक्षरं ।
[11] N तत् ।
[12] AC ०भेद्यमव० ।

एवं [1]भावयतो नित्यं बुद्धबोधिप्रसिद्धये[2] ।
[3]दृढं जन्मनि प्राप्नोति मञ्जुनाथमहारूपाम्[4] ॥

भावनाखिन्नः स्वहृदि चन्द्रमण्डले मन्त्रं विन्यस्य जपेदासक्त[5]मानसः । तत्रायं जपमन्त्रः ॐ धर्म्मधातु-वागीश्वर मुः । एवं जपं कृत्वा भावनां चाप्यखेदतः उत्थातु[6]कामश्चेत् पुनस्तथैव संपूज्य संस्तुत्य कुशलं परि-णाम्य क्षमापयेदनया गाथया—

यत् कृतं दुष्कृतं किञ्चित् मया मूढ़धिया पुनः ।
क्षन्तव्यं तत् त्वया नाथ यतस्त्रातोऽसि देहिनाम् ॥

जगद्धिताय प्रणिधानं कुर्य्यात् । ततः—

अनेन कुशलेनाहं बुद्धत्वमधिगम्य च ।
तारयेयं जगत् कृत्स्नमगाधाद् भवसागरात् ॥

ततः सर्व्वधर्म्मसमतामध्यालम्ब्य सर्व्वं मञ्जुघोषमयं पश्यन् [7]स्वदेवतागर्वमुद्वहन् यथासुखं विहरेदिति । एवं [8]चतुःसन्ध्यं त्रिसन्ध्यं वा करणीयमिति ।

इति साधन[9]माधाय [10]यद्वापि [11]फलं मया ।
[12]तेनायं [13]त्रिभवो लोको भूयान्मञ्जुवरोऽखिलः ॥

॥ [14]आर्य्यश्रीमद्वादिराड्मञ्जुश्रीसाधनं समाप्तमिति ॥

---

[1] AN भावयते ।
[2] Ab बुद्धे ।
[3] Ab जपेदति० ।
[4] AN देवता० ।
[5] C ०माराध्य ।
[6] A कृतं ।
[7] ANC प्रविधति ।
[8] A ०क्षं ।
[9] A उत्थितु० ।
[10] A चतुःसन्ध्रेन्द्रियं लक्षया० ।
[11] A पदं ।
[12] C तन्मयं ।
[13] A त्रिभुवो ।
[14] Ab reads आर्य्यवादिराटसाधनं समाप्तमिति ।

52.

प्रथमं तावन्मन्त्री सुगन्धोपलिप्तं नानापुष्पावकीर्णं भूमिभागं कृत्वा तन्मध्यसुखासने समुपविश्य त्रिशरण-गाथामुच्चारयेत्। पश्चात् स्वहृदये अकारं पश्येत् तत्परिणामेन चन्द्रमण्डलं तन्मध्ये मुःकारं चिन्तयेत्। ततो मुःकारात् पञ्चवर्णान् [1]रश्मिमेघान् स्वरोमकूपेभ्यो निश्चारयेत्। तैश्च रश्मिभिर्मञ्जुघोषरूपैः संच्छन्नं गगनं पश्येत्। ततस्तान् पुष्पादिभिः पूजयेत्। ततः पापदेशनां पुण्यानुमोदनां प्रणिधानादिकं च कुर्य्यात्। ततश्चतुर्ब्रह्म-विहारं भावयेत्। पश्चात् तत् सर्व्वं शून्यं ध्यात्वा ॐ शून्यताज्ञानवज्रस्वभावात्मकोऽहमिति मन्त्रमुच्चारयेत्। ततः पुनरपि स्वहृदयकारं पश्येत्। [2]तत् परिणम्य चन्द्र-मण्डलं तन्मध्ये मुःकारं तत्परिणामेन मञ्जुघोषरूप-मात्मानं पश्येत् सिंहस्थं कनकगौरवर्णं सर्व्वालङ्कारभूषितं व्याख्यानमुद्रा व्यग्रकरं वामपार्श्वे उत्पलधरं अक्षोभ्यमकुटिनं [3]दक्षिणे सुधनकुमारं वामे यमान्तकं पश्येदिति। [4]भावनायाः खिन्नो मन्त्रं जपेत् ॐ [5]वागीश्वर [6]मुः।

॥ वादिराट्साधनं समाप्तम् ॥

---

[1] A रश्मीन् मेघान्।
[2] N तच्च।
[3] A ०व्यग्र०।
[4] A दक्षिणेन।
[5] A भावनया।
[6] A वागीश्वरं।

53.

प्रक्षाल्यार्च्चनपापदेशनशुभामोदादिमैत्र्यादिक-
मन्त्रोपाधिकमर्व्वधर्म्मतथतां चन्द्रह्रयान्तर्गतम ।
पीताम्भोजं बिभर्त्ति पौतविलसन मँकारबीजं ततः
चन्द्रादेः परिणामतो झटिति मस्याद् वादिराजः स्वयम्॥

[1]ततः प्रज्ञाकरं तान्तं [2]रान्तं मान्तं सुपण्डितम् ।
ईश्वरिणं जपेन्मन्त्रं अर्द्धेन्दुबिन्दुनादिनम् ॥

॥ प्रज्ञाहृद्विनिधिवादिराट्माधनं [3]समाप्तम ।
। कृतिरियं पण्डितश्रीहरिहरस्य ॥

54.

लोकानुग्रहकारिणे कुमाराकारधारिणे ।
मञ्जुश्रिये नमस्तुभ्यं तथतापथदेशिने ॥

मञ्जुश्रीकल्पोक्तविधिना वादिराट्साधनं निगद्यते । प्रथमं तावत् चतुरस्रं चतुर्द्वारं नानारत्नखचितवितानोपशोभितं मुक्तामयं ध्वजपताकादिमण्डितं [4]मण्डपं विचिन्त्य तच मध्ये पद्ममहरकं [5]तचोपविश्य इदानीं बोधिचित्तमुत्पादयेत् । यावन्तः सत्त्वाः सत्त्वसंग्रहेण संगृहीता[6]स्ते

[1] A तथा ।
[2] AC नान्तं ।
[3] समाप्तं omitted in N.
[4] A वाञ्छितं ।
[5] A पदममूरकं, N पटमहरकं ।
[6] A ०स्तत्सर्व्वे ।

सर्व्वे मया मञ्जुश्रीज्ञाने प्रतिष्ठापयितव्या इति यद्वा अनित्याः क्षणिका[1] निरात्मानः चित्तविठयिताः[2] स्वप्नेन्द्रजालसदृशाः प्रतिभासमात्रा आदिशान्ताः प्रकृतिपरिशुद्धा अभावा अजाता अनुत्पन्नाः तथताभूतकोटिशून्याः सर्व्वधर्म्मा इति शून्यताया अधिवचनम्। तृष्णावशात् अमी सत्त्वा अविद्यान्धीकृता अकर्म्मविपाकदर्शिनः तेभ्यो गम्भीरं प्रतीत्यसमुत्पादकर्म्मक्रियावताराय धर्म्मं देशयिष्यामीति करुणाया अप्यधिवचनम्। अत एवाह भगवान् समाजादौ—

शून्यताकरुणाभिन्नं बोधिचित्तमिति स्मृतम्।

अस्योत्पादादुत्पादितं बोधिचित्तं बोधिमत्त्व इत्युच्यते। ततः सर्व्वबुद्धबोधिमत्त्वान् मनसैव सम्पूज्य ततः स्वहृदि हुंकारं रक्तवर्णं सूर्य्यकोटिशतसहस्रज्वलनभासुराकारमात्मानं ज्ञानदेहमवलोक्य तेनैव सूर्य्यमण्डलं विभाव्य तदुपरि चन्द्रमण्डलं कुङ्कुमाभं तत्र परमाक्षरमनेकरश्मिकोटिशतसहस्रनिर्य्यातनं मँकारं पञ्चवर्णसमायुक्तं दिग्व्योमपर्य्यन्तं समीक्ष्य ततो ज्ञानोक्तैकात् मञ्चोद्य भगवन्तं मञ्जुश्रियं तप्तकाञ्चनाभं पञ्चवीरकुमारं धर्म्मचक्रमुद्रासमायुक्तं प्रज्ञापारमितान्वितनीलोत्पलधारिणं सिंहस्थं ललिताक्षेपं सर्व्वालङ्कारभूषितं शृङ्गार[3]सागरतरङ्गप्रभया धैधातुकमापूरयन्तं अनवरतगद्यपद्यसंस्कृत-[4]बहुलानेकरुतधर्म्मं देशयन्तं स्फुरणसंहरणपूर्व्वकमानीय

---

[1] A क्षणिक०।
[2] A चित्तविपठिता।
[3] A पञ्चतथा०।
[4] ०सागर० dropped in A.
[5] A बज्रजनक०, C बज्रजामेक०।

प्रवेश्य ॐ मञ्जुवर हुँ इत्यनेन दृढ़ीकृत्य मञ्जुवज्र-स्वभावात्मकोऽहमिति भावयेत्। ततो भावनया खिन्नो जपेन्मन्त्रं ॐ मञ्जुवर हुँ। एषा भगवतो विधिः शुचि-माचारसम्पन्नः मन् मन्त्र लक्षाणि जपेत्।

॥ वादिराट्साधनं समाप्तम् ॥

55.

नमोऽरपचनाय।

शशधरमिव शुभ्रं खड्गपुस्ताङ्कपाणिं
सुरुचिरमतिशान्तं पञ्चचीरं कुमारम्।
पृथुरतिवरमोक्षं पद्मपत्रायताक्षं
कुमतिदहनदक्षं मञ्जुघोषं प्रणम्य॥
लघुतरमुपदेशं चक्रिरत्नस्य कुर्य्या-
मरपचनसुसिद्धौ जन्मिनो येन नूनम्।
निखिलपदवीं बोद्धीं प्राप्नुवन्त्यग्रबुद्धि-
मविरतमभियोगाद् भावयन्तोऽर्ववर्षम्॥
सुरभिकुसुमाकीर्णे गन्धतोयोपसिक्ते
समशुचिसुमनोज्ञे मन्त्रविद् भूमिभागे।
क्वचिदतिमृदुरम्ये विष्टरे चोपविश्य
सुखरतिमनिमित्तं भावयेद् बोधिचित्तम्॥

Ab सुरचित०। [2] Ab ०बोधिं।

स्वभाव[1]शुद्धं समुदीर्य मन्त्रं
विभाव्य शून्यं निखिलं समन्तात् ।
परार्थसारं पुनरात्मदेहं
प्रभास्वरं तं सहजेव पश्येत् ॥
अथान्तरीक्षे स्वहृदीन्दुमण्डलं
स्वरेण [2]वाद्येन विभाव्य भास्वरम् ।
अथाच धौःकारमुदीक्ष्य पाण्डरं
तं मञ्जुघोषं विदधीत निर्म्मलम् ॥
शशाङ्ककोटिद्युतिमादधानं
न्यसेच्च सर्व्वाभरणोज्ज्वलं तम् ।
ध्यानैकनिष्ठं कमलोपरिस्थं
सरागमीषद्धसितं मनोज्ञम् ॥
स्वहृदि वरमकारं विस्फुरन्तं समीक्ष्य
तमतुलघृणिजालं चक्रमष्टाररूपम् ।
तदुपरि शशिबिम्बं भावयेत् तेन मन्त्रीः
शशधरकरगौरं मञ्जुघोषं तमेव ॥
विहसितसकटाक्षां दक्षिणे चारुरूपां
गुरुतरकुचयुग्मां केशिनीं तस्य पश्येत् ।
सुरुचिरललिताङ्गीं वामतश्चोपकेशीं
सकलगुणनिधाने भावयेत् ते च नाभ्याम् ॥
न्यस्येत् पुरस्तात् खलु जालिनीप्रभं
सुशुभ्ररेफोद्भवमेव निर्म्मलम् ।

---

[1] ANC •विद्धं ।
[2] Ab वाद्येन ।
[2] AbNC विक• ।

पँकारजं रश्मिमयं मनो[1]हरं
चन्द्रप्रभं तं विदधीत पृष्ठतः ॥

ज्वलन्नभस्तीन्यथ चाक्षराणि
पृथुप्रभावानि विभावयेच्च ।
अज्ञानशैलं विधमन्ति तानि
कुर्व्वन्ति सुज्ञानमनाविलं च ॥

चक्रं भ्रमत् शीघ्रमधो विचिन्त्य
मोहान्धकारं विधमत् समस्तम् ।
सदैव तन्निश्चलमेव पश्येत्
शशाङ्कबिम्बं हृहदंशुजालम् ॥

शशाङ्कतो वै पृथुरश्मिमेघं
निःसृत्य पश्येद् दशदिग्व्रजन्तम् ।
सत्त्वानलङ्कृत्य तथात्मदेह-
मागत्य चान्त्ये प्रविशन्तमिन्दौ ॥

सद्रपचनमन्त्रं संजपन् मन्त्रिमुख्यो
हृढमतिरूपदेशात् भावयन्नाशु भूमौः ।
वरविमलमनोज्ञाः पारमौश्चापि सर्व्वाः
प्रहृतविमतिदोषाः प्राप्नुयात् ता जिनानाम् ॥

वरगुरुरतिवज्रैरग्रसद्वर्म्म[2]तेजैः
सुगतगणपुरस्ताद् योऽभिषिक्तो विधानात् ।
सुमतिरजितमिच्छंस्तेन संग्रन्थितं हि
सद्रपचनचक्रं जन्मिनां बुद्धिसिद्धौ ॥

[1] Ab •रम् ।

[2] N •गन्नैः ।

संग्रन्थ्य चक्रं सुविधानमग्र्यं
पुण्यं मयाऽऽप्तं विपुलं समन्तात् ।
यत् तेन लोको निखिलो[1] ऽभिताघः
सन्मञ्जुघोषोऽस्तु सुखैकनिष्ठः ॥

॥ अरपचनसाधनम् ॥

56.

नमोऽरपचनाय ।

प्रथमं तावत् मन्त्री मनोऽनुकूले प्रदेशे सुखासनोपविष्टः स्वहृद्यादिवर्णोद्भवेन्दौ चतुर्थस्य चतुर्थं बीजमौकारान्तं बिन्दुद्वयसंयुतं विभाव्य ततस्तत्करनिकरैरपसारितक्लेशान्धकार[2] हृदयो मैत्रीकरुणामुदितोपेक्षेति चतुर्ब्रह्मविहारं भावयेद् वक्ष्यमाणक्रमेण । का मैत्री ? या सर्व्वसत्त्वेष्वेकपुत्रप्रेमता[3] । का करुणा ? या चिदुःखदुःखितानां सत्त्वानां संसारसागरादुद्धरणकामता । का मुदिता ? उत्पादितकुशलमूलपरभोगैश्वर्य्यादिषु हृष्टचित्तता । कोपेक्षा ? सर्व्वत्र प्रतिघानुनयपरहितधर्म्मतायां स्वरसवाहिनी प्रवृत्तिरिति चतुर्ब्रह्मविहारभावनानन्तरं स्वहृद्बीजरश्मिभिरेव निर्गतसमस्ताकाशदेशव्यापि-

---

[1] A omits ऽभिताघः.....बीज॰ including the colophon and part of the next *Sādhana*.

[2] Ab ॰कारं । [3] AC ॰मैत्रता ।

[4] N ॰चातन॰ ।

गुरुबुद्धबोधिसत्त्वान् स्फुरणसंहरणाकारेण जगदर्थक्रिया-करणैकपरान् दृष्ट्वा स्वहृदीजकिरणैरेव दिव्यगन्धपुष्प-प्रकरादिकं निश्चार्य्य मण्डलपूर्व्वकं कृताञ्जलिना गुरु-बुद्धबोधि[1]सत्त्वचरणकमलविन्यस्तमूर्ध्ना प्रणामना वन्दना। तद्रश्मिरेव निर्गतपुष्पधूपदीपगन्धचूर्णचीवर[2]च्छचध्वज-घण्टापताकादिभिस्तेषां च बाह्याध्यात्मपूजादिभिः संपूजनं पूजा। ततः पापदेशनादिकं कुर्य्यात्—

[3]द्वेषाच्च रागादथ मोहतोऽपि
कायेन वाचा मनसाऽन्यतोऽपि।
पापं कृतं कारितमेव यत् तत्
सर्व्वं जिनानां पुरतो दिशामि॥

इति पापदेशना।

[4]पुण्यं च यत् सर्व्वतथागतानां
अन्यच्च सम्बोधिसमाश्रितानाम्।
प्रत्येकबुद्धस्य च सद्गुरूणां
[5]सर्व्वं जिनानां स्वनुमोदयामि॥

इति पुण्यानुमोदना।

समस्तकाल[6]चयवर्त्तिबुद्धा-
ननन्तदिग्व्यापिकृपागुणौघान्।

[1] Ab ०सत्त्वानां। [2] ANC ०ताभो।
[3] ANC omit ०च्छ०।
[4] Ab reads differently— यत्पापं मयोपार्जितं सर्व्वजन्मसु रागज-द्वेषजमोहजं वा कायेन वा मनसा वा वचोभिर्वा तत्सर्व्वं प्रतिदेशयामि।
[5] Ab reads differently— यत्पुण्यं च सर्व्वतथागतानां बोधि सत्त्वश्रावकप्रत्येकबुद्धानां सद्गुरूणां च तत्सर्व्वं पुण्यमनुमोदयामि।
[6] सर्व्वं पुण्यं in N. [7] Ab चावस्थि।

प्रहीनदोषार्थ्यगणान् सधर्म्मा-
नवेत्य भक्त्या शरणं प्रयामि ॥

इति त्रिशरणगमनम्।

संश्रित्य जैनं परिशुद्धमार्गं
ब्रह्मेन्द्ररुद्रप्रभृतिष्टनर्घम्।
इत्थं मयोपार्ज्जितपुण्यवृन्दाद्
उत्पादयाम्येष सुबोधिचित्तम् ॥

इति जिनमार्गाश्रयणबोधिचित्तोत्पादौ। एवं सप्त-विधानुत्तरपूजानन्तरं गुरुवचसा बाह्याध्यात्मशून्यतां विभाव्य पुनर्मन्त्रदृढ़ीकरणार्थं ॐ स्वभावशुद्धाः सर्व्व-धर्म्माः स्वभावशुद्धोऽहमिति गाथामुच्चार्य्य तदनु स्वचित्तं प्रतिभासमात्रं स्वच्छाप्रतिघरूपमादिस्वरोद्भवेन्दुमण्डला-कारेण स्वचित्तं विचिन्त्य तदुपरि पूर्व्वोक्तबीजं तदिन्दु-बीजपरिणतं खड्गं स्फुरद्रूपं तदनु मुष्टिमध्ये शशधरोपरि पूर्व्वोक्तबीजं ततः खड्गबीजपरिणतं मञ्जुघोषं शर-त्काण्डसमप्रभं दशदिगालोककरनिकरधरं द्विभुजं कुमारा-कृतिं सव्येन समस्ताज्ञानोच्छेदनैकपरप्रज्ञाखड्गव्यग्रकरं अवसव्येनोपायभूतसकलशास्त्रकलापुण्यैकपुस्तकव्यग्रपाणिं सर्व्वालङ्कारभूषितं रक्ताम्बरधरं ध्यानैकनिष्ठं प्रबुद्ध-पद्मानन कमलदलेक्षणं उत्पादितमहापुरुषलक्षणं इन्द्रनीलमणिसन्निभाकुञ्चितपञ्चचीरं सिताष्टदलकम-लेन्दौ वज्रपर्य्यङ्केनोपविष्टं सर्व्वतथागतज्ञानस्वरूपं मञ्जु-श्रीरूपमात्मानं विभाव्य, एवं समयसत्त्वाहङ्कारवान्

---

[1] Ab •खदेव। [2] Ab ष्टकः।
[3] ANC •मवे•।

योगी स्वहृदि अँकारनिष्पन्नं शुभ्रमष्टारचक्रं स्फुरत्किरण-गणैरशेषाज्ञानविध्वंसनकरं दक्षिणावर्त्तक्रमेण[1] स्वं भ्रमद्-दृष्ट्वा तदुपर्य्यन्तरीक्षे आदिवर्णोद्भवेन्दुमण्डलं तदुपरि पञ्चाक्षरं यथाक्रमेण ज्वलदनलसङ्काशं सर्च्चिष्मकं समस्ता-ज्ञानोच्छेदकरं गुरूपदेशतो विभाव्य देवताकारनिष्पाद-नानलसो मन्त्री स्फुरणादिकं कृत्वा जपं कुर्य्यात्। अथवा हृदीन्दुमध्ये शुभ्राकारनिष्पन्नमरपचनाख्यं सितं सर्व्वालङ्कारभूषितं हृष्टं ध्यानैकनिष्ठं वज्रपर्य्यङ्केनोपविष्टं दक्षिणवामकराभ्यां [2]असिपुस्तकौ धारयन्तं इन्द्रनील-सकलार्कुञ्चितपञ्चचीरधरं स्फुरदिन्दुसमाननं वदतां वरं स्वबीजेन्दुयुक्तहृदयं विभाव्य, तस्य पुरतः शुक्लरेफोद्भव-जालिनीप्रभं [3]अरपचनवद् द्विभुजादियुक्तं स्वहृदीन्दौ स्वबी[4]जाधिष्ठितं दृष्ट्वा तदनु पृष्ठतः सितपकारनिष्पन्नं चन्द्रप्रभं स्वहृदीन्दौ बीजसंयुक्तमवलोक्य ततो दक्षिणे[5] शुभ्रचकारनिष्पन्नां केशिनीं सितां सर्व्वालङ्कारभूषितां पीनपयोधरां [6]सव्यावसव्येनासिपुस्तकधरां स्वहृदीन्दौ बीजान्वितां विचिन्त्य एवं [7]उत्तरेण शुक्लनकारनिष्पन्ना-मुपकेशिनीं च स्वहृदीन्दौ बीजसमन्वितां विभाव्य सर्व्वा-नरपचनसदृशान् विचिन्तयेत्। इत्थं देवतागणहृदीज-किरणस्फुरणसंहरणैर्जगदज्ञानवृन्दमुच्छेदयन् धर्म्मामृत-सकलशास्त्रशिल्पकलापैः सर्व्वसत्त्वान् सन्तर्पयन् मुहुर्मुहुः स्वच्छाप्रतिघरूपमात्मानं विभाव्य गुरूपदेशतः समा-

---

[1] AN शुभं दृ०, C शुभ्रमयु दृ०।
[2] ANC omit अरपचनवत् द्विभुजादियुक्तं।
[3] Ab ०ज्ञतः।
[4] ANC omit.
[5] AC ०मणिपु०।
[6] Ab ०जान्वितं।
[7] ANC omit.

स्थितो मन्त्री जपं कुर्य्यात्। प्रणवादिपञ्चबीजाक्षरमध्ये समयसत्त्वबीजान्तमन्त्रः। यदा [1]उत्थानाशयो [2]भवेत् तदा स्वमन्त्रं गुरूपदेशादुच्चार्य्य तदनु शताक्षरगाथां पठेत्। ॐ वज्रसत्त्व समयमनुपालय, वज्रसत्त्वत्वेनोपतिष्ठ, दृढो मे भव, सुतोष्यो मे भव, सुपोष्यो मे भव, अनुरक्तो मे भव, सर्व्वसिद्धिं मे प्रयच्छ, सर्व्वकर्म्मसु च मे [3]चित्तं श्रेयः कुरु हुँ हहहह होः [4]भगवन् सर्व्वतथागतवज्र मा मे मुञ्च वज्रीभव महासमयसत्त्व आः हूँति शताक्षरमन्त्र-पठनानन्तरं स्फुरणादिकं विसृज्य समयसत्त्वगर्वेण सर्व्वेर्य्यापथेषु विहरन् समाहितो योगी सम्यग्ज्ञान-सागर[5]पारगो भूत्वा अचिरेणैव कालेनानुत्तरां बोधिं प्राप्नोतीति।

संलिख्य साधनं शुभ्रं मुक्तकेनेह [6]मुक्तगे।
पद्माकरस्य यत् पुण्यं तदस्तु भवमुक्तये॥

॥ मुक्तकेनारपचनसाधनं समाप्तम्॥

[1] AC उत्थासना०
[2] Ab भवति।
[3] Ab चित्तश्रियः।
[4] A omits.
[5] AC ०पाग्रो।
[6] ANC चक्रवे

57.

मध्ये मञ्जुश्रियं न्यस्येद् रक्तवर्णं पूर्वेण जालिनीप्रभं हरितवर्णं [1]रेफाक्षरेण दक्षिणेन केशिनीं पीतवर्णां पकारेण पश्चिमेन चन्द्रप्रभं चन्द्रवर्णाभं चकारेण नकारेण उपकेशिनीं रक्तवर्णां लिखेत्। वरदमुत्पलकरं मञ्जुश्रियं वामेन पद्मधरं वरदं जालिनीप्रभं उत्पल-वरदहस्तामुपकेशिनीं वरदपद्महस्तं चन्द्रप्रभं रक्त-पद्मधरां केशिनीं वरदकरां च। नाभिमूले चक्रमष्टारं भ्रमन्तं वह्निसमप्रभं तदुपरि चन्द्रमण्डलं तस्योपरि चतुरारं चक्रं चक्रान्तर्गतान्यक्षराणि ध्यायेन्मन्त्राक्षराण्येव देवताबिम्बम्। तेषां हृदये तान्येवाक्षराणि। ततः सकलान् वर्णान् सर्व्वरसगुणोपेतान् दशदिग्व्यापकानिति यावत्।

॥ आर्य्यमञ्जुश्रीभट्टारकभावनोपदेशः ॥

AC. पन्यासेत्।
AC भाषं चा०।

[1] AC रेफोद्भवेन।

58.

सद्योऽनुभवमञ्जुश्रीसाधनं साधु कथ्यते ।
प्रज्ञार्थिजनार्थ्यैः[1] प्रज्ञाविषव्यामोहहानये ॥

प्रथमं तावद् योगी क्वचिन्मनोऽनुकूले प्रदेशे अकार-स्वरोद्भवेन्दुस्थितधीःकारबीजविनिर्गताङ्कुशाकाररश्म्या-कृष्टारपचनादेः[2] पूजादिकं विधाय शून्यतां भावयेत्[3]। ततश्चित्ताकारपरिणतकुमुदबन्धुस्थितधीःकाराभिनिवर्त्ति-तां निमित्तनिस्त्रिंशं पश्येत्। तदग्रे आदिस्वरपरिणताब्जो-परि असिबीजं सर्व्वमेतत् परिणम्य खड्गपुस्तकधारिणमा-कुञ्चितपञ्चचीरं रक्तवस्त्रयुगयुतं[4] शृङ्गारवेशधारिणं स्मित-विकसितवदनं शशाङ्ककान्तितुल्यशोभं विश्वदलकमलस्थ-बद्धपर्य्यङ्कं सद्योऽनुभवारपचनरूपमात्मानमीक्षेत। ततः स्वहृद्यादिस्वरपरिणतमस्पृशद्दष्टारचक्रं तदुपर्य्यङ्कुरीभावेन स्वरादिसंभूतमस्पृशन्तमिन्दुमण्डलं तच्च चन्द्रबीज-जनितममिं तत्कोटिचन्द्रं च पूर्व्वाक्तखड्गबीजविराजितं खड्गादिपरिणामेन च तथैव मञ्जुघोषं विभावयेत्। तदग्रे च रेफजखड्गादिस्वरमोषधीशस्थितरेफं विभाव्य खड्गादि-परिणतं जालिनीकुमारं भगवद्रूपं पश्येत्। तथा पृष्ठे तथैव पञ्चमाद्यक्षरेण चन्द्रप्रभं दक्षिणे तथैव चकारेण केशिनीं स्तनभरविराजितां नाथरूपां वामे चोपकेशिनीं नकारेण तथैव च सर्व्वेषां स्वहृन्निशाकरे सितं स्वस्व-

[1] A ०जनदोः, NC ०जनार्थ्यः ।
[2] AC भावये० ।
[3] ANC ०निश्चित० ।
[4] AC ०युतयुतं ।
[5] AC ०मञ्जुप० ।
[6] Ab ०संकृत० ।
[7] ANC ०रजो० ।
[8] Ab ०माद्य० ।

बीजं विचिन्तयेत्। ततो नायकहृदीजविनिर्गतांश्वा-
ष्टज्ञानसत्त्वेन सहैकतां च चक्रं च शीघ्रं भ्रमत् चन्द्रस्थ-
देवताचतुष्टययुक्तं चात्मानं स्थितं अशेषवाङ्मयं स्फुरण-
संहरणं च ध्यायात्। ध्यानात् खिन्नो जपेन्मन्त्रम्। तचायं
मन्त्रराजः अरपचनधीः इति।

सद्योऽनुभवमञ्जुश्रीसाधनं पुण्यमाचितम्।
यत् कृत्वा तेन लोकोऽस्तु मञ्जुघोषसमः सदा॥

॥ सद्योऽनुभवारपचनसाधनम् ॥

59.

बीजेभ्यः स्फारयेद् रश्मीनुच्छ्वासेनाथ रश्मिभिः।
निःश्वासैर्ज्ञानसत्त्वं बीजेष्वाकृष्य संहरेत्॥
विश्रम्य ज्ञानसत्त्वाद्यबीजकस्फारसंहृती।
श्वासस्य स्थिरधीः कुर्यात् निर्गमागमयोः क्रमात्॥
असिविधुवरबीजं चन्द्रबिम्बोपरिस्थं
क्रमगतिपरिणद्धं विद्रुतापत्तिमुद्गम्।
तदनु च मतिपुञ्जं मञ्जुघोषादिरूपं
भवति सु(कु)मतिचक्रं कोटिमोक्षप्रदं च॥

---

[1] C •ताश्चा•।
[2] ANC स्थिरं।
[3] AC •ताश्चै•।
[4] N •त्त्वाद्यं।
[5] AC •विचर•।

विधौ बीजासितन्मुष्टिचन्द्रबीजानि रोचिषाम् ।
रश्मीकृत्य गतायाते चिन्तयेत् पञ्च देवताः ॥

पूर्वोक्तविधानेन शून्यताभावनानन्तरं विश्वपद्मसूर्य्ये पीतवँकारबीजपरिणतं झटिति वज्रानङ्गमञ्जुश्रीभट्टारकमात्मानमभिनिष्पादयेत् पीतवर्णमेकमुखं त्रिनेत्रं षड्भुजं जटाधरं द्विरष्टवर्षं सस्मेरं प्रत्यालीढपदं खड्गबाणदर्पणधरं दक्षिणकरत्रयं कार्मुककुवलयकंकेल्लिधारिवामकरत्रयं दिव्याभरणवसनभूषितमक्षोभ्यमुकुटिनं ध्यात्वा मदनप्रयोगेन भावयेत् । तथाहि—

इषुणा तु कुचं विद्ध्वा अशोकैस्ताडयेद् हृदि ।
खड्गेन भीषयेत् साध्यां दर्पणं दर्शयेत् तन्
उत्पलेन पदं बद्ध्वा आकर्षयेत् स विह्वलाम् ॥

मुक्तकेशामिति । ॐ अमुकीमाकर्षय मञ्जुघोष ह्रीः जः ।

॥ इति वज्रानङ्गभट्टारकसाधनं समाप्तम् ॥

[1] AC चंका० । [2] A चन्द्रम० ।
[3] N omits •भट्टारक० ।

60.

पूर्ववत् पापदेशनादिकं कृत्वा शून्यताभावनानन्तरं [1]हुँकारजं हुँकाराक्रान्तवरटकमध्ये शरेण युक्तं चापं ध्यात्वा तत्परिणतं वज्रानङ्गनामार्य्यमञ्जुघोषं पीतवर्णं षड्भुजं मूलभुजाभ्यां आकर्णापूरितरक्तोत्पलकर्णिकाशरयुक्त-कुसुमधनुर्द्धरं दक्षिणद्वयेन खड्गदर्पणभृतं वामयुगले-नेन्दीवररक्ताशोकपुष्पपल्लवधरं अक्षोभ्याधिष्ठितजटा-मकुटिनं प्रत्यालीढपदं षोडशवर्षाकारं महाशृङ्गारमूर्त्तिं पश्येत्। अथवा चतुर्भुजं दर्पणाशोकपल्लवधरं द्विभुजरहितं ध्यायात्। ततो ज्ञानसत्त्वेनैकीकृत्य ॐ मञ्जुघोष ह्रीः जः इति मन्त्रं जपेत्। त्रिभुवनमपि क्षणेन किङ्करीकरोति। अथवा [2]कश्चित् आकृष्टकामः तदा अनन्तरोक्तभावनां कृत्वा तदहङ्कारगर्वितमनाः स्वहृदि रक्तषोडशदलकमल-मानाभिलम्बितनालसहितं स[3]कन्दमवलम्ब्य तन्नालमूले च [4]रक्तहुँकारं दृष्ट्वा [5]तद्दलेषु प्रदक्षिणतो रक्तषोडश-स्व[6]रान् विभाव्य तत्किञ्जल्कोपरि निशिदिवा यथा[7]क्रम-भवं सूर्य्यचन्द्रमसोर्मण्डलं रक्तवर्णं तन्मध्ये च रक्तह्रीःकार-द्वयविदर्भितं वक्ष्यमाणस्वमन्त्रं पश्येत्। ततस्तान् स्वरान् रक्तभमरानतिहृष्टपु[8]ष्टान् विभाव्य स्व[9]मन्त्रारुणकिरण-सञ्चयैर्दशदिशमापूर्य्य यावदभीष्टायाः स्त्रियः स्थानं गत्वा

---

[1] A omits.
[2] ANC काश्चित्।
[3] AC ०रत्नानन०।
[4] Ab ०रागितं।
[5] A ०द्भावं।
[6] Ab ०पर्ज०।
[7] A ०कञ्ज०, Ab ०कन्य०।
[8] A तद्वयेषु।
[9] ANC ०सम्भवं।
[10] ANC ०मन्त्रागर०।

तां वायुमण्डलमध्ये आरोप्य रश्मिमयेनैव पाशेन [1]सुवज्र-कण्ठामङ्कुशेन दृढविद्धधर्म्मोदयां पुरतः समानीय कृताञ्जलिपुटामालातचक्रमध्यवर्तिरक्तहुँकारपूरितनेत्रहृदय-सर्व्वावयवां विभावयेत्। ततस्तस्या अपि हृदये रक्तषोडश-स्वरसहितं सहुँकार[2]नालं षोडशदलकमलमालोक्य किन्तु म्लानवर्णं तन्मध्ये ह्रीःकारविदर्भितं नामाक्षरं ध्यायात्। ततः स्वमन्त्राक्षरकिरणप्रभवः सुरक्तनिशित-सूक्ष्माङ्कुशः पद्मनालस्थहुँकाररश्मिभिः ऊर्द्ध्वगतैः प्रेरित-मधुकरनिकरैरनुगम्यमानः स्वनासिकादक्षिणेतरविवराद् विनिर्गत्य साध्यासव्यनासिका[3]द्वारेण तद्धृदयं प्रविश्य सोऽ-ङ्कुशः तन्नामाक्षरमाक[4]र्षणस्थितः। ते च मधुपास्तत्पद्मं सरभसमालूनविशीर्णं कृत्वा [5]स्वमन्त्रतया स्वराना[6]चूषय-न्तीति सुचिरं निश्चलं पश्येत्। ततस्तथैव तच्छासप्रेरिता-ङ्कुशस्तन्नाम हठादादाय ते च मधुकराः [7]स्वकीयं स्वरं [8]आहृत्य तन्नासिकावामविवर[9]पथेन निःसृतान् वीक्षेत। पुनरानीय श्वासवायुना समाकृष्टानङ्कुशध्वमरान् स्वनासिका[10]दक्षिणद्वारेण प्रवेश्य तन्नामाक्षरं स्वहृदि मन्त्रेण गाढमाक्रम्य तांश्च स्वरान् प्रतिदलध्वमरवलवशी-कृतान् विचिन्तयेदित्यनेन क्रमेण स्वविज्ञानं तद्विज्ञाने-नैकी[11]कृत्य पश्येत्। ततस्तत्पयोधरं निश्चितरक्तोत्पल-

[1] ACAb सुव०।
[2] Ab ०नादं।
[3] C क्षान०, Ab मलान०।
[4] ABNC ०विवरेण।
[5] ANC ०र्षयन्।
[6] A सुतत०, NC खतन्नत०
[7] AC ०दूष०, B ०भूष०।
[8] A खवीर्य्य०।
[9] ANC omit.
[10] Ab ०पाद्मि०।
[11] B ०दक्षिणं प्र०।
[12] BAb ०कृतं।

कलिकाशरेण विद्ध्वा महारागमूर्च्छापतितां च तां विलोक्य मृङ्खलयैव कार्मुकेन तच्चरणयुगलं गाढमाबद्ध्य स्वगृहीतोत्पलनालमयेन पाशेन गले बद्ध्वा समाकृष्य स्वपादयोर्निपात्याशोकेन हृदयं सन्ताड्य निरभिमानिनीं कृत्वा खड्गेन भीषयित्वा अनन्तशरणां कृत्वा पुनर्हर्षेणेनात्मीयसंस्थां मुक्तकेशां विवस्त्रां अतिरागविह्वलां विरहकातरतरामतिभक्तां दर्शयित्वा स्वसंवेद्यमात्मानुरागं कारयेत्। ॐ अमुकीमाकर्षय मञ्जुघोष ह्रीः जः इति स्वमन्त्रं नामसहितमेकाग्रमना जपेत्। एवमनन्तरोक्तक्रमेण शुक्लप्रतिपदमारभ्य यावच्चतुर्दशीमयुतमात्रं जपेत्। पुनः पौर्णमास्यां महतीं पूजां विधाय सकलां रात्रिं जपेत्। ततः प्रभाते सा नियतमागच्छति। आगतां च तां महामुद्रादिसिद्ध्यर्थी स्वदेवतापूजाशयेन यथासुखमुपभुञ्जीत।

॥ वज्रानङ्गमञ्जुश्रीसाधनं समाप्तम् ॥

---

[1] A omits; Ab •गाजो•। [2] ANC •र्निर्या•।
[3] ANC •यावस्थां। [4] Ab •मानसं।
[5] ABNC •द्ध्यं। [6] BAb omits •मञ्जुश्री•।

61.

तत्रैव शून्यतादिभावनानन्तरं विश्वपद्मोपरि चन्द्रे सित-आःकारजं श्रीधर्म्मधातुवागीश्वरं सर्व्वाङ्गशुक्लं चतुर्मुखमष्ट-भुजं पञ्च[1]बुद्धमुकुटिनं दिव्याभरणवस्त्रशृङ्गारादिरसान्वितं धर्म्मचक्रमुद्राङ्कहस्तद्वयं क्षपाणवाणकुलिशदक्षिणहस्तत्रिकं प्रज्ञापारमितापुस्तक[2]चापवज्रघण्टावामकरत्रिकं वज्र-पर्य्यङ्किनमात्मानं निष्पाद्य [3]स्वहृच्चन्द्रे नीलहुँजात[4]सबीज-वज्रं महामुद्रास्वभावं, ऊर्णायां पीतचाँकारेण सबीजरत्नं [5]धर्म्ममुद्रास्वभावं, कण्ठे रक्तह्रीःकारजसबीजपद्मं समय-मुद्रास्वभावं, मूर्द्ध्नि हरित[6]अःकारजसबीजविश्ववज्रं कर्म्म-मुद्रास्वभावं, इत्थं चतुर्म्मुद्रान्वितमात्मानं विभाव्य ॐ हुँ ह्रीः भगवन् ज्ञानमूर्त्ति वागीश्वर महावाच सर्व्वधर्म्म गगनामलसुपरिशुद्ध धर्म्मधातुज्ञानगर्भ आः इति मन्त्रेणाधितिष्ठेत्। ततो [7]वज्रबन्धमध्यमाद्वयं तृतीयपर्व्वभग्नं खड्गाकारेण धारयित्वा तर्ज्जनीद्वयमुत्थिता[8]ङ्गुष्ठोपरि कुञ्चयित्वा धारयेदिति समयमुद्रा। ततः स्वजिह्वाचन्द्रस्थ-रक्तह्रीःकारबीजाधिष्ठितां ध्यात्वा क्रोधवाचा मन्त्रं जपेत्। तचायं जपमन्त्रः ॐ वज्रतीक्ष्णदुःखच्छेदप्रज्ञाज्ञानमूर्त्तये ज्ञानकाय वागीश्वर अरपचनाय ते नमः। अष्टशत-नामधेयां च नामसङ्गीतिं यथाकालं पठेदिति।

॥ धर्म्मधातुवागीश्वरसाधनम् ॥

[1] N ॰रत्न॰। [2] AN ॰ाक्ष घट॰। [3] A ॰राप॰, N ॰चाप॰
[4] ANC हुच॰। [5] A ङकारत बीजं वर्च, N ङकारजातसबीजवर्च।
[6] A धर्म्मचक्र॰। [7] Ab चक्रा॰।
[8] AN वज्रबन्धे, C मध्यमध॰। [9] A मुचिता॰, C मुचिता

62.

पूर्व्वोक्तविधानेन शून्यताभावनानन्तरं पद्मचन्द्रस्थ-रक्तहोःकारपरिणतमष्टभुजं चतुर्म्मुखं मूलमुखं[1] रक्तगौरं दक्षिणं कुङ्कुमारुणं पश्चिमं पद्मरक्तं उत्तरं पीतरक्तं द्वाभ्यां हस्ताभ्यां धनुर्ब्बाणधरं अपराभ्यां पाशाङ्कुशधरं पुनरपराभ्यां प्रज्ञापारमितापुस्तकखड्गधरं तथापराभ्यां घण्टावज्रधरं महारागशृङ्गाररसोज्ज्वलं ललितासनस्थं विश्वपद्मचन्द्रे दिव्यवस्त्राभरणममिताभजटामुकुटिनं हृदीज-रश्मिनाऽऽनीतसत्त्वान् स्ववक्षेऽवस्थाप्य मन्त्रं जपेत् ॐ महारागवज्र रागय सर्व्वसत्त्वान् होः ।

॥ इति धर्म्मधातुवागीश्वरसाधनवश्यविधिः ॥

63.

नमो मञ्जुनाथाय ।

शून्यताभावना[2] पूर्व्वकं चन्द्रमण्डलोपरि होःकारेण निष्पन्नमात्मानं महारागरूपं रक्तगौरं शृङ्गाररसोज्ज्वलं ललितासनस्थं चतुर्म्मुखमष्टभुजं प्रथममुखं रक्तगौरं दक्षिणं कुङ्कुमरक्तं पश्चिमं पद्मरक्तं उत्तरं पीतरक्तं द्वाभ्यां भुजाभ्यां धनुर्ब्बाणधरं अपराभ्यां पाशाङ्कुशधरं तथा अपराभ्यां प्रज्ञापारमितापुस्तकखड्गधरं तथा अप-राभ्यां घण्टावज्रधरं तथा विभाव्य मकुटकिरीट-

[1] मूलमुखं is found only in C. [2] N ०नन्तपू० ।

विनिर्गतरश्मिभिरूर्द्ध्वगतानवभास्य महारक्तान् प्रखत-विग्रहान् पश्येत्। यथा पूर्व्वदक्षिणपश्चिमोत्तरकोऽधो-[1]दिक्षुवस्थितान् प्रथमद्वितीयतृतीयचतुर्थपादरश्मि[2]भि-रापूर्य्यानुरञ्ज्यानीय स्ववक्त्रे स्थापितान् मनसा चिन्तय-नन्तरान्तरं मन्त्रं जपेत् ॐ महारागवज्र रागय सर्व्व-मत्वान् होः। ततो नियतं सर्व्वसत्त्वा [3]वशीभवन्ति।

॥ इति निश्चितमतिभावनीया महारागरूपरूपोत्तमा मञ्जुवज्रसर्व्वमन्त्रवशीकरणसमाधिः ॥

64.

तथैव शून्यताभावनानन्तरं वारुणमण्डले सिताष्टदल-पद्मवरटके मरणापगताः सर्व्वधर्म्मा इत्यधिमोक्षतः चन्द्रस्थसितअँकारपरिणामेन द्विभुजैकमुखं सितं वज्र-पर्य्यङ्कापरि समाधिमुद्राहस्तमक्षेषकुमाराभरणभूषितं पञ्चचीरकं मञ्जुश्रीभट्टारकरूपमात्मानं झटिति निष्पाद्य स्वहृच्चन्द्रपद्मोपरि खँकारजं गँ खँ तन्मध्ये वज्रजिह्व रँ इति वज्र[4]जिह्वां, जिह्वोपरि रक्तपद्मं तदुपरि बुद्धममिताभं विचिन्त्य स्वताल्वुद्देशे अधोमुखं स्रवत्सुधं सितवँकारं ध्यायात्। ॐ वाक्पेदं नमः इति जपमन्त्रः।

॥ महानुशंसमिदं धर्म्मशङ्खसमाधिस्फुचक-धर्म्मधातुवागीश्वरसाधनम् ॥

---

[1] A ०दिग्वव०।

[2] C omits ०भिरापूर्य्य.....चिदचारवेत् in the *Sādhana* for Arapacana which follows.

[3] N वशाभवन्ति। [4] A ०जिह्नोपरि।

65.

प्रथमतः क्वचिद् विजने मनोहारिणि शुचौ भूप्रदेशे मृदुमञ्जरकाद्युपविष्टः चिदुःखदुःखितमनन्तं सत्त्वधातुमवलोक्य मयैते सत्त्वा मञ्जुघोष[1]पदवीमासाद्य तत्पद एव निर्विशेषाः प्रतिष्ठापनीया इति करुणया समुपस्थापिता अनुत्तरचित्तैरविशेषचतुष्किकाचतुष्कोपशोभितचन्द्ररत्नघटितगन्धकुटीतले विततविचित्रवितानविलम्बमानगन्धपुट[2]परिमलभावितान्तराले भ्रमन्नन्धलुब्धमधुकरश्रेणीपक्षविक्षिप्तपुष्प[3]प्रकररत्ननिर्म्मितविविधसिंहासनस्थायिनो गुरुबुद्धबोधिसत्त्वानवलम्ब्य चेतसा पञ्चोपचारया नृत्यगीतवाद्यादिस्वरूपया च पूजया सम्पूज्य मम दारिद्र्यस्य न किञ्चिदन्यदस्तीति च शरीरं निर्य्यात्य, बुद्धं शरणं गच्छामि इत्यादि वचसा रत्नत्रितयशरणं उपेत्य पापं देशयित्वा पुनरकरणसंवरं विधाय पुण्यं चानुमोद्य झटिति सकलं शून्यमालोकयेत्। ततो नियतमेवैतदर्थं पश्यन् शनैः स्वभावशुद्धमन्त्रं चिरुच्चारयेत्। तदनन्तरं च तथैव शून्यतावाचक[4]मन्त्रमपि वारत्रयं आवर्त्तयेत्। ततो झटिति चिलो[5]कीमालोकमयीमालोकयेत्। तदनु स्वहृदि परमाक्षर[6]परिणते पीयूषगर्भस्तिबिम्बे शुचिरोचिषा धीःकारेण निर्वर्त्तितं निशितधारं क्षुरपाणमवधारयेत्। तन्मुष्टिस्थिते च प्राचीनवर्णनिष्पादिते श्वेतभानौ खड्गबीजं

[1] A ०पददेवी। [2] A ०कुट०।
[3] A प्रकरणि०। [4] AC ०मन्त्रपरिवार०।
[5] A ०कीकमपि आलो०, NC ०कीकमपि मालो०।
[6] A ०परिणमते।

पश्येत् । आत्मना सह पञ्चवर्णपरिणत्या च वामकर-
कलितपुस्तकं तदितरहस्तविन्यस्तप्रज्ञाखड्गं पञ्च[1]रत्ना-
लङ्कृतमकुटं आकुञ्चितपञ्चचीरं बन्धूककान्तिवसनयुगलं
यथायथमुचितस्थाननिवेशितरुचिरशृङ्गाराभरणं स्मित-
स्फुरत्कपोलस्थलं शरदभ्रेन्दुमिवैकच्छतावस्थानमन्ध-
कारचकितमिव पुञ्जीकृतमालोकयेत् । ततः स्वहृदि सर्व्व-
वर्णग्रामणीपरिणतमष्टारचक्रं भ्रमदङ्कुरीभावेन स्पृशन्
तदुद्भूतमिन्दुबिम्बं तच्च च तर्ज्जनितमणिलतां तन्मुष्टौ
च तथाभूतमेव सञ्चयं स्वदेहे रोचिःप्रवाहेन
प्लावयन्तमिव निरन्तरं दिगन्तराणि निर्य्यद्विप[2]ज्योतिषि
विश्वदलकमलोपरि[3] स्थितमकलङ्कशशाङ्कमण्डले रचित-
निविडवज्रपर्य्यङ्कस्थितं मञ्जुश्रियमात्मानमवलोकयेत्[4] ।
तच्च च तदेव महाप्राणमष्टारमीक्षेत । खड्गादिपरिणामेन
च प्रागुक्तवर्णचिह्नादिसमन्वितं मञ्जुघोषं भावयेत् । तदग्र-
पृष्ठयोश्च स्वस्वबीजजनितनिस्त्रिंशानुमोदोत्पादितेन्दु-
बिम्बात्मनोर्ननिदानैः सूर्य्यप्रभचन्द्रप्रभौ नायकाङ्कतौ
चिन्तयेत् । अनेनैव विधिना विचित्रपरिधानोत्तरीये
चिरत्नमुकुटिन्यौ स्वानुरूपाभरणभूषिते केशिन्युपकेशिन्यौ
सव्यावसव्यवर्त्तिन्यौ ध्यायात् । पञ्चानामष्टारचक्रदेव-
तानां तथाविधस्वहृदयकुमुदिनीप्राणनाथे स्वस्वबीजं
नीहारकरगौरजटिलं पश्येत् । ततो नायकमनोऽन्तः स्थ-

[1] N ०रत्नकृत० । [2] A ०दमुचो० ।
[3] A ततो अष्टौ । [4] A ०दक्षोभि ।
[5] A ०दलोपरि० ।
[6] AC repeat ततः स्वहृदि.....तथाभूतमेव after this.
[7] A ०ग्रानुत्पादि०, C ०ग्रानुत्पादोत् । [8] AN ०ख० ।

बीजकिरणनालिकां कुटिलकोटिं शिरसा निर्गत्य सकल-त्रैधातुकमवभासयन्तीमासनकमलदले धारयित्वा समय-सत्त्वाभिन्नस्वरूपं ज्ञानसत्त्वमानयन्तीं विभावयेत्। तेन चाग्रतोऽवस्थितेन मनसा विहितविविधपूजनेन हुँ वँ जः होरित्युच्चारयन्नैक्यमालम्बेत। तदनन्तरं झटिति स्थिर-दक्षिणावर्त्तत्वरितमष्टारचक्रं भ्रमत् चन्द्रमण्डलस्थितास्च पञ्चार्य्यदेवताश्चला निरीक्षेत। अथ रोमकूपविवरैः निःसृत्य सकललोकमवभास्य आसनमृगलाञ्छनानन्तरं प्रविशन्तं मयूखसमूहं पुनः पुनः यावत्खेदं चिन्तयेत्। ध्यानविरमश्च क्रमेण परिगत[2]शरत्काण्डपाण्डुराणि वदनतो[4] निर्गच्छन्त्यक्षराणि विचिन्तयन् षडक्षरं मन्त्र-राजं जपेत्। अचापि विमुख उत्थाय यथासुखं देवताहं-हृतिर्विहरेदिति।

कृपाणपाणेर्व्वरवाचि [1]चञ्चलं
गिरां[5] गुरोर्मञ्जुवरस्य साधनम्।
विलिख्य सम्प्रापि [3]मयेह यद्धितं
प्रयातु तेनाशु जनो जिनास्पदम्॥

॥ अर[6]पचनसाधनम्॥

[1] A •त्रैच्च•।
[2] परिगत• dropped in AN.
[3] AN •राशि•।
[4] AN वदगो।
[5] AN •चक्रगि•।
[6] A गिरं, N गिराद।
[7] A मयद्धितं।
[8] AC •पच्चग•।

66.

श्रीवज्रधर्म्मं धूतदोषजालं
वाङ्मण्डलस्फारितरश्मिजालम् ।
समस्तसम्बुद्धवचःस्वभावं
वाक्साधनं संप्रणिपत्य वक्ष्मि ॥

मन्त्रं स्वभावेन विशुद्धरूपं
प्रोच्चार्य्य बीजानिललाञ्छितः सन् ।
मायामरीच्युदकचन्द्रकल्पं
विभावयेल्लोकमिमं समग्रम् ॥

पँकारबीजप्रभवं विभाव्य
विश्वाम्बुजं सर्व्वविशुद्धरूपम् ।
अकारजन्मानमनन्तभासं
संशुद्धचन्द्रं च कलासमग्रम् ॥

पुनश्च गुह्यं परमं पवित्रं
बीजाक्षरं प्रक्षरदंशुजालम् ।
बन्धूकपुष्पद्युतिसन्निकाशं
वाचां प्रपञ्चप्रसरैकहेतुम् ॥

तद्बीजसम्भूतमभूतदोषं
समाधिमुद्रार्पितपाणिपद्मम् ।
वज्रासनस्थं करुणाभिरामं
श्रीवज्ररागं परिशुद्धरागम् ॥

---

[1] A मन्त्र०, N मन्त्रो । [2] A विशुद्धिरूपं, AbNNbC विशुद्धरूपः ।
[3] A वीर्य्यानील०, NNbc वीर्य्यानिल० । [4] Ab अङ्कार० ।
[5] Ab ०भाक्षरं ।

रोमोद्गतोद्भूतविशुद्धबुद्धं
जीमूतजालैर्जगतो हितानि ।
कुर्व्वन्तमत्यन्तविशुद्धबुद्धिं
विभावयेत् सर्व्वजगत्स्वभावम् ॥

हृच्चन्द्रबिम्बे कुलिशं निरीक्ष्य
ज्वालाभिरुद्भासितसर्व्वलोकम् ।
हुँकारनादादुपपन्नरूपं
पञ्चात्मकं निर्गतबुद्धमेघम् ॥

तन्मध्य[4]क्षूचीस्फुटकोटिपीठ-
निविष्टदेहं त्रिभवावभासम् ।
महाक्षरं विक्षत[5]भूरिभूतं
सन्तानदुःखप्रसरान्धकारम् ॥

तस्यो[6]च्चरच्चारुमरीचितानै-
र्बालार्कबिम्बामलरम्यरागैः ।
प्रज्ञाग्रदूतीं[7] शुभवाक्प्रसूतिं
जिह्वां विनिष्याद्य च वज्रभृताम् ॥

तदग्रभागे ललितोग्ररागे
विचिन्तयेत् तत्त्वमुदाररोचिः ।
आत्मप्रभावैरनिवार्य्यवीर्य्यै-[10]
र्निर्भ्राजयेद् वादिवरप्रभावम् ॥

---

[1] Ab ०बुद्धः ।
[2] Ab ०मेकं ।
[3] ACAbNNb विक्षित० ।
[4] A ०चचाद ।
[5] AN ०दूतिं, C ०ड्डेतिं, Ab ०ड्डतिं ।
[6] N घंका० ।
[7] ACNAbNb तन्मध्ये ।
[8] A ०भूम्रतं ।
[9] ACNNb ०राग्नैः ।
[10] Ab वीजैः ।

प्रतिक्षणाभ्यासबलोपपत्ते-
वाक्साधने[1] सिद्धिमुपागतेऽस्मिन् ।
गद्येन पद्येन वदत्यजस्रं
शास्त्राणि चित्राणि च वेत्ति योगी ॥

शास्त्राणि चित्राणि करोत्यवश्यं
स्वयं महार्थानि जगन्निमित्तम् ।
जानाति चामौ परचित्तवृत्ती
रागाद्यवद्योपहृताश्च तास्ताः ॥

तस्मिन् समाधौ दृढतां प्रयाते
सूक्ष्मक्षतीव्रस्फुटनिश्चयेन ।
समस्तबुद्धाम्यदमूर्त्तिधारी
भवत्यमौ नात्र विचारणीयम् ॥

अभ्यासयोगेन भवन्ति पुंसां
भूतान्यभूतानि पुरःस्थितानि ।
कामाकुलानामिव रम्य रामा-
श्चित्तानुयातानुयोगयुक्तिः ॥

इति कुशलमुपार्जितं मया यद्-
विदधतु[10] तेन जना जिनाग्रलक्ष्मीम् ।

---

[1] A वांक्यधनं ।
[2] The MS Ba proper begins here and follows A, N and C materially in arrangement.
[3] NCBBa ०हृत्तिं ।
[4] Ab ०स्थिताश्च ।
[5] A सगुह्य०, N खमृह्य०
[6] A भगवत्तमौ ।
[7] अभ्यासयुक्ते ।
[8] A रर्घ्य०, Ba रध्य० ।
[9] C ०मुक्तिः ।
[10] ANCBBa ०विधत्त ।

विगतभयविषादशोकशल्यां
शशधररश्मिमनोरमां समीहे ॥

अविरतकुशलानुरक्तचित्ता
गुरुवरलब्धसुखोपदेशशीलाः ।
इति सकलकुलोपनीतवृत्ति-
श्रियमनुयान्तु समाधिवश्यहर्षाः ॥

अहमपि सुजनो भवेयमुच्चै-
र्ज्वलदनलावलीमध्यवर्त्तिमूर्त्तिः ।
गुरुतरकरुणः कपालमाली
जलधरपूर्णघनाभिनीललक्ष्मीः ॥

कृतं सुजनभद्रेण वाचां साधनमुत्तमम् ।
एतेन साधयेद् वाचं वाचामीश्वरतां व्रजेत् ॥

[7]ॐ आः ह्रीः हुँ ॥

॥ वाक्साधनम् ॥

---

[1] Ab •रमाच्च ।
[2] Ab •लोला ।
[3] ANC यतिकमल• ।
[4] ABa •वर्षाः ।
[5] ABa •लावर्त्ति•, B •लावलिमध्य• ।
[6] Ab •माला ।
[7] This *Mantra* is found only in B.
[8] The Colophon is read differently as वाग्वज्रसाधनं समाप्तमिति in Ab.

67.

सिद्धैकवीरमन्त्रघोषसाधनार्थं चतुरस्रमण्डलकं कृत्वा तन्मध्ये ॐ वज्रसत्त्व[1] सिद्ध हुँ स्वाहेति पुष्पं दद्यात्। पूर्व्वादिदिक्षु ॐ वीरसत्त्व अधिष्ठान हुँ [2]स्वाहेति पुष्पं दद्यात्। ॐ समयसत्त्ववीर हुँ स्वाहेति पुष्पं दद्यात्। ॐ अक्षयसत्त्वज्ञान हुँ स्वाहेति पुष्पं दद्यात्। ॐ ज्ञानसत्त्ववज्र हुँ स्वाहेति पुष्पं दद्यात्। एवं धूपादिकं दद्यात्। पूर्व्वादिदिक्षु ॐ यमान्तकाय हुँ स्वाहेति पुष्पं दद्यात्। ॐ प्रज्ञान्तकाय हुँ स्वाहेति पुष्पं दद्यात्। ॐ [3]पद्मान्तकाय हुँ स्वाहेति पुष्पं दद्यात्। ॐ विघ्नान्तकाय हुँ स्वाहेति पुष्पं दद्यात्। [4]आग्नेयादिविदिक्षु ॐ टक्कि-राजाय हुँ स्वाहेति पुष्पं दद्यात्। ॐ नीलदण्डाय हुँ स्वाहेति पुष्पं दद्यात्। एवं ॐ महाबलाय हुँ स्वाहा। ॐ अचलाय हुँ स्वाहेति पुष्पं दद्यादिति मण्डलपूजा [5]यथाविभवतः कार्य्या। अध्यात्मपूजायै[6] मुचिसमुदाचारो भूत्वा मनोऽनुकूले प्रदेशे सुखासनोपविष्टः स्वहृदये सित-पँकारपरिणतसितपद्मवरटके अकारपरिणतचन्द्रमण्डल-स्योपरि सित ॐकारं पञ्चवर्णरश्मिकं भावयेत्। ततो निःसृतरश्मिभिरापादतलाद् वालाग्रपर्य्यन्तप्राप्तं भाव्यते। तद्रश्म्यवभासेन पञ्च स्कन्धा विशोध्यन्ते, अनादिकालीन-रागद्वेषमोहादयश्चापनीयन्ते। तेषामपगमात् ततः पञ्च

[1] N ॰सत्त्वो।
[2] Instead of स्वाहेति पुष्पं दद्यात् Ba reads स्वाहा only in all places in this *Sādhana*.
[3] ANC यमान्तकाय। [4] NBa चक्रादि॰।
[5] ABa विभवतः॰। [6] N ॰पूजापि।
[7] AC drops पञ्चवर्णरश्मिकं.....॰वभासेन।

स्कन्धाः पञ्चतथागतस्वरूपा भाव्यन्ते ततस्ते रश्मयो बीजाक्षरे प्रविशन्तश्चिन्तनीयाः। ततो निर्म्मलीभूतचित्तसन्ताने करुणामैत्रीमुदितोपेक्षा भावयेत्। तत्र दुःखाद्[1] दुःखहेतोः समुद्धरणलक्षणा करुणा, जगदेकपुत्रप्रेमलक्षणा मैत्री, व्यवसायसंसिद्ध्युपायदर्शनात्[2] प्रहर्षणं मुदिता, बीजाक्षरमेव मञ्जुघोषरूपेणात्मानं निष्पादयितुमवधाय अष्टलोकधर्म्मेषु उपेक्षणं उपेक्षा। इत्थं चतुर्ब्रह्मविहारं भावयित्वा पुनर्बीजाक्षरान्निःसृतरश्मिभिः षड्गतिकसत्त्वानां रागद्वेषमोहमानादिसमस्तदोषा अपनीयन्ते। सत्त्वान् निष्क्लेशीकृत्य प्रतिनिवर्त्तन्ते रश्मयो बीजाक्षरे प्रविशन्ति। पुनर्बीजाक्षरान्निःसृत्य रश्मयः परिशुद्धसत्त्वधातुं स्वकीयेनावभासेनावभास्य सिद्धैकवीरमञ्जुघोषरूपेण गगनतलमापूर्य्य प्रतिनिवर्त्तन्ते रश्मयो बीजाक्षरे प्रविशन्ति। पुनर्बीजाक्षरान्निःसृत्य रश्मिभ्यो निर्गतपूजादेवीभिः सिद्धैकवीरमञ्जुघोषभट्टारकः पुष्पधूपादिभिः पूज्यते[3]। पूजितः सन् प्रसन्नो भवति। ततस्तेषामग्रतः पापदेशना-अकरणसंवर-पुण्यानुमोदना--पुण्यपरिणामना--आत्मभावनिर्य्यातना-मार्गाश्रयण-त्रिशरणगमन बोधिचित्तोत्पादाः क्रियन्ते। पश्चात् पूजादेवत्यो बीजाक्षरे प्रविशन्ति। पश्चात्—

कृतो वः सर्व्वसत्त्वार्थः सिद्धिर्दत्ता यथानुगा।
गच्छध्वं बुद्धविषयं[4] पुनरागमनाय मुः॥

इति विसर्ज्जयेत्। एतेन पुण्यसम्भारार्थं[5] योगी जगदाकलयति। यदेतत् घटपटशकटलयनदेवकुलपर्व्वतादि-

---

[1] दुःखात् found only in Ba
[2] ANBa हर्षणं।
[3] ABa पूज्यन्ते।
[4] Ba ०विषये।
[5] ABa ०सम्भारज्ञानसम्भारा०।

चराचरं तत् सर्व्वं प्रतिभासमात्रं विचारेण प्रतिभासोपमं मायास्वप्नसदृशम्, अहमपि निःस्वभावः स्वप्नोपम इत्थं शून्यतां भावयन् शून्यतादृढीकरणाय मन्त्रं जपेत्। ॐ स्वभावशुद्धाः सर्व्वधर्म्माः स्वभावशुद्धोऽहमिति चिन्तयन् प्राक्तनशरीराहङ्कारं त्यक्त्वा योगचित्तमात्रेणावतिष्ठति। पश्चात् चिन्तयति किमर्थं अहं शून्यतायां गतस्तिष्ठामि। जगदर्थो मया कर्त्तव्य एवं चिन्तयन् तच्चित्तं सितपँकाररूपेण दृश्यते। तत्परिणतं च सितपद्मपत्रं च पद्मं तदरटके अकारपरिणतचन्द्रमण्डले अकारादिषोडशस्वरान् द्विगुणीकृत्य द्वाविंशल्लक्षणविशुद्धा तत्परिणतचन्द्रमण्डलं भावयेत्। तस्योपरि सित ॐकारं भावयेत्। आदर्शज्ञानस्वभावात्मकोऽहं इति पठति। ततः ककारादिचतुस्त्रिंशदक्षराणि षडक्षरप्रवेशात् चत्वारिंशदक्षरं द्विगुणीकृत्य अशीत्यनुव्यञ्जनविशुद्धा तस्योपरि द्वितीयं चन्द्रमण्डलं तयोरेकीभावात् समता। ततः समताज्ञानवान् समताज्ञानस्वभावात्मकोऽहमिति पठति। चन्द्रस्योपरि ॐकारं भावयेत्। तत्परिणतं च हेतुफलभूतं नीलोत्पलं भावयेत्। तस्य वरटके चन्द्रस्थ-ॐकारं भावयेत्। ततः प्रत्यवेक्षणाज्ञानवान् प्रत्यवेक्षणाज्ञानस्वभावात्मकोऽहमिति पठति। ततो बीजाक्षरान्निःसृत्य रश्मिभिः षड्गतिकसत्त्वानामन्वयेत्। यत्सिद्धैकवीररूपनिष्पन्ने मयि मदीयशरीरे प्रविश्य मञ्जुश्रीसुखं

A Ba इति।
N पद्मपद्मं।
A भावः।
ANC ०वीरनिष्प०।
C ०तिष्ठत्।
N आदर्श०, C आदर्शन०।
Ba ०स्फुरणभूतं।
A अपि दीपय०।

भोक्ष्यथ इति आमन्त्र्य ते रश्मयो बीजाक्षरे प्रविशन्ति। ततः कृत्यानुष्ठानज्ञानवान् कृत्यानुष्ठानज्ञानस्वभावात्मकोऽहं इति पठति। ततो बीजाक्षरान्निःसृत्य रश्मिभिरामन्त्रितषड्गतिकसत्त्वान् बीजाक्षरे प्रवेश्य समरसीभूय बीजचिह्नपराहत्या सिद्धैकवीरो भगवान् चन्द्रमण्डलस्थः चन्द्रोपाश्रयो जगदुद्योतकारी द्विभुज एकमुखः शुक्लो वज्रपर्य्यङ्की दिव्यालङ्कारभूषितः पञ्चचीरकशेखरो नानारश्मिगहन उत्तिष्ठति; वामे नीलोत्पलधरो दक्षिणे वरदः। हृदयेऽस्य सितपद्मस्थचन्द्रमण्डले ॐकारं तत्परिणतमुत्पलं तद्वरटके चन्द्रस्थबीजाक्षरं ततो निःसृतरश्मिभ्यः पूजादेवत्यः स्फुरन्ति द्विभुजाः सितवर्णाः दिव्यवारिपरिपूर्णकलशहस्ता जयतु जयतु श्रीसिद्धैकवीर इति वदन्त्यो भगवन्तं स्नापयन्ति। ततश्च भगवतो मौलौ अक्षोभ्यं देवत्यः पूजां कुर्व्वन्ति। ततः सुविशुद्धधर्म्मधातुज्ञानवान् ॐ सुविशुद्धधर्म्मधातुज्ञानस्वभावात्मकोऽहमिति पठति। ईदृशं भगवन्तं यावदिच्छं भावयेत्। भावनानन्तरं जापः ॐ वज्रतीक्ष्णदुःखच्छेदप्रज्ञाज्ञानमूर्त्तये ज्ञानकाय वागीश्वर अरपचनाय ते नमः। कदाचित् ॐ वाग्वेदं नमः इति जापानन्तरं स्तुतिपूजाप्रणिधानं कृत्वा उत्तिष्ठेत्। देवताहंकारेण सर्व्वलौकिककार्य्यं कुर्य्यात्।

॥ सिद्धैकवीरसाधनं समाप्तम् ॥

[1] A देव०।
[2] A वज्रभ्यः, Ba वज्रतः।
[3] कदाचित्.....नमः not found in Ba.
[4] A वाग्वे०।
[5] A द्विभुजानि।
[6] A देवेभ्यः।
[7] N ०सिद्धते।

68.

नमो वाग्वज्राय ।

पूर्ववत् शून्यतां विभाव्य पँकारजविश्वपद्मे [1]अकारज-चन्द्रमण्डलं तदुपरि रक्तह्रीःकारपरिणतमात्मानममि-ताभरूपं ध्यायात् समाधिमुद्राधरमरुणवर्णं वज्रपर्यङ्क-निषण्णम्। ततो हृच्चन्द्रे [2]हुँकारजपञ्चसूचिकं नीलवज्रमूर्ध तन्मध्ये सूचिकाग्रे रक्तआःकारं ध्यायात्, जिह्वाग्रे रक्त-ह्रीःकारमिति ।

॥ वाक्साधनम् ॥

69.

पूर्ववत् पापदेशनाद्यनन्तरं शून्यतामवलम्ब्य चन्द्रस्थ-मँकारबीजनिष्पन्नमार्यमञ्जुघोषं पीतमेकमुखं द्विभुजं पञ्चवीर[3]कुमारं सर्वालङ्कारभूषितं उत्पलधारिवामकरं लीला[4]वस्थितदक्षिणकरं सिंहासनस्थपद्मचन्द्रासीन[5]-मात्मानं झटिति ध्यायात्। ततोऽञ्जलिं बद्ध्वा तर्जन्याव-[6]नामिका[7]नखाश्रिते कृत्वा विकचोत्पलमुद्रा देया। ॐ वागीश्वर मुः इति जप्यमन्त्रः ।

॥ महाराजलीलमञ्जुश्रीसाधनम् ॥

---

[1] ANC अकार०।
[2] Ba ०सुचिक०।
[3] Ba नीला०।
[4] B ०नामिके०।
[5] Ba ०नील०, Ab ०लीला०।
[6] A omits.
[7] Ba पञ्चवीरं।
[8] Ab ०सनस्थ०, B ०सनालीन०।
[9] A मुखोश्रिते।

70.

नमो मञ्जुश्रिये ।

[1]षष्ठस्य पञ्चमं बीजं पञ्चमं[2]स्वरेणोपशोभितं शून्येना-[3]क्रान्तं तेनैव निष्पन्नं श्रीमञ्जुघोषं पञ्च[4]वीरकुमारं सर्व्वा-लङ्कारभूषितं द्विभुजं वामेनोत्पलधरं दक्षिणेन लीलया स्थितं सिंहासने आत्मानं कुमाररूपेण चिन्तयेत् । अस्य [5]मुद्रा हस्तद्वयेन सम्पुटाञ्जलिं कृत्वा तर्ज्जनीभ्यामना-मिकानखं[6] पिधाय उत्पलवद् विकचमंस्थितौ [7]हृदि ऊर्णायां कण्ठे मूर्ध्नि न्यसेत् । ॐ वागीश्वर मुः ।

॥ मञ्जुश्रीसाधनं समाप्तम् ॥

71.

मञ्जुवज्रं [1]प्रणम्यादौ शरत्सोमाभभास्वरम् ।
वक्ष्येऽहं साधनं तस्य संक्षेपात् स्फुटमुत्तमम् ॥

प्रथमं तावन्मन्त्री मनोऽनुकूले शुचिभूमिप्रदेशे सुखा-सनमध्यासीनः स्व[8]हृदयकारोल्लवचन्द्रमसि मँतत्त्वं शुभ्रं वि[9]न्यस्य तद्रश्मिभिर्व्योमापूर्य्य भगवन्तं गुरुभट्टारकं च गगने दृष्ट्वा ततो भगवतः [10]पुरतः स्थितो मनो[11]मय्या पूजया मञ्जुश्रियं गुरुभट्टारकं च पूजयेत् वन्देत च

---

[1] Ba षष्ठं ; all other MSS. have षष्ठपञ्चमं ।
[2] A •सत्त्वरेणो• ।
[3] A शून्यता• ।
[4] Ba •चोरकुमारं ।
[5] C मूल• ।
[6] A •मुखं ।
[7] C प्रणम्येन्दु• ।
[8] ANCB •हृदि च• ।
[9] A न्यस्य• ।
[10] ANC पुरतो, B पुरः ।
[11] Ba •मया ।

शुभरङ्ग्यर्थम्। ततः सर्व्वपापं प्रतिदेशयामि सर्व्वपुण्यमनुमोदयामि तत्त्वानुत्तरबोधौ[1] परिणामयामि आबोधेर्बुद्धं धर्म्मं सङ्घं शरणं गच्छामि उत्पादयामि सम्बोधिचित्तम्[2]। ततो भगवन्तं निजबीजेन[3] सहैकीभूतं दृष्ट्वा सर्व्वं चैधातुकं स्थावरं जङ्गमं प्रतीत्यसमुत्पन्नं स्वप्नमायाप्रतिबिम्बोपममविचारासहं विचिन्त्य प्रकृतिप्रभास्वरमेव केवलं परिशुद्धमात्मानं भावयेत्। ॐ स्वभावशुद्धाः सर्व्वधर्म्माः स्वभावशुद्धोऽहमित्यनेन दृढीकुर्य्यात्। पुनः प्रणिधानबलोत्पन्नचन्द्रमसि मँ वीक्ष्य तद्रश्मिस्फुरणैर्मञ्जुवज्रमात्मनि प्रवेश्यात्मानं मँकारोद्भवं ध्यायात् शरदिन्दुकराकारं पञ्चवीरकं सर्व्वाभरणभूषितं वामकरे नीलोत्पलधरं दक्षिणकरे वरदं विश्वकमलचन्द्रासने पर्य्यङ्कस्थितम्। ततः स्वहृदीन्दौ मँचन्द्रकान्तिमणिप्रभारश्मिभिर्गगनोदरवर्त्तिभिर्जगदर्थं कुर्व्वन्तं देदीप्यमानं[4] तावद् भावयेत्, यावत् खेदो न भवति। भावनाखिन्नो मन्त्रं जपेत् ॐ वाक्येदं नमः। उपहृदयं वा जपेत् ॐ ह्रीः हुँ। ततः शताक्षरं पठित्वा मञ्जुवज्राहङ्कारेणोत्थाय तथैव विहरेदिति। षण्मासेन वागीश्वरतामासादयति। सततताभ्यासयोगेन[5] इहैव जन्मनि बुद्धत्वमपि साधयति। एवं ध्यानस्थितः पूर्व्वसेवासप्तलक्षाणि जप्त्वा खड्गादिसिद्धयः साधनीयाः। ततः सोमग्रहे सूर्य्यग्रहे वा जातिलोहघटितं खड्गं स्वहस्तेन गृहीत्वा चन्द्रमपश्यन्

[1] Ab बुद्धबोधौ। [2] Ba सम्बोधे।
[3] A ०बीज, BC ०बीजेन, AbBa ०बीजे।
[4] ०वर्त्तिज० in AC. [5] AN दीप्य०।
[6] ABa सततभ्या०, A सदाभ्या०।

ताव[1]ज्जपेद् यावन्मुक्तो भवति खड्गविद्याधरो भवति। एवं वज्रचक्रत्रिशूल[2]शरमुद्गरपाशाङ्कुशादीनि [3]अञ्जनपादलेपतिलकवशीकरणद्रव्याणि मेलयित्वा साधनीयानि। [4]विद्याधरसाधनानि संस्कृत्य साधनीयानि। क्षीरभक्तेन दधिभक्तेन वा सघृतेन सशर्करेण पात्रं पूरयित्वा हस्तेन [5]चावष्टभ्य जप्त्वा भक्षणीयं पञ्चशतायुर्भवति। माषान् मुखे प्रक्षिप्य जपेदक्षुरिता भवन्ति तानभ्यव[6]हृत्य कविर्भवति श्रुतिधरो वाग्मी मेधावी च भवति। बिल्वानां लक्षहोमेन त्रैलोक्यराज्यमासादयति। यथालब्धसितकुसुमानां चतुर्लक्षं हुत्वा वाक्सिद्धिर्लभ्यते[7] वागीश्वरसमत्वं च[8]। [9]घृताक्तपञ्चव्रीहिहोमेन वा चतुर्लक्षमात्रेण यक्षिणीमाकर्षयति पातालकन्यां वा। ब्राह्मीचूर्णं बिडालपदमात्रमष्टशताभिमन्त्रितं प्रभाते मण्डलकं कृत्वा यथाविभवं भगवन्तं सम्पूज्य घृतेनारनालेन वा पिबेत्। [10]वचामर्द्धतोलकप्रमाणं तथैवाभिमन्त्र्य घृतेन क्षीरेण तैलेन वा मासमेकं पिबेत् जडतागद्गदमूकत्वं विनश्यति। षण्मा[11]सेनाश्रुतान्यपि शास्त्राणि प्रत्यक्षीभवन्ति, न जातु विनश्यन्ति। श्रुतिधरो मत्तकोकिलमधुरस्वरः स्पष्टवाक्यो भवति।

---

[1] Ba ०ज्यपेन्मुक्तो०। [2] ग्र्र found in BAb.
[3] After this A abruptly brings श्रुतिधरो.....०मासादयति from below.
[4] NAb विद्यारसाधनानि, Ba विद्याधरसाधनानि।
[5] Ba चावस्तभ्य। [6] ABa ०हृत्य।
[7] ANC ०र्लभते। [8] A ०समम्, Ba ०समत्वं, Ab ०समत्वं वा।
[9] Ba घृतोक्त०। [10] A वाचामर्द्ध, Ab वचोर्द्ध।
[11] N ०सेनैव अभ्र०।

तद्यथं शताक्षरमन्त्रः—ॐ वज्रसत्त्व समयमनुपालय, वज्रसत्त्वत्वेनोपतिष्ठ, दृढो मे भव, सुतोष्यो मे भव, सुपोष्यो मे भव, अनुरक्तो मे भव, सर्व्वसिद्धिं मे प्रयच्छ, सर्व्वकर्म्मसु च मे चित्तं श्रेयः कुरु, हुँ हहहह होः भगवन् सर्व्वतथागतवज्र मा मे मुञ्च, वज्रीभव महासमयसत्त्व आः ।

॥ आर्य्यमिङ्गैकवीरसाधनम् ॥

72.

पूर्व्वोक्तविधानेन शून्यताभावनानन्तरं सितपद्मोपरि शुक्ल-अकारजचन्द्रे सितधीःकारपरिणतमात्मानं मञ्जुश्रीभट्टारकं मिङ्गैकवीरनामानं सर्व्वाङ्गधवलं पर्य्यङ्कनिषण्णमेकमुखं द्विभुजं दक्षिणे वरदं वामे नीलोत्पलधरं दिव्याभरणसुन्दरं विचित्रपरिधानं झटिति निष्पाद्य शिरःकण्ठहृदये चन्द्रस्थ ॐ-आः-हुँकारान् पश्येत् । आःकारहुँकारयोर्मध्ये च धीःकाररश्मिभिर्जगदर्थं कारयन् मन्त्रं जपेत् ॐ वज्रतीक्ष्णदुःखच्छेदप्रज्ञाज्ञानमूर्त्तये ज्ञानकाय वागीश्वर अरपचनाय[1] ते नमः ।

॥ मिङ्गैकवीरसाधनम् ॥

This *Satakṣara Mantra* is dropped in C and Ba.

[1] ABa omit. [2] A •पच• ।

73.

नमोऽभिमन्मथाय[1] ।

सुन्दरानन्दनिःस्यन्दं शास्तुः सम्भोगविग्रहम् ।
नत्वा संक्षेपतो वक्ष्ये भृङ्गानङ्गस्य साधनम् ॥

आदौ तावद् रक्ताब्जपुञ्जप्रतिमं 'श्रीहेरुकरूपमात्मानं निष्पाद्य विज्ञप्तिमात्रं च वैधातुकमाकलय्य[2] स्वहृदये च सुरक्तषोडशार्द्वदलमहोत्पलकर्णिकायामालिकालिसंश्लेषरूपौ सकलबुद्धगुणानु[3]रक्तावकारहुँकारौ मनसाऽभिलिख्य ततस्ताभ्यामकारहुँकाराभ्यां सुरक्तमधुरमरीचिनिचयं निश्चार्य्य तेनैव चार्द्रकश्मीरजप्रतिममरीचिनिचयेन सत्त्वभाजनलोकान् विशोध्य तेषां च कायवाक्चित्तैः सह एकीकृत्यानीय तयोरेव अकारहुँकारयोर्बिन्दौ प्रवेशयेत् । [4]ततोऽकारहुँकारपरिणतं भ्रमरमिथुनं मसृणकुरुविन्दरत्नोपमं परमकारुण्यमकरन्दपानमत्तं अनवरतमुक्तातिदीर्घनाद[5]हुँकारमधुरविग्रहं नैरात्माहेरुकस्वभावं विचिन्तयेत् । ततोऽस्यैव हृदि कौसुम्भरागरञ्जितजलबिन्दुसदृशौ सविषयसूक्ष्माकारहुँकारौ पश्येत् । तदनु तन्मिथुनं प्रश्वासवायुरथारूढं नासिकाविवरेण निःसृत्य वैधातुकसंस्थितानां सत्त्वानां[7] कायवाक्चित्तानि विशोध्य गृहीत्वा च पुनराश्वासवायुमारुह्य तेनैव पथा स्वहृत्कमलकर्णिकायां प्रविशेत् । प्रविश्य चानीतकायवाक्चित्तानां स्वकायवाक्चित्तैः समतामधिमुच्चेत् । एवं

---

[1] Ab •मथनाय । [2] A मन्यो• ।
[3] A •कस्य य । [4] A रक्तौ च उंका•, NC रक्तौ अंकार• ।
[5] A तथा अका•, C आका• । [6] नाद dropped in A.
[7] सत्त्वानां dropped in Ab.

पुनः पुनर्भावयेत् यावज्झगिति[1] व्यक्ततरा[2] प्रतीतिरुपजायते। पश्चात् साध्यस्य साध्याया वा हृदये झगिति रक्ताष्टदलकमलं विभाव्य आत्मनो हृत्कमलकर्णिकायास्तद्भ्रमरमिथुनं प्रश्वासवाय्वारूढं[3] नासिकाविवरेण निःसृत्य साध्यनासिकाविवरेण स्वकायवाक्चित्तस्वरूपहृत्कमलकर्णिकायां प्रविशेत्। प्रविश्य तस्य हृदयारविन्दस्य कायस्वरूपेण परागं[4] नात्मानं धूसरयति[5]। वाक्स्वरूपं च मकरन्दं पिबति, चित्तस्वरूपं च पुष्करं खादति। तदनु साधकः स्वकीयाश्वाससमीरणाकृष्टं साध्यस्य नासिकाविवरेण निःसृत्य आत्मनो नासिकारन्ध्रेण हृदयमहोत्पलकर्णिकायां प्रविश्य[10] पतन्तं कम्पयित्वा कायस्वरूपं परागं त्यजन्तं वाक्स्वरूपं मकरन्दं चित्तस्वरूपं पुष्करं चोद्गमन्तं[11] चिन्तयेत्। पुनस्तथैव गत्वा तथैव प्रविश्य तथैव गृहीत्वा[12] तथैव चागत्य तथैव त्यजन्तमुद्गमन्तं च चिन्तयेत्। एवं पुनः पुनर्यावदनुरागं दर्शयति। अनुरागदर्शनाद् विधेयताऽवगम्यते। अवगम्य च यथाभिमतसिद्ध्यर्थं यतेत। अत्र चानया भावनया खलनां मर्म्मखलसमानसां मदनविह्वलदेहां साधक[13]नामाङ्कवचनप्रबन्धां रत्युत्सुकां कारयित्वा यदि दोषदर्शनान्नानुरमते तदा महदेव दूषणमापद्यते। तस्मादादावेव सद्विपर्य्यासविषयोऽवधारणीयः। अवधार्य्य च भावना विधेयेति।

---

[1] A यावज्झगिति। [2] A वक्तव्यतरा। [3] A मनोरुह्य०।
[4] A वाय्वारूढं। [5] AN रागे०। [6] A धूसयति।
[7] A ०स्वरूपेण। [8] B पुष्करं। [9] A ततः।
[10] A ०कायोपविश्य। [11] A चोद्गमं, N चोद्गमन्तो।
[12] A गत्वा। [13] AN साधन०।

विधायासादितं पुण्यमलिमन्मथसाधनम् ।
यदत्युच्चैर्जनस्तेन भूयात् श्रीकरुणाचलः ॥

[1]लडहविलआण हिअअं मअणा[2]लसधुस्सिरं [3]कअं जेण ।
रअणंकरेण रईअं अलिवम्महसाहणं तेण ॥

॥ अलिमन्मथसाधनम् ॥

74.

[4]नमो मञ्जुनाथाय ।

प्रथमं तावत् निराभासीकृत्य सचराचरं तदुद्भूतमात्मानं अष्टवर्षाकृतिं श्वेतवर्णं सर्व्वालङ्कारभूषितं भावयन् मञ्जुघोषं, नाभिदेशे हुँकारेण सूर्य्यमण्डलं, तदुपरि होकारेण विचित्रोत्पलं, तस्योपरि चन्द्रमण्डलं भावयेत् । तदुपरि वज्रतीक्ष्णं कनकवर्णं सर्व्वालङ्कारभूषितं दक्षिणे करे खड्गं वामे करे प्रज्ञापारमितापुस्तकं द्वौन्द्रियसमापत्त्या भावयेत् । ॐ वज्रतीक्ष्ण सुरतस्त्वं(त्वं) मनसा जपेत् । स्वदेवतामण्डलचक्रं प्रति भाषयेत् । मञ्जुघोषसम(यं) दृष्टैव जन्मनि भवति— ॐ शून्यताज्ञानवज्रस्वभावात्मकोऽहं, ॐ वज्राभिषेकं सर्व्वबुद्धा ददन्तु माम् ।

॥ वज्रतीक्ष्णभट्टारकस्य साधनं समाप्तम् ॥

[1] छाया— लटभवनितानां हृदय मदनालसघूर्णितं कृतं येन ।
रत्नाकरेण रचितमलिमन्मथसाधनं तेन ॥

[2] A मअणो०, N मआनो० । [3] Ab कअवेण, B कअङ्करेण ।

[4] Ab अलिवमहसाहणं तेण, B अलिमन्महभाणमन्तेण ।

[5] This *Sādhana* is found only in Ab. *See.* Fol. 39.

75.

नमो मञ्जुश्रिये।

श्रीमच्छ्रवज्रस्य विधाय रूपं
मंरक्तवर्णोज्ज्वल[1]रश्मियुक्तम्।
निर्व्वर्त्य[2] सम्यक् स्वरषोडशानि
सञ्चिन्त्य वज्रं हृदि पद्ममध्ये॥

बन्धूकपुष्पाक्षतितुल्यरूपा
आलम्बनीयाः खलु षट्पदाख्याः।
निःश्वासवातेन शनैरशेषा
निश्चारणीया निजनासयाऽमी[3]॥

सञ्चिन्त्य माध्यं पुरतः स्थितं च
कृताञ्जलिं घृर्णित[4]नेत्रयुग्मम्।
नामापुटेनैव शिखीमुखान्ते
माध्यस्य भावा हृदये विशन्तः॥

[5]आचूषयन्तो हृदि पद्मलीनं
तस्यैव चेतो मकरन्दमार्य्यैः।
निष्क्रम्य तस्माच्च पुनर्विशन्तः
तत्रैव चिन्त्याः[6] खलु लीयमानाः॥

विधानमेवं स्थिरयुक्तचित्ताः
कुर्व्वन्ति ये सन्ध्य[7]चतुष्टयं तु।

---

[1] AC ०रक्तरश्मि, N ०रक्त, Ab ०वर्णरश्मि, Ba ०रश्मिपुञ्ज।
[2] Ba निर्हृत्य, AC निहृत्त।
[3] A ०नाग्रमामि, Ab ०नासयामि, B ०नाग्रयायी।
[4] ANCBa घूर्णित०।
[5] From आचूषयन्तो to the end of this *Sādhana* is not to be found in Ab and B.
[6] A पद्मलीनं। [7] A चिन्ताः। [8] N चतुर्थं यत्न।

आखण्डलं चापि चतुर्दशेन्द्रै-
र्दिनैरलं ते वशमानयन्ति ॥
लब्धं मया मद्गुरुसन्निकाशात्
श्रीमञ्जुघोषैकविधानमेतत् ।
इत्यत्र किञ्चिन्न विकल्पनीयं
भवेदिदं किं न च सम्भवेद् वा ॥
आकृष्टिमेतां खलु चित्तमंत्रां
शुभाकराख्येन यथोपदिष्टाम् ।
कुर्वन्तु सन्तः परिमुच्य सर्वं
कृता मयाऽस्य गुरुणापि चैषा ॥
यन्मेऽत्र किञ्चित् कुशलं सुनिर्म्मलं
प्राप्तं लिखित्वा वरषट्पदाष्टम् ।
तेनैव सत्त्वा निखिला भवन्तु
श्रीमञ्जुनाथेन सहैव युक्ताः ॥

॥ कृतिरियमाचार्य्यशुभाकरपादानाम् ।

एतानि साधनवराणि मया लिखित्वा
सर्व्वेण यत् कुशलमाप्तमतीव शुद्धम् ।
तेनैष लोक इह सौख्यकरं जिनत्वं
प्राप्नोतु हीनभवभीतिरतिप्रकृष्टः ॥

। वश्याधिकारमञ्जुश्रीसाधनम् ॥

---

[1] Ba •ईशादे, N •ईशार्दै । [2] A •नैरन्ते, NC •नैवन्ते ।
[3] AC मया सद्गु•, N मयाकृद्गु• । [4] Ba भवन्तं ।
[5] Ba सहैक । [6] C कृतिराचार्य्य• ।
[7] AN •मवाप्त• । [8] A भीतिप्रकृष्टः । [9] A वश्याधिको• ।

76.

मञ्जुश्रीसाधनं गुह्यमधुना साधु कथ्यते[1] ।
संक्षिप्तमतिविस्पष्टमज्ञानतिमिरापहम् ॥

पूर्वोक्तविधानेन [2]स्वहृच्चन्द्रे पीतमुःकारपरिणतं मञ्जुकुमारं त्रिमुखं षड्भुजं कुङ्कुमारुणनीलसितदक्षिणेतरवदनं सत्त्वपर्य्यङ्किनं खड्गबाणवरदं दक्षिणकरत्रयं प्रज्ञापारमितापुस्तकनीलोत्पल चापवद् वामकरत्रयं सम्भृङ्गारकुमाराभरणनिवसनादिकं नानापुष्पमहाशोभाचीरत्रयविराजितं तथागतपरमाणुपरिघटितमात्मानं ध्यात्वा ॐ मुः इति मन्त्रं जपेत् ।

॥ मञ्जुश्रीमाधनम् ॥

77.

पूर्वोक्तविधानेन शून्यताभावनानन्तरं पद्म चन्द्रमण्डलोपरि सितबिन्दुं विभाव्य स्फुरणादिपूर्व्वकं तत्परिणामेन सितधीःकारजं केवलमेव सितं अरपचनमञ्जुश्रियं स्वबीजहृदये विचिन्त्य ॐ धीः स्वाहेति मन्त्रं जपेत् ।

॥ इति विद्याधरपिटकीयसंक्षिप्तमञ्जुश्रीसाधनम् ॥

---

[1] A गुह्यमधु कथ्यते ।
[2] B drops स्वहृच्चन्द्रे ।
[3] Ba ०चापवाम० ।

78.

विदध्यादादितो मन्त्री बुद्धादीनां प्रपूजनम् ।
पुण्यानां परिणामाद्यं ततो मैत्र्यादिभावनाम् ॥
हृच्चन्द्रबिम्बमध्यस्थं मन्त्री बिन्दुं विचिन्तयेत् ।
दिवाकरकरोत्सृष्टहिमबिन्दुसमप्रभम् ॥
तद्बिन्दुकिरणैर्ध्यायात् प्रतिरोमविनिर्गतैः ।
जगत् सर्व्वं वितत्यादिक्रमेण विषदीक्षितम् ॥
सितधीःकाररूपं च बिन्दुमन्तर्गतत्विषम् ।
हृष्टारपचनं पश्येत् तत्सर्व्वपरिणामतः ॥
अन्तर्निहितधीःकारं हृदि हृष्टेन्दुमण्डलम् ।
नासया निःसरेत् पश्चात् तन्मरीचिकदम्बकम् ॥
मञ्जुघोषाक्षतौन् सत्त्वान् ध्यायादुच्छ्वासवायुना ।
निःश्वासवायुना पश्चाद् धीःकारे संहरेदमून् ॥
स्वाहान्तं प्रणवाद्यं तु मन्त्रबीजाक्षरं जपेत् ।
शरच्चन्द्रकराकारं हृच्चन्द्रमण्डलस्थितम् ॥

॥ विद्याधरपिटकप्रतिबद्धमञ्जुघोषसाधनम् ॥

---

[1] ANBa ०दीनाञ्च पूज० । [2] ABa वितत्यादि० ।
[3] ANC निःसरत्यक्षत् ।

79.

प्रदीपकलिकाकार[1] निर्म्माणाज्ञेन्द्रमध्यगः ।
हँकारद्रावको वीरो रवि[2]गुणेन देशितः ॥

हुँ आः प्रज्ञावृद्ध्यधिकारः । झटिति मञ्जुश्रीयोगमालभ्य नाभौ चन्द्रमण्डलोपरि सितबिन्दुं प्रदीपकलिकाकारं सरश्मिकं विचिन्त्य शिरसि सितहँकार[3]मनाहतं लम्बमानमस्तकं सरश्मिकं ध्यायात् । तद्वद् बिन्दुरश्मिना सञ्चोद्य द्रवी[4]भूतेन हँकारेण तं बिन्दुमाप्लावयन् स्थिरचित्तो मन्त्री न चिरेण प्रज्ञामभिवर्द्धयतीति ।

नाभिदेशोपरि व्यक्तरक्तधर्म्मोदयान्तरे ।
पञ्चारनीलदम्भोलिकरो(रटो)द्भासिततेजसः ॥
सितहँकारतो जातं शिरः सन्धिविनिर्गतम् ।
पश्येन्नादं[5] नभोव्यापिधूम्रहँकारसम्भवम् ॥

नादो रश्मिरेखा ।

॥ इति प्रज्ञावृद्धिविधिः ॥

---

[1] Ba ०कलिकालो ।
[2] A अवि० ।
[3] Ba ०हृद्धिकार० ।
[4] N ०ङ्कार० ।
[5] A भूतेनाहं. B भूत हं ।
[6] A पश्येन्नाहं ।

80.

गुरुपादं सदा नत्वा वज्राचार्य्यं तथैव च ।
प्रणम्यादौ लिखिष्यामि मञ्जुश्रीर्येन सिध्यति ॥

सत्त्वपर्य्यङ्कमासीनो हृदीन्दावः[1]कार[2]भूषितम् ।
शङ्ख[3]कुन्दोज्ज्वलं बीजं विश्वरश्मिसमाकुलम् ॥

तैर्निष्पन्नाः 'सम्बुद्धगुरुबोधिसत्त्वा महर्द्धिकाः, तान् दृष्ट्वा पूजयेदनेन मन्त्रेण ॐ वज्रपुष्पे हुँ, ॐ वज्रधूपे हुँ, ॐ वज्रदीपे हुँ, ॐ वज्रगन्धे हुँ, ॐ वज्रनैवेद्ये हुँ । ततः—

रत्नत्रयं मे शरणं सर्व्वं प्रतिदिशाम्यघम् ।
अनुमोदे जगत्पुण्यं बुद्धबोधौ दधे मनः ॥
आबोधेः[5] शरणं यामि बुद्धं धर्म्मं गणोत्तमम् ।
बोधौ चित्तं करोम्येष स्वपरार्थप्रसिद्धये ॥

उत्पादयामि[6] वरबोधिचित्तं
निमन्त्रयाम्यहं सर्व्वसत्त्वान् ।
दृष्टां चरिष्ये वरबोधिचारिकां
बुद्धो भवेयं जगतो हिताय ॥

इति । प्रणिधिपूर्व्वकं सर्व्वधर्म्मनैरात्म्यं भावयेदनेन मन्त्रेण ॐ शून्यताज्ञानवज्रस्वभावात्मकोऽहम् ।

---

[1] Ab वं ।
[2] A •भृतो, N •भूषिते, Ab •भूषिताः ।
[3] Ba •कुन्दो• ।
[4] Ab सम्बुद्धं गुरुबुद्धं बोधिसत्त्वमहर्द्धिकाः ।
[5] Ba आबोधौ ।
[6] ABa adds परमं after उत्पादयामि ।
[7] B •मि अहं, N •मि अम, C •मि वज्र, AbBa •मि वज्र ।

बीजं मायोपमाकारं[1] वैधातुकमशेषतः।
दृश्यते स्पृश्यते चैव यथा माया हि सर्व्वतः[2]।
न चोपलभ्यते चैवं सर्वस्य जगतः स्थितिः॥

इति अधिमोक्षं कुर्य्यात्। ततोऽनादिकालीनमसत्कल्पनाबीजमपनीय स्वभावशुद्धिमधिमुच्चेत्[3] ॐ स्वभावशुद्धाः सर्व्वधर्म्माः स्वभावशुद्धोऽहमिति। ततः पूर्व्वोक्तबीजनिष्पन्नं खड्गं [4]तत्सरुमध्ये चन्द्रमण्डलं तस्योपरि पूर्व्वोक्तबीजं तत्सर्व्वपरावृत्त्या मञ्जुश्रीरूपमात्मानं विचिन्तयेत् अहमेव सर्व्वजगत्पतिरिति पद्मचन्द्रासनस्थं सत्त्वपर्य्यङ्कसमासीनं शशिप्रभमनेककिरणस्फुरणैर्व्याप्तनभःस्थलं विचित्र[5]परिधानं जगदानन्दस्वरूपं शुक्लवर्णं मनोरमं पञ्चचीरं महावीरं सर्व्वालङ्कारभूषितं दक्षिणे उद्यतखड्गकरं वामहस्तेन हृदि गृहीतपुस्तकम्। ततो मुद्रां बध्नीयात्। हस्तद्वयेन सम्पुटाञ्जलिं कृत्वा [6]तर्जनीभ्यामनामिकानखौ पिधाय उत्पलवद् विकचसंस्थिते हृदूर्णाकण्ठमूर्द्धसु विन्यस्य[7] मन्त्रेण पश्चान्नाभेरधो [8]ॐकारेण शुक्लवर्णमश्वत्थपत्रसदृशं चिन्तयेत् चन्द्रमण्डलम्। तस्योपरि अष्टमस्य चतुर्थं प्रथमषोडशेन [9]भूषितं सप्तमस्य

[1] A adds vichintya after ०पमाकारं।
[2] After the second line A has—
न चोपलभ्यते चैव यथामाया हि सर्व्वतः।
[3] ANC ०शुद्धमित्यधि०।
[4] Ab तत्सरुक, A तत्सनु०।
[5] ANC ०विचित्रवस्त्र०।
[6] B तर्ज्जन्यौ विधाय, Ab तर्ज्जन्यौ धना०।
[7] ANCBa न्यस्य। [8] AN ङ्कार०।
[9] भूषितं is found only in Ab.

द्वितीयेन प्रथमं चतुर्थेन च भूषितं तन्विष्यन्नां पङ्कज-कलिकां नाभेरुपरि हँकारेण विकसितां चिन्तयेत्। तस्योपरि चन्द्रमण्डलं तस्योपर्य्यङ्गुलान्तरं त्यक्त्वा [1]षडर-चक्रं सतेजः तस्यारेषु द्वादशमाचाणां [2]युग्मयुग्माक्षरं न्यसेत्। प्रत्येकारस्योपरि मूलमन्त्रस्यैकैकाक्षरं विन्यस्य चक्राभ्यन्तरवरटके धौःकारं मकिरणं निश्चलं भावयेत्। बाह्यवरटके कालियोगं [3]मुज्ज्वलं [4]ङञणनमाक्षररहितं चिन्तयेत्। पुनरूर्ध्वतोऽङ्गुलम[5]न्तरं त्यक्त्वा चन्द्रमण्डलं तस्योपरि [6]अरपचन इति दृष्ट्वा शीघ्रतरं चक्रं भ्रमद् भावयेत्। षण्मासान् यावत् जपेदनेन मन्त्रेण ॐ वज्रतीक्ष्ण [7]मुः। प्रतिदिनमयुतमेकं जपेत्। ततो जडोऽपि वाक्पतिर्भवति, [8]मेधावी ग्रन्थसहस्रं गृह्णाति, अविच्छिन्नसंस्कृतवक्ता महाकविः सर्व्वशास्त्रपारगः। सिद्धे मति खड्गविद्या [9]धराधि-पतिर्भवति, विद्याधरीभिः सह क्रीडति। इदं चक्रवरं गूढमाचार्य्योपदेशेन बोद्धव्यम्।

प्रज्ञाचक्रमिदं श्रेष्ठं लिखित्वा यः फलोदयः।
तेन लोकः समस्तोऽयं मञ्जुश्रीपदमाप्नुयात्॥

॥ प्रज्ञाचक्रमिदं मञ्जुश्रीभट्टारकस्य साधनं समाप्तम् [10] ॥

[1] ANC षड़ार०। [2] C युगयुगा०।
[3] Ab ०काक्षर०। [4] C मुज्वलदनलमा०।
[5] A ०लम०। [6] ANC ङं, B ध्वं, Ab ध्वं।
[7] A omits मेधावी.....०धराधिपतिर्भवति।
[8] Ab ०धरो भवति। [9] इदं.....बोद्धव्यं dropped in AbBa.
[10] The Colophon is read as नामसमुच्चयान्तर्गतेन सिद्धप्रज्ञाचक्रवर-लक्षं समाप्तं in ANCBa and as मञ्जुश्रियप्रज्ञाचक्रं समाप्तं in B.

81.

नमो मञ्जुश्रिये

तत्रेयं धर्म्मधातुसमाधिः। सितवर्त्तुलवारुणमण्डलोपरि मकेशराष्टदलपद्मवरटके मरणापगताः[1] सर्व्वधर्म्मा इति द्योतकमँबीजनिष्पन्नं द्विभुजं शुक्लवज्रपर्य्यङ्कोपरि समाधिहस्तं कुमाराभरणं पञ्चचीरं स्वच्छनिर्म्मलज्ञानस्वभावं मञ्जुश्रीरूपमात्मानं भावयेत्। स्वहृच्चन्द्रोपरि पद्मे खँकारेण शङ्खं तन्मध्ये ॐ वज्रजिह्व रँ इति वज्रजिह्वां, जिह्वोपरि रक्तपद्मे समाधिसमापन्नममिताभबुद्धं तदुपरि तालुनि[2] वंकारमधोमुखं अमृतबिन्दुं स्रवन्तं एवमनुक्रमेण पक्षमासषण्मासपर्य्यन्तं भावयेत्। सिद्धौ लब्धनिमित्तो मण्डलमालिखेत्। बाह्यतश्चतुरस्रं चतुर्द्वारं द्वारपालसमन्वितं लास्या-माल्या-गीता-नृत्या-पुष्पा-धूपा-दीपागन्धाश्च बाह्यमण्डले न्यसनीयाः। तदभ्यन्तरे वर्त्तुलं शुक्लैकरेखावृतं अरं तन्मध्ये शुक्लपद्मं एवं लिखित्वा कार्त्तिकफाल्गुनवैशाखादिपौर्णमास्यां पूजानैवेद्यादिपूर्व्वकं बलिं दत्त्वा समाहितो मण्डलमध्ये वज्रपर्य्यङ्केनोपविष्टो मञ्जुश्रीरूपपरावृत्तसमिताभबुद्धरूपमात्मानं धर्म्मधातुसमं प्रभास्वरं भावयेत्। ततः सर्व्वतथागतानां कायवाक्चित्तमुद्राः सर्व्वदिगायाताः स्वकायवाक्चित्तेषु प्रविष्टा दृढीभूता इति स्थिरचित्तः स्वहृच्चन्द्रपद्मस्थितं

---

[1] C repeats from the beginning to मञ्जुश्रीरूपमात्मानं भावयेत्।

[1] A मपनाय तोः, N मरणाय गताः। [2] Ba वं०।

[2] AB तालुनं। [3] ABa वर्द्धारं।

शङ्खं स्पष्टं पश्येत्। तं परिनिवार्य्यावस्थितसर्व्वाक्षरस्वभाव-केशरबिन्दुभ्यो वाक्परमाणवः कण्ठदेशं प्राप्य स्वररूपा भवन्ति। स्वरान्नादो नादादक्षररूपा जिह्वामासाद्य वज्राक्षतिपरम्परया निःशेषाकाशद्योतनकराः सर्व्वाकाश-स्फुरन्नादा[1]वरणघोडशघोषाकारास्ताः पश्यन् घोषेण पूरयन् गगनं ॐ [2]वाक्येदं नम इति मन्त्रं जपेत्। पर्य्यङ्कमभिनन्दन् सकलां रात्रिं जपतश्च सिद्धिनिमित्तानि भवन्ति। जिह्वया रश्मयः स्फुरन्ति। [3]सिद्धोऽसीति शब्दश्च श्रूयते। ओष्ठाद् दन्तेभ्यश्च विचित्रा रश्मयो निश्चरन्ति। ततः प्रभृति यथाचिन्तितपदवाक्यवृत्त-गाथामन्त्रविद्याहृदयादीनि शङ्खादयत्नत एवं निश्चरन्ति। अनधिगतानि च शास्त्राण्यधिगच्छति, करोति च। सर्व्वज्ञत्वं चाचिरादेव भवति।

॥ इति धर्म्मशङ्खसमाधिमञ्जुश्री-
साधनं समाप्तम् ॥

[1] ANC स्वरन्नागा का०।
[2] A वाक्येद०।
[3] Ba सिद्धे सति०।

82.

नमो मञ्जुश्रिये ।

प्रथमं तावत् साधकः प्रातरुत्थाय मुखशौचादिकं कृत्वा ध्यानगृहं प्रविश्य सुखासने पर्य्यङ्केनोपविश्य स्वहृत्पद्मचन्द्रे रक्तगौरमुःकारं भावयेत् । ततस्तन्मरीचिसञ्चयैरङ्कुशाकारैराकृष्य भगवन्तं वक्ष्यमाणवर्णमुखभुजचिह्नासनोपेतं पुरतो विभाव्य मनोमयपुष्पधूपादिभिः सम्पूज्य तदग्रतः पापदेशनादिकं सर्व्वं विधाय मैत्र्यादिब्रह्मविहारचतुष्टयं विभाव्य[1] सर्व्वधर्म्मशून्यतामामुखीकृत्य ॐ शून्यताज्ञानवज्रस्वभावात्मकोऽहमिति मन्त्रेणाधितिष्ठेत् । तत आकाशे हुँकारेण पञ्चसूचिकं वज्रं सबीजं विभाव्य तद्रश्मिभिः यथायोगं वज्रप्राकारं वज्रपञ्जरं वज्रारं वज्रमयीं भूमिमारसातलमवलम्ब्य वज्रमयरश्मीभूय वज्रप्राकाराद् बहिर्गन्धादिरूपेणावस्थितं पश्येत् । तदनन्तरं वज्रप्राकाराभ्यन्तरे ह्रीःकारेण पद्मं पद्मोपरि अकारेण चन्द्रमण्डलं तदुपरि रक्तगौरवर्णं मुःकारमनेकबुद्धस्फुरणसंहरणाकारं विभाव्य तत्परिणतं मञ्जुश्रीभट्टारकं रक्तगौरं पद्मचन्द्रोपरि वज्रपर्य्यङ्कनिषण्णं प्रथममुखं रक्तं दक्षिणं नीलं वामे शुक्लं इति त्रिमुखं हस्तचतुष्टयेन यथायोगं प्रज्ञाखड्गधनुर्बाणयोगिनं रत्नकिरीटिनं द्वात्रिंश-

[1] From the beginning to •चतुष्टयं विभाव्य is written differently in Ba as follows:— पूर्व्वोक्तविधानेन सङ्क्षिप्य पद्मचन्द्रे रक्तगौरं मुकारं भावयेत् । तद्रश्मिभिराकृष्य भगवन्तं पुरतो विभाव्य ततो पुष्पादिभिः सम्पूज्य तदग्रे पापदेशनादिकं सर्व्वं विधाय चतुर्ब्रह्मविहारौ विभाव्य ।

लक्षणाशीत्यनुव्यञ्जनविराजितं कुमारं कुमाराभरण-भूषितमात्मानं विभाव्य [1]हृदयपद्मचन्द्रोपरि सत्त्वपर्य्यङ्क-निषण्णां मत्त्ववतीं शुक्लां वामे स्पर्द्धया घण्टाधरां दक्षिणे[2] हृद्युत्कर्षणयोगेन वज्रधारिणीं ऊर्णायां तथैवावस्थितां रत्नवज्रीं पीतां करद्वयेन शिरसि पुष्पमालां बध्नयन्तीं कण्ठे पद्मवज्रीं रक्तगौरां वामेन सगर्वगृहीतपद्मनालां दक्षिणे तत्पत्रविकासिनीं पूर्ववदेवावस्थितां मूर्द्धनि कर्म्म-वज्रीं हरितवर्णां चिह्नचिकवज्रान्वितहस्तद्वयेनात्मीयमूर्द्धानं धारयन्तीं तथावस्थितां विभाव्य ॐ वज्राङ्कुश जः, ॐ वज्रपाश हुँ, ॐ वज्रस्फोट वँ, ॐ वज्रावेश होः इत्येभि-र्मन्त्रैः पद्मचन्द्रोपरि यथाक्रमं ज्ञानसत्त्वमाकृष्य प्रवेश्य बद्ध्वा वशीकृत्य वज्रमुष्टिद्वयं बद्ध्वा तर्ज्जनीकनिष्ठाभिः शृङ्खलां कृत्वा रचितवज्रचक्रमुद्रया उत्तानतः स्वमुखव्यव-स्थापितया अर्घ्यपाद्य[3]पुष्पधूपादिभिः सम्पूज्य झटिति स्वशरीरे प्रवेशयेत्। तदनु सर्व्वतथागताभिषेकपूर्व्वक-मक्षोभ्यमौलिनमात्मानं विचिन्तयेत्[4]। मन्त्रः ॐ सर्व्व-धर्म्माभावस्वभाव विशुद्धवज्र अ आ अं अः प्रकृति-परिशुद्धाः सर्व्वधर्म्मा यदुत सर्व्वतथागतज्ञानकायमञ्जु-श्रीपरिशुद्धितामुपादायेति अ आः सर्व्वतथागतहृदय हर हर ॐ हुँ होः भगवन् ज्ञानमूर्त्तिवागीश्वर महावाच सर्व्वगगनामलसुपरिशुद्धधर्म्मधातु ज्ञानगर्भ आः इति मन्त्रे-

[1] From हृदयपद्म०.....०मक्षोभ्यमौलिनमात्मानं विचिन्त्य is found only in A and C.

[2] A दक्षिणाभ्य।

[3] A पुष्पादिभिः

[4] A च मुष्टि०।

[5] AC विचिन्त्य।

णादिमध्यावसानाधिष्ठानपूर्व्वकं नामसङ्गीतिं[1] प्रत्यहं प्रतिसन्ध्यं त्रीन् वारान् एकवारं वा पर्य्यङ्कमभिनन्दन् समाहितः सन् पठेत्। एवं तावत् पठेद् यावत् 'सिद्धि[2]निमित्तानि न पश्यति। तदनन्तरं यथातत्त्वं सिद्धेरुपायमनुतिष्ठेदिति।

॥ आर्य्यनामसङ्गीतिसाधनं समाप्तम् ॥

83.

नमः श्रीमञ्जुवज्राय।

भूत्वा श्रीमञ्जुवज्रोऽहं कुर्य्यां सर्व्वार्थसम्पदम्।
सत्त्वानां भ्रमदृष्टीनामित्यादौ परिभावयेत्॥
हृच्चन्द्रे न्यस्य मँतत्त्वं पूजयित्वाऽभिवन्द्य च।
गुरुं सम्बुद्धसम्मूर्त्तिं गच्छेत् त्रिशरणादिकम्॥
रत्नत्रयं मे शरणं सर्व्वं प्रतिदिशाम्यघम्।
अनुमोदे जगत्पुण्यं बुद्धबोधौ दधे मनः॥
स्वभावाभावतः शून्यं 'निर्निमित्तमहेतुकम्।
प्रणिधिरहितं सर्व्वं वज्रह्रापगमान्मतम्॥
ॐ शून्यताज्ञानवज्रस्वभावात्मकोऽहम्।

---

[1] A reads भट्टारिकां after °सङ्गीतिं।
[2] A सिद्ध°।
[3] A न्यस्तमन्त्रेभ्यः।
[4] A वर्णि°।

[1]अस्तं मुक्तोच्चसंस्थानं विश्वाजवज्रमध्यगे ।
चैत्यं विभाव्य सम्बुद्धं वज्रसत्त्वं सविद्यकम् ॥

प्रवेश्यास्येन [2]तस्यैव स्वचित्तं वज्रनिर्गतम् ।
अक्षरीभूत[3]मज्जे तु होःकारद्वयरञ्जितम् ॥

तत्प्रभाभिस्तु तत्कायं विलीनं चिन्तयेत् ततः ।
चन्द्रारुणरसावेश[4]मललादिषु संभृतम् ॥

स्थगितसर्व्वदिग्देव्यश्चोदनागीतितत्पराः ।
उत्थानाय विचिन्त्यात्मजगत्सौख्यप्रसिद्धये ॥

त्वं वज्रचित्त भुवनेश्वर सत्त्वधातो
चायाहि मां रतिमनोज्ञमहार्थकामैः ।
कामाहि मां जनकसत्त्व महाग्रबन्धो
यदीच्छसे जीवितं मञ्जुनाथ ॥

त्वं वज्रकाय बहुसत्त्वप्रियाङ्कचक्र
बुद्धार्थबोधि[5]परमार्थहितानुदर्शी ।
रागेन रागसमयं मम कामयस्व
यदीच्छसे जीवितं मञ्जुनाथ ॥

[6]त्वं वज्रवाच सकलस्य हितानुकम्पी
लोकार्थकार्य्यकरणे सदा सम्प्रवृत्तः ।
कामाहि मां सुरतचर्य्य समन्तभद्र
यदीच्छसे जीवितं मञ्जुनाथ ॥

---

[1] A अस्तं, N अयं ।
[2] A न तस्य ।
[3] A •मज्जस्तु ।
[4] N •कलला• ।
[5] A •परार्थ• ।
[6] This *Śloka* is dropped in A.

त्वं वज्रकाय समयाग्र महाहितार्थं
सम्बोधिवंशतिमकः समतानुकम्पी ।
कामाहि मां गुणनिधिं बहुरत्नभूतं
यदीच्छसे जीवितं मञ्जुनाथ ॥
ततोऽपि भगवन्तं तद्देवीगोत्यनुरोधतः ।
मायाबद्धस्तु संचिन्त्य मन्त्रार्थं[च] विभावयेत् ॥
स्फुरद्रुद्रौघनिर्म्माणप्रसाधितजगत्त्रयः ।
स्वतत्त्वोद्भव चिह्नोत्थमञ्जुवज्रः स्वयं भवेत् ॥
कुङ्कुमारुणसंमूर्त्तिर्नीलसितत्रयाननः ।
भुजद्वयसमाश्लिष्टस्वाभविद्याधरात्यृक् ॥
खड्गबाणभुजश्चापनीलोत्पलपरिग्रहः ।
विश्वद्दलाजचन्द्रस्थो वज्रासनशशिप्रभः ॥
भवसङ्गाद् हि संसारः सममङ्गो विरागतः ।
श्रीमञ्जुवज्रसर्व्वात्मा सर्व्वां मायां विचिन्तयेत् ॥
ॐ धर्म्मधातुस्वभावात्मकोऽहम् ।
ततः प्रवेशयेद् बीजैश्चक्षुरादिषु सत्प्रभैः ।
ह्रिँ यँ खँ स्कँमित्येभिः सञ्जीवार्थोपसाधनम् ॥
क्षितीशकुलिशाकाशलोकेशस्कन्धिभद्रकान् ।
यद्वज्रायतनान्येव मौलिणां मण्डलं स्थितम् ॥
स्वशिरःकण्ठहृच्चन्द्रे ॐ आः हुँ मन्त्रसत्प्रभैः ।
कायवाक्चित्तवज्रैस्तु मन्त्राधिपति भावनम् ॥

---

[1] A •चिह्नार्थं ।
[2] AN ह्रं ।
[3] AN साधनं ।
[4] C तद्वे ।
[5] A •वज्रचक्र• ।

ॐ सर्व्वतथागतकायवज्रस्वभावात्मकोऽहम्, ॐ सर्व्वतथागतवाग्वज्रस्वभावात्मकोऽहम्, ॐ सर्व्वतथागतचित्तवज्रस्वभावात्मकोऽहम् ।

चिवज्रलक्षणं वीक्ष्य हृज्ज्ञानसत्त्वबीजतः ।
सर्व्वाशावर्त्तिमम्बुद्धविद्यार्चिःकुलसेकभृत् ॥

चक्षुःकायाद्यधिष्ठानस्वमन्त्रोद्भवभामिनीम् ।
शिरोहृन्नाभिगुह्ये चरणे कायादिवज्रिभिः ॥

पश्येद् ॐहुमिति स्वाख्याहाख्यैः[1] पञ्चाङ्गसत्प्रभाम् ।
[2]कायेशाक्षोभ्यरत्नेशामिताभामोघसिद्धिभिः ॥

[3]वज्राजयोगसम्भूतान् सर्व्वदिग्भ्यः सुसंस्थितान् ।
संबुद्धान् संजपेद् योगी रूपवज्रादिभिस्तथा ॥

ॐ सर्व्वतथागतपूजावज्रस्वभावात्मकोऽहम्, ॐ सर्व्वतथागतानुरागेण वज्रस्वभावात्मकोऽहम् ॥

[4]सर्व्वधर्म्मैस्तु यं देवं प्रतिशब्दसुशब्दकैः ।
स्वाहङ्कारपरावेशे स्वमनोऽधिपदैवतम् ॥

नमस्ते वरदवज्राग्र भूतकोटि नमोऽस्तु ते ।
नमस्ते शून्यतागर्भ बुद्धबोधि नमोऽस्तु ते ॥

बुद्धराग नमस्तेऽस्तु बुद्धकाय नमो नमः ।
बुद्धप्रीति नमस्तुभ्यं बुद्धमोद नमो नमः ॥

[1] N •सैक० । [2] A खत्माख्यैः ।
[3] A कायेशा० ।
[4] वज्राज०.....०भावात्मकोऽहं is found only in C.
[5] A omits सर्व्वधर्म्मैस्तु.....बुद्धकाय नमो नमः ।

बुद्धस्मित नमस्तुभ्यं बुद्धहास नमो नमः ।
बुद्धवाच नमस्तेऽस्तु बुद्धभाव नमो नमः ॥
अभवोद्भव नमस्तेऽस्तु नमस्ते बुद्धसम्भव ।
गगनोद्भव नमस्तुभ्यं नमस्ते ज्ञानसम्भव ॥
मायाजाल नमस्तुभ्यं नमस्ते बुद्धनाटक ।
नमस्ते सर्व्वसार्व्वेभ्यो ज्ञानकाय नमोऽस्तु ते ॥
विश्वमारविदन्यच्च दहनं सोक्तपञ्चकम् ।
अक्षरैरमृतं भुक्तं कायवाक्चित्तशुद्धिकृत् ॥
हेतुशक्तिरचिन्त्या हि रागादिविगत[1]भ्रमः ।
एतेव च परैर्बोधिं प्राप्नोति हि जगौ मुनिः ॥
[2]अक्षरान्तर्गतं मन्त्रं स्फुरत्कायादिवज्रिभिः ।
आकाशं व्याप्य मन्त्रान्ते संहरंस्तं जपेत् सुधीः ॥
एवं जपन् खेदे तु मूर्ध्नीन्दौ प्रणवार्द्रतः ।
आप्यायने प्रयात्याथ बोधिचित्तं जपेत् पुनः ॥
स्वप्नमायादिवत् सर्व्वं सर्व्वं कार्य्यं जगद्धितम् ।
मञ्जुवज्रत्वनिष्पत्तौ भावयेदनिशं प्रभुम् ॥
कृतपूजादिको मन्त्री सज्जने जातसस्पृहः ।
अक्षरादितसम्बुद्धं ध्यायात् कायादिकल्पितम् ॥
प्रज्ञोपायात्मकं तत्त्वं जगद्धेतेन वञ्चितम् ।
जगतस्तत्त्वनिष्पत्तौ प्रणिधानं तु दृंहयेत् ॥
श्रीमतो मञ्जुवज्रस्य भावनान्नभुभादृतः ।
मञ्जुश्रीज्ञानकायः स्यां जगत्सर्व्वभूतप्रदः ॥

---

[1] A रागादिवग्रतं, C रोगादिवेग्रतः ।
[2] A अक्षरा० ।

यदा च द्रष्टुकामः स्यां प्रष्टुकामश्च किञ्चन ।
तमेव नाथं पश्येयं मञ्जुनाथमविघ्नतः ॥

दशदिग्व्योमपर्य्यन्तं[2] सर्व्वसत्त्वार्थसाधने ।
यथा चरति मञ्जुश्रीः सैव चर्य्या भवेन्मम ॥

यावती प्रथमा कोटिः संसारस्यान्तवर्ज्जिता ।
भावयन् सत्त्वहितायैव चरिष्याम्यमृताक्षरीम्[3] ॥

यावन्तः सर्व्वबुद्धा वै निर्दृता लोकबान्धवाः ।
तेषां च शासनार्थं तु चरिष्यामि युगे युगे ॥

बालदारकरूपेण विचरिष्यामि सर्व्वतः ।
मन्त्ररूपेण सत्त्वानां विनश्यामि तदा तदा ॥

व्युत्थाय मञ्जुनाथस्य वहन् गर्वं समाहितः ।
सर्व्वदैवतरूपांस्तु विषयानुपान्तं जपेत् ॥

मुद्रेन्द्रियप्रयोगेन त्रिमुखान् षड्भुजांस्तथा ।
चक्रवज्रमहारत्नपद्मखड्गधरायुधान् ॥

रूपशब्दमहागन्धरसस्पृष्टव्यधार्म्मिकान् ।
कायकुलिशरत्नेशामिताभामोघभावजान् ॥

पञ्चविषयरूपांस्तु सर्व्वबुद्धावबोधतः ।
स्वाधिदैवतयोगेन स्वपरांश्चैव पूजयेत् ॥

भोजनं शयनं स्नानमासनं स्थानमेव च ।
स्वाधिदैवतयोगेन सर्व्वमेवं प्रकल्पयेत् ॥

---

[1] A •कामस्य । [2] A पर्य्यन्त• ।
[3] A चरिष्यसमृताक्षरी, N चरिष्यामि मृताक्षरीं ।

संक्षेपाच्चतुरङ्गस्य लिखितार्थसुभाषितः ।
मञ्जुवज्रोऽस्तु लोकोऽयं स स्यात् सौख्यफलप्रदः ॥

[1]भावनाखिन्नो मन्त्रं जपेत् ॐ वाक्येदं नमः । उपहृदयं वा जपेत् ॐ [2]ह्रीँ हुँ ।

॥ इति मञ्जुवज्रसाधनम् ॥

84.

नमो मञ्जुनाथाय ।

[2]ह्रीँ नाम सर्व्वकार्य्यसमर्थः परमगुह्यतमः सार्व्व-कर्म्मिक एकाक्षरो नाम विद्याराजोऽनतिक्रमणीयः सर्व्व-सत्त्वानां, अधृष्यः सर्व्वसत्त्वानां, मङ्गलः सर्व्वसत्त्वानां, साधकः सर्व्व[3]मन्त्राणां, प्रभुः सर्व्वलोकानां, ईश्वरः सर्व्व-वित्तेश्वराणां, मैत्र्यात्मकः सर्व्व[4]विद्विष्टानां, कारुणिकः सर्व्व-जन्तूनां, नाशकः सर्व्व[5]विघ्नानाम् । संक्षेपतो यथा यथा प्रयुज्यते तथा तथा करोति । असाधितोऽपि सर्व्वकर्म्माणि करोति । मन्त्रं जपन् यं स्पृशति स वशो भवति । वस्त्र-मभिमन्त्र्य प्रावरेत् सुभगो भवति । दन्तकाष्ठमभिमन्त्र्य भक्षयेद् दन्तशूलमपनयति । श्वेतकरवीरकाष्ठं सप्त वारानभिमन्त्र्य भक्षयेत् अप्रार्थित[6]मनुलभ्यते । अक्षिशूले

---

[1] This prose portion is found only in Na.
[2] Na ह्रौं ।
[3] A ॰कर्म्माणां ।
[4] ANa ॰विद्विष्टानां ।
[5] A ॰विद्यानां ।
[6] AN ॰मन्त्रं जपेत् ।

सैन्धवं चूर्णयित्वा सप्त वारानभिमन्त्र्य अक्षि पूरयेत्, अक्षिशूलमपनयति। गजविष्ठोत्थितगर्ज्जनसम्भवां छत्रिकायां किंशुकपत्रं बद्ध्वा मृद्वग्निना पक्वां शुष्कलापितां सुखोष्णां सैन्धवचूर्णितां कृत्वा सप्त वारानभिमन्त्र्य कर्णौ पूरयेत् तत्क्षणादुपशमयति। प्रसवनकाले स्त्रिया गूढगर्भायाः शूलादिभूताया [1]आटरूषमूलं निष्प्राणकोदकेन पिष्ट्वा नाभिदेशे लेपयेत् सुखेन प्रसवति। कष्टशल्यं वा पुरुषं पुराणघृतमष्टशतवारानभिमन्त्र्य पाययेत् लेपयेच्च तत्प्रदेशं तत्क्षणादेव निःशल्यं करोति। अजीर्णविसूचिकातिसारे शूले च सौवर्चलं वा लवणं सप्त वारानभिमन्त्र्य भक्षयेत् तस्माद् व्याधितो(धीन्) मुच्यते, तदहनि स्वस्थो भवति। प्रसवधर्म्मिण्याः प्रसवकाङ्क्षिण्या अश्वगन्धामूलं गव्यक्षीरेण पिष्ट्वा आलोड्य पञ्चविंशतिजप्तेन ऋतुकाले पाययेत् परदारवर्जितेन स्वपत्नीमभिगम्येत, जनयति सुतम्। एकाह्निकद्व्यह्निकत्र्यह्निकचातुर्थकसततनित्यज्वरेषु पायसं घृतसंयुक्तं अष्टशतमन्त्रितं भक्षयेत् स्वस्थो भवति। डाकिनीग्रहगृहीतेषु आत्ममुखं अष्टशताभिमन्त्रितं कृत्वा निरीक्षयेत् स्वस्थो भवति। बालं मातरं पूतनं वेतालकुमारग्रहादिषु सर्व्वमानुषदुष्टवारुणगृहीतेषु आत्मनो हस्तमष्टशता[2]भिमन्त्रितं कृत्वा गृहीतमस्तकं स्पृशेत्, स्वस्थो भवति। एकजप्तेनात्मरक्षा, द्विजप्तेन महारक्षा, त्रिजप्तेन गृहरक्षा, चतुर्जप्तेन ग्रामरक्षा, पञ्चजप्तेन नगररक्षा, एवं यावत्

[1] A आटरूष०। [2] AC ०भ्यं।
[3] Na ०मातल०। [4] A पुतेव, Na पुतनि।
[5] AC ०दारव०। [6] A हस्तगृत०।

षड्जप्रेन कटकचक्ररक्षा कृता भवति। एतानि चापराणि क्षुद्रकर्म्माण्यनुक्तान्यपि करोति। अनेनैव मन्त्रेण स्त्रीः प्रदरादि[1]रोगेषु अलम्बुषमूलं क्षीरेण पिष्ट्वा अष्टशताभिमन्त्रितं कृत्वा क्षीरेणालोड्य पिबेत् स्वस्था भवतीति।

तान्तरान्तसमायुक्तसान्तामीश्वरशोभिताम्।
इन्दुर्द्वबिन्दुनाऽऽक्रान्तलिपिं दृष्ट्वा जपेद् गुरौ॥

॥ एकाक्षरकल्पकतिपयप्रयोगः समाप्तः ॥

85.

नमो बुद्धाय।

अवनिनिहितजानुः सव्यहस्तैकखड्गः
तदितरकरमुष्टौ तर्ज्जनीमक्तपाशः।
निविडघनशरीरश्चण्डरुक् चण्डचक्षुः
शमयतु भवविघ्नं विघ्नहन्ताचलोऽयम्॥

दशदिक्षु स्थिता बुद्धा बोधिसत्त्वाश्च नायकाः।
तेभ्यो नानाविधां पूजां कृत्वा पुष्पादिभिर्धिया॥
सत्त्वस्तान् दुःखितान् दृष्ट्वा प्रयच्छेदात्मविग्रहम्।
मन्त्री शुभाभिवृद्ध्यर्थं कुर्य्यात् [2]पापस्य देशनाम्॥
ततोऽनुमोद्य सम्बुद्धबोधिसत्त्वगणस्य च।
शैक्षाशैक्षादिसत्त्वानां कृत्वं पुण्यं स्वभावतः॥

[1] A पुरदादि०। [2] ABa पुण्यदेशनां।

चिरत्नशरणापन्नः सम्बोधौ दृढनिश्चयः ।
[1]भावयेच्चतुरो ब्रह्मविहारांस्तु यथाक्रमम् ॥
[2]शून्यांस्तल्लक्षणायोगादनिमित्तानहेतुतः ।
प्रणिधानविनिर्मुक्तान् भावान् भावाद् विभावयेत् ॥
विश्वाजसूर्य्यमध्यस्थं ध्यायात् हुँकारसम्भवम् ।
रक्तचक्षुर्द्वयं वीरं द्विभुजं रत्नमौलिनम् ॥
सद्यः पापहरं नाथं यथेच्छापरिपूरकम् ।
अतसीपुष्पसङ्काशं [3]स्फुरद्दंष्ट्रांशुनिर्म्मलम् ॥
निष्पीड्यमानदंष्ट्रोष्ठं सर्व्वाभरणभूषितम् ।
वामे तर्ज्जनिकापाशं भूमावारूढजानुकम् ॥
खड्गव्यग्रोग्रहस्तं च [4]श्रीमहाचण्डरोषणम् ।
केकराक्षं महाघोरं भयस्यापि भयङ्करम् ॥
समयसत्त्ववद् ध्यायात् ज्ञानसत्त्वं महोज्ज्वलम् ।
तस्यैव हृदये मन्त्री बीजं चिह्नसमन्वितम् ॥
ध्यानात् खिन्नो जपेन्मन्त्रं देवताकारयोगतः ।
ततो विवक्षितां सिद्धिं प्राप्नोत्येव न संशयः ॥

तथायं मन्त्रराजः ॐ चण्डमहारोषण हुँ फट् । अयं मन्त्रराजः सकृदुच्चारितः सर्व्वपापानि निर्हरति, सर्व्वच रक्षामावहति । माषादिभिस्ताडयन् भूतादि[5]भयमपहरति । [6]शरावे [7]खट्टिकयाऽभिलिख्य द्वारे [8]सम्भावयेत् ।

---

[1] ABa अभाव० ।
[2] A स्फुरद्दुद्रं सुनिर्म्मलं ।
[3] B औचक्षमहा० ।
[4] A आगमशरावे, N आमशरावे
[5] Ba सम्भवेत् ।
[6] A मुक्तज०, Ba मुक्तज० ।
[7] A ०योगं ।
[8] A ०भवं हरति ।
[9] BCBa खटिकया ।

अभिनवप्रसूतानां बालानां रक्षां करोति। मदनेन पुत्तलिकां कृत्वा चतुरङ्गुलप्रमाणतः तस्या हृदये साध्यनामसहितं भूर्ज्जमन्त्रमभिलिख्य प्रक्षिपेत्। कण्टकेन[1] तु तस्या मुखं कीलयेत्, प्रतिवादिमुखं कीलितं[2] भवति। पादौ कीलयेत्, गतिं स्तम्भयेत्। हृदयं कीलयेत्, रोषं स्तम्भयति। मानुषजङ्घास्थिकीलकेन लोहकीलकेन वा नाम गृहीत्वा यान्यङ्गानि कीलयेत् तानि तस्य नश्यन्ति। अरिद्वारे निखनेदुच्छादयेत् अभिमन्त्रितश्मशानभस्मना द्वारपटे निक्षिप्तेनोद्घाटयति। खड्गमभिमन्त्र्य संग्रामे प्रविशन् जयमासादयति। यस्मिन् कार्य्ये समुत्पन्ने बलिमुपसंहरेत् तत्, तस्य सिध्यति। यद् यदिच्छति मन्त्री तत् सर्व्वं शुभमशुभं वा कर्म्म करोति जपमात्रेण।

लिखनाद् यन्मयाऽवाप्तं शुभं सत्त्वार्थसाधकम्[3]।
तेनायं निखिलो लोको भूयात् सम्बोधिभाजनम्[4]॥

॥ चण्डमहारोषणसाधनं सकल्यं[5] समाप्तम्[6]।
। कृतिरियं प्रभाकरकीर्त्तेः॥

---

[1] ABa कण्टकेन।
[2] Ba कालितं।
[3] Ba stops abruptly here.
[4] ANC •पटे।
[5] A सत्त्वार्थ।
[6] A सङ्कल्पं।

86.

पूर्वोक्तविधानेन शून्यताभावनानन्तरं सितपद्मोपरि सूर्य्ये क्षुण्णहुँकारपरिणतं श्रीचण्डमहारोषणं भगवन्तमतसीपुष्पसङ्काशम[1]चलापरनामानं एकमुखं द्विभुजं केकराक्षं दंष्ट्राविकरालमहाघोरवदनं रत्नमौलिनं दंष्ट्रानिपीडिताधरं मुण्डमालाशिरस्कमारक्तचक्षुर्द्वयं दक्षिणं खड्गधरं तर्ज्जनीपाशहृदयस्थवामकरं मितसर्पयज्ञोपवीतं व्याघ्रचर्म्मनिवसनं नानारत्नविरचिताभरणं भूमिलग्नवामचरणमीषदुन्नतदक्षिणचरणं सूर्य्यप्रभामालिनमात्मानं विचिन्त्य समयसत्त्वं ज्ञानसत्त्वभावनापूर्व्वकमक्षोभ्यमुकुटिनं ध्यायात्। तदनु जापमन्त्रः ॐ चण्डमहारोषण हुँ फट्।

॥ चण्डमहारोषणसाधनम् ॥

87.

योगी क्वचिन्मनोऽनुकूले स्थाने सुखासनोपविष्टः स्वहृदये सूर्य्यमण्डलोपरि क्षुण्णहुँकारं पश्येत्। तद्दृश्याक्षुण्णगुरुबुद्धबोधिसत्त्वान् आकाशे व्यवलोकयेत्। ततस्तान् हुँकाररश्मिविनिर्गतपुष्पादिपञ्चोपचारेण सम्पूज्य तदग्रे पापदेशनापुण्यानुमोदनापुण्यपरिणामनादिकं कुर्य्यात्। ततो मैत्रीं सर्वसत्त्वेष्वेकपुत्रप्रेमतालक्षणां[2], करुणां दुःखाद् दुःखहेतोः समुद्धरणकामतां, मुदितां प्रमोद-

[1] A ॰नलापर॰।
[2] A ॰प्रेमपुत्रतलक्षणां।
[3] B आपः।

रूपां, उपेक्षां असह्यासङ्गपरिहानिस्वभावां भावयेत्। ततः शून्यं वैधातुकमवलोक्य अनेन मन्त्रेणाधितिष्ठेत् ॐ शून्यताज्ञानवज्रस्वभावात्मकोऽहम्। ततोऽन्तरीक्षे पद्मोपरि सूर्य्यमण्डलस्थं हुँकारसम्भवं खड्गं हुंकाराधिष्ठितमुष्टितमुष्टिकं परिणाम्यात्मानं चण्डाचलरूपनिष्पन्नं पश्येत्। स्फुरद्वर्त्तुलरक्तप्रचण्डचक्षुषं प्रविकटभृकुटीललाटतटं निष्पीडितदन्तौष्ठं क्षोणीविन्यस्तवामजानुं दक्षिणचरणाक्रान्तदुर्व्वारमारं खड्गव्यग्रोग्रदक्षिणपाणिं विभवभयहरतर्ज्जनीमुष्टिपाशं इन्द्रनीलसमद्युतिं ज्वलदनलमहाचण्डरोषं हृद्बीजरश्मिसमाकृष्टज्ञानसत्त्वं समयसत्त्वे प्रवेश्य अभिषेकं गृह्णीयात्। अभिषेकानन्तरं शिरसि अक्षोभ्यं पश्येत्। ततो भावनया खिन्नो मन्त्रं जपेत्। तचायं मन्त्रः ॐ चण्डमहारोषण हुँ फट्।

॥ [चण्डमहारोषणसाधनम्] ॥

88.

क्वचिन्सनोऽनुकूले स्थाने सुखासनासीनः स्वहृदये अष्टदलकमलोपरि सूर्य्यमण्डले क्षणाहुँकारं विचिन्त्य तद्रश्मिनाऽऽकाशदेशे गुरुबुद्धबोधिसत्त्वान् वक्ष्यमाणचण्डमहारोषणमानीय सम्पूज्य पापदेशनाऽकरणसंवरत्रिशरणगमनपुण्यानुमोदनाऽऽत्मनिर्य्यातनाबोधिचित्तोत्पादनादिकं कृत्वा मैत्रीकरुणामुदितोपेक्षाचतुर्ब्रह्मविहारान्

[1] A ०मण्डलं ऊकारं।

भावयित्वा [1]जगदिदं निःस्वभावस्वभावं ग्राह्यग्राहकविनिर्मुक्तं स्वप्नमायोपमं बुद्ध्वा [2]शून्यतां विभावयेत् ॐ शून्यताज्ञानवज्रस्वभावात्मकोऽहम्। तदनु अमलगगनाङ्गने अष्टदलकमलोपरि सूर्य्यमण्डले क्षुण्हुँकारजखड्गमुष्टौ हुँकारं तद्रश्मिभिः सकलबुद्धसन्दोहमानीय हुँकारे प्रवेश्य ततो हुँकारसम्भवमनल्पकल्पानलज्वालामालाकुलं दुर्व्वारमारविध्वंसिनं महानीलजीमूतसङ्काशदेहं विविधाभरणरत्नविभूषितं रत्नसम्बद्धमौलिस्फुरत्प्रत्यूहवीरकुमारं कराल[3]समुल्लसत्कुन्दसङ्काशदन्तौष्ठपीडनाद् दुष्टसन्त्रासबीभत्सरूपश्रियं भृकुटीदन्तुरनिरीक्षणं युगपत् पातालमन्दर्शितनेत्रद्वयं मेदिनीमण्डलारुढमर्व्यैकजानुं अरविन्दस्थसूर्य्यासनासीनवामाङ्घ्रिणेत्यातुकामं दक्षिणपाणौ हुँकारगर्भज्वलन्नीलखड्गं वाममुष्टौ तर्ज्जनीतर्ज्जितव्याकुलानेक[4]हरिहरहिरण्यगर्भादिक्लेशदुन्दारि[5] बन्धनाय वज्राङ्कितसुवर्णपाशं जगद्वाञ्छितानन्तसम्पत्तिदानैकरक्तं श्रीचण्डमहारोषणं भावयेत्। महाक्रोधराजाचलस्य भगवतो हृदि पद्मसूर्य्यस्थहुँकारसम्भवाङ्कितगर्भखड्गं परिणम्य हुँकारजद्वितीयं चण्डमहारोषणं हृदयान्तर्गतभगवन्तं चिन्तयेत्। तस्यापि हृदये पद्मसूर्य्यस्थं हुँकारजातवज्रकृष्णातदङ्कितगर्भखड्गं तद्रश्मिसमाकृष्टं ज्ञानसत्त्वं समयसत्त्ववद् दृष्ट्वा जःकारेणानयेत् आचमनप्रोक्षणादिकं

---

[1] A जगदिःस्वभाव०।
[2] C संबुद्धा।
[3] A ०समुल्लस०।
[4] A ०दंष्ट्रो०।
[5] A ०व्याकुलानैक०।
[6] AC ०वन्दनाय।
[7] A ०गर्भ०।
[8] AC ङ्घात०।

दत्त्वा हुँकारेण तत्रैव प्रवेशयेत्, वँकारेण बन्धयेत्, होःकारेण तोषयेत्। पयसि पय इव एकीभूतं नायकं भावयेत्। भगवतः चक्षुःश्रोत्रयोर्नासापुटयोर्मुखशिरसि चित्ते यथायोगं वैरोचनाक्षोभ्यरत्नसम्भवामिताभामोघसिद्धिं नैरात्म्यां षडङ्गेषु न्यसेत्। हृदयस्थितहुँकारान्निर्गतपञ्चतथागतदेवीगणं रश्मिभिरानीय पञ्चामृतपूर्णकुम्भैः स्नापयित्वा मौलौ अक्षोभ्यं देवीभिर्नानाविधनृत्यवाद्यादिविविधपूजादिभिरानन्दयेत्। ततो भगवान् परार्थोद्यतः सर्व्वसत्त्वान् रागद्वेषमोहादिभिः हरिहरहिरण्यगर्भकन्दर्पादिभिर्महामोहजालैर्महाद्वेषजालैर्महारागजालैरविद्यान्धकारेण भवचक्रे भ्राम्यतस्तान् पश्येत्। ततो हृत्सन्त्रस्फुरितैर्म्महाक्रोधराजैरनेकस्थान् मारवृन्दान् ससैन्यान् दिगम्बरान् मुक्तकेशान् क्रन्दमानान् अचाणान् वज्रपाशेन बद्धाऽऽनीय विध्वस्य विचूर्ण्य तीक्ष्णेन खड्गेन च्छित्त्वा मैत्रौ चित्तेन पुनर्निर्माय धर्म्मे विनेतुं स्वपदान्तिके स्थापयेत्। ध्यानात् खिन्नो मन्त्रं जपेत्। चित्तं भ्रुवोरन्तराले समारोप्य विश्वैकतत्त्वमूर्त्तिर्महा चण्डमहारोषणनाथस्य मन्त्रजपमात्रेण दुर्ह्नान्तिं दान्तिं जगदवश्यशान्तिं रक्षणं वर्द्धनं तुष्टिं पुष्टिं तथोच्चाटनाकर्षणमारणचामनं सर्व्वकर्म्म कुर्व्वीत। ॐ चण्डमहारोषण हुँ फट्।

॥ इति चण्डमहारोषणसाधनं समाप्तम् ॥

[1] A ०र्महाजालै०।
[2] ०क्रोध० dropped in A.
[3] A विचित्रेण।
[4] A भ्रुवो०।
[5] A ०चण्डरोषण०।
[6] AN ०दन्तिं।

89.

नमस्तारायै ।

पूर्ववच्छून्यतापर्य्यन्तं विभाव्य पद्मचन्द्रे ताँबीजपरिणतेन्दीवरं ताँबीजमर्भं, तत्परिनिष्पन्नां हरितामभोघमिद्विमकुटीं[1] वरदोत्पलधारिदक्षिणवामकरां अशोककान्तामारीचैकजटाव्यग्रदक्षिणवामदिग्भागां दिव्यकुमारीमलङ्कारवतीं ध्यात्वा ज्ञानसत्त्वेन सहैकीकृत्य ॐ तारे तुत्तारे[2] तुरे स्वाहा इति मन्त्रं जप्त्वा तन्मनसैव यथेष्टं विहरेत् ।

॥ इत्यार्य्यखदिरवणी[3]तारासाधनम् ॥

90.

नमस्तारायै ।

प्रथमं स्वहृदौन्दुमध्यस्थताँबीजविनिर्गतरश्मिभिर्निष्पन्नान् गुरुबुद्धबोधिसत्त्वान् ध्यायात् । तांश्च बाह्याध्यात्मपूजाभिः सम्पूज्य तदग्रे सप्तविधानुत्तरपूजां कुर्य्यात् । ततः शून्यतां विभाव्य ॐ स्वभावशुद्धाः सर्व्वधर्म्माः स्वभावशुद्धोऽहमित्युच्चारयेत् । ततश्चन्द्रे ताँसम्भूतां सितोत्पलस्थताँकारोद्भूतां तारां श्यामां द्विभुजां दक्षिणे वरदां वामे सनालेन्दीवरधरां सर्व्वाभरणभूषितां पद्म-चन्द्रासने

[1] B ०मकुटां ।
[2] A खयह० ।
[3] A ०तुतारे० ।
[4] वाम० dropped in A.
[5] A ०रौं साल० ।
[6] Ab ०खदिरतारा०, A खदिरवनां ।

पर्य्यङ्कनिषण्णां चिन्तयेत् । समयमुद्रां बन्धयेत् । [1]हस्तद्वयेन सम्पुटाञ्जलिं कृत्वा तर्ज्जनीद्वयेन मध्यमे पिधायाङ्गुष्ठाग्रलग्ने विकचोत्पलमुद्रा । ततः ॐ तारे तुत्तारे तुरे स्वाहा इति मन्त्रं जपेत् ।

॥ महत्तरीतारासाधनं समाप्तम् ॥

91.

समस्तार्थ ।

पूर्ववत् शून्यतापर्य्यन्तं विभाव्य पंकारजविश्वकमलमध्ये अकारजचन्द्रे श्यामतांकारजा तारां श्यामवर्णां सर्व्वालङ्कारधरां वामे नीलोत्पलवतीं दक्षिणे वरदां अर्द्धपर्य्यङ्कनिषण्णां दक्षिणपार्श्वे अशोककान्तां पीतां नानारत्नमकुटां वामदक्षिणहस्तयोरशोकपल्लवकुन्तिशधरां तथा महामायूरीं पीतां वामेतरकरयोर्मयूरपिच्छिकाचामरधारिणीं वामपार्श्वे एकजटां खर्व्वां कृष्णां व्याघ्राजिनधरां चिनेत्रां दंष्ट्राकरालवदनां ज्वलत्पिङ्गोर्द्ध्वकेशां कर्त्रिकपालधारिणीं तथा आर्य्यजाङ्गुलीं श्यामां वामदक्षिणहस्तयोः कृष्णोरगचामरधारिणीं विभावयेत् । एवं च ध्यानात् [2]खिन्नो मन्त्रं जपेत् ॐ तारे तुत्तारे तुरे स्वाहा ।

॥ इति वरदतारासाधनं समाप्तम् ॥

---

[1] हस्तद्वयेन found only in Ab.
[2] N व्याख्यानात् ।
[3] AC एकजटां ।
[4] ANC ०कृष्णावलम्बी ।
[5] AbBa ०पिच्छी० ।
[6] Ab तारा० ।

92.

ताँकारजं ताँकाराक्रान्तमध्यमिन्दीवरं ध्यात्वा तत्परिणतामार्य्यतारां श्यामवर्णां वामेनोत्पलधरां दक्षिणे वरदां भद्रासनस्थितामम्बोधमिङ्गिमकुटीं ध्यात्वा ज्ञानसत्त्वेनैकीकृत्य ॐ तारे तुत्तारे तुरे अमुकं अमुकीं वा वशमानय स्वाहा इति साधनाममहितमनन्तरोक्तेन संख्यानियमेन जपेत्। शरादिचिह्नाभावेऽपि साध्यगलमुत्पलेन बद्ध्वा स्वशरीरारुणकिरणमञ्चयैस्तच्छरीरमापूर्य्य स्ववशे स्थापयेदिति।

॥ वश्याधिकारतारासाधनं समाप्तम् ॥

93.

नमो वज्रतारायै।

अथातः सम्प्रवक्ष्यामि वज्रतारापरमाधनम्।
होमकर्म्मविधानेन सर्व्वकामार्थसाधकम्॥

तत्रेमानि मन्त्रपदानि भवन्ति— नम आर्य्यावलोकितेश्वराय बोधिसत्त्वाय महासत्त्वाय महाकारुणिकाय तद्यथा ॐ तारे तुत्तारे तुरे सर्व्वदुष्टप्रदुष्टान् मम कृते जम्भय स्तम्भय मोहय बन्धय हुँ हुँ हुँ फट् फट् फट् सर्व्वदुष्टस्तम्भनि तारे स्वाहा।

[1] A तारा०
[2] Ab omits.
[3] ANC वज्रतारा०, Ab आर्य्यतारा०, B तारा०
[4] AC फट् only.
[5] Ab श्यामव०।
[6] A वतारा०।
[7] A स्तम्भतारा०।

मातृमण्डलमध्यस्थां तारादेवीं विभावयेत् ।
अष्टबाहुं चतुर्वक्त्रां सर्व्वालङ्कारभूषिताम् ॥
कनकवर्णनिभां भव्यां कुमारीलक्षणोज्ज्वलाम् ।
पञ्चबुद्धमहामकुटीं वज्रसूर्य्याभिषेकजाम् ॥
नवयौवनलावण्यां चलत्कनककुण्डलाम् ।
विश्वपद्ममसामौनां रक्तप्रभाविभूषिताम् ॥
वज्रपाशं तथाशङ्खमच्छरोद्यतदक्षिणाम् ।
वज्राङ्कुशोत्पलधनुस्तर्ज्जनीवामधारिणीम् ।
वज्रपर्य्यङ्कयोगेन माधयेद् भुवनत्रयम् ॥
पूर्व्वेण पुष्पतारां तु मितवर्णां मनोरमाम् ।
ॐकाराक्षरनिष्पन्नां पुष्पदामकराकुलाम् ॥
द्विभुजामेकवक्त्रां च सर्व्वालङ्कारभूषिताम् ।
दक्षिणे धूपतारां तु कृष्णवर्णां सुरूपिणीम् ॥
धूपशाखाकरव्यग्रां सर्व्वालङ्कारभूषिताम् ।
पश्चिमे दीपतारां च दीपयष्टिकराकुलाम् ॥
पीतवर्णां महाभूषां चलत्कनककुण्डलाम् ।
उत्तरे गन्धतारां तु गन्धशङ्खकराकुलाम् ॥
रक्तवर्णनिभां देवीं भावयेद् गर्भमण्डले ।
द्वारपालौस्ततो ध्यायादङ्कुश्यादिप्रभेदतः ॥

पूर्व्वद्वारे वज्राङ्कुशीमेकवक्त्रां द्विभुजां वज्राङ्कुशोत्पल-हस्तां विकृतवदनां कृष्णवर्णां, दक्षिणद्वारे वज्रपाशीं

---

[1] A वज्रयोग० ।
[2] AC omits.
[3] AC omits.
[4] A omits.
[5] B ०यष्टिकुलां करां, A ०कराकुलो ।

पीतवर्णां विकृताननां एकवक्त्रां द्विभुजां वज्रपाशहस्तां, पश्चिमद्वारे वज्रस्फोटीं रक्तवर्णां एकवक्त्रां द्विभुजां विकृतवदनां वज्रस्फोटहस्तां, उत्तरद्वारे वज्रघण्टां श्वेतवर्णां एकवक्त्रां द्विभुजां विकृतवदनां वज्रघण्टाहस्तां; एता आलीढपदस्थाः सूर्य्यासनाः सूर्य्यप्रभा ज्वालामालाकुलाः सर्पाभरणा द्रष्टव्याः।

ऊर्द्धे ऊष्णीषविजयामधः सुप्रभां विभावयेत्।
चक्रं च नागपाशं च ध्यात्वा मन्त्रं स्फुरन् जपेत्॥

ॐ तारे तुत्तारे तुरे स्वाहा।

दशाक्षरैर्दश देवत्यो दशपारमिताश्रयाः।
भावनीयाः प्रयोगेन सर्व्वकार्य्यप्रसिद्धये॥
एतन्मन्त्रवरं श्रेष्ठं सर्व्वबुद्धैर्नमस्कृतम्।
पठितसिद्धिकरं तीव्रं वज्रपञ्जर भाषितम्॥

अनेन मन्त्रेण पटाञ्चलं सप्ताभिमन्त्रितं कृत्वा ग्रन्थिं बद्धा विन्ध्यायामपि गच्छन् न केनाप्यवलीयते। व्याघ्रचौरनक्रसिंहसर्पदन्तिमहिषभल्लुकगवयादयो नामस्मरणमात्रेण नश्यन्ति विलीयन्ते। अनेन मन्त्रेणोत्पलानामष्टोत्तरशतं यावद् जपेत्। ॐ तारे तुत्तारे तुरे अमुकीं मे वशमानय स्वाहा, अनेनैव मन्त्रेण काकपक्षं द्वात्रिंशद् वारान् परिजप्यारिगृहे गोपयेत् सप्ताहेनोच्चाटयति। ॐ तारे तुत्तारे तुरे चल प्रचल शीघ्रगामिनि देवदत्तमुच्चाटय हुँ हुँ फट्।

---

[1] B सर्व्वा०।
[2] A °लोयेत्।
[3] AC °पञ्चल०

अथापरोऽपि प्रयोगो भवति। ॐ तारे तुत्तारे तुरे अमुकाभिधानां कुमारीं मह्यं विवाहेन तस्याः पिता प्रयच्छतु स्वाहा।

मदनं चण्डबीजं च तथोन्मत्तकमेव च।
अशोकपत्रं पुष्पं च जुहुयात् सहस्रपञ्चकम्॥
घृतमधुगुडहोमं कन्यासिद्धौ[1] प्रशस्यते।
सप्ताहेन तदा योगी लभेत कन्यां स्ववाञ्छिताम्॥

अथापरोऽपि प्रयोगो भवति। ॐ तारे तुत्तारे तुरे अमुकाभिधानां स्वस्थानत[2] आकर्षय ममान्तिकं जः, अनेन मन्त्रेण वदरीकण्टकानां पञ्चसहस्राणि स्वयम्भू-कुसुमाक्तानि[3] जुहुयात्। अनेन कृतेन नृपाणामपि कन्यामाकर्षयेदिति।

अथापरोऽपि प्रयोगो भवति। रजस्वलाकर्पटे भगवतीं द्विभुजामेकाननामङ्कुशोत्पलपाशहस्तां विलिख्य तस्याः पुरतः पूजां कृत्वा इमे पुण्याः शुभा दिव्या इत्यादिना पश्चात् मन्त्रं जपेत् भावान्वितः— ॐ तारे तुत्तारे तुरे अमुकीं मम ईप्सितस्वप्नं कथय हुं फट्। पञ्चसहस्रेणा-गच्छति। पाशेन गलके बद्ध्वा अङ्कुशेन विदार्य च साध्यं पादतले ध्यात्वा दासीरूपेण भुञ्जयेत्।

अथापरोऽपि प्रयोगो भवति। ताराधारणीं मन्त्राभि-मन्त्रितां कृत्वाऽऽत्मनोऽस्थिहृदयं मार्जयेत्। राजकुलस्यान्तिके प्रविशेत्। अथ स राजा शिष्यवद् गौरवं करोति, विरुद्धं

---

[1] सिद्धौ [2] स्वस्था।
[3] °कुसुमानि

न वक्ति, प्रमादं च प्रयच्छति, प्रियालापं करुते, दासतामुपैति, कुद्धोऽपि वशे भवेदिति दृष्टप्रत्ययः सङ्कृतः।

अथापरोऽपि प्रयोगो भवति। ताराधारणीं शतधाऽऽवर्त्य द्विवदनाशीविषं भस्म कृत्वा रक्तवर्णगो(गावी)घृतेन अर्कतूलेन वर्त्तिं कृत्वा प्रज्वाल्याञ्जनं पातयेत्। तमञ्जनं वज्रसूर्य्यवज्रधर्म्माभ्यां समर्द्य परमान्नेन धूपयेत्। भस्मना मार्ष्टमष्टिमञ्जयेत्। यां पश्यति चक्षुर्वज्रेण सा यदि पद्मनर्त्तेश्वरं न रक्षति तदाऽहं तारा न भवेयम्, घातिताश्च बुद्धा भगवन्तो मया भवेयुरिति।

अथापरोऽपि प्रयोगो भवति। अदशनशिशुलोलां गृहीत्वा ताराधारण्या समाभिमन्त्रितां कृत्वा भृङ्गराजमूलेन गोरोचनया मार्ष्टमेकीकृत्य ललाटे तिलकं परिधाय यां पश्यति, तां वश्यां करुते, नान्यं रमते, नान्यस्मिन् गच्छति, स्वयं न त्यजति।

अथापरोऽपि प्रयोगो भवति। उदरकोटिं ताराधारण्या समाभिमन्त्रितं कृत्वा वज्रधर्म्मेण मार्ष्टं कन्यायै ताम्बूलेन दद्यात्। अभ्यवहृते योगवरेण मुञ्चति, नान्यं रमते, नान्यस्मिन् गच्छति, स्वपतिं त्यजति।

अथापरोऽपि प्रयोगो भवति। महातैलेनात्मानमभ्यङ्ग्य ताराधारणीं जपेदयुतमेकं भावनान्वितः। जपान्ते शालिपिष्टकुड्मल्या शष्कुलिका यस्यै दीयते, सा पञ्चतायामपि न मुञ्चेदिति।

---

[1] A समर्द्य।
[2] A सार्षपि।
[3] ANC यां यां।
[4] A कुन्दमल्या, N कुट्टमल्या।
[5] A परमान्नेन
[6] ANC च्छति
[7] A मूर्च्छति

अथापरोऽपि प्रयोगो भवति। चन्द्रोपरागसमये ताराधारणीं जपन् सेवां कृत्वा तज्जूतलोकेश्वरं गृह्य शङ्खचूर्णं भावयेत्। प्रमदायै दातव्यम्। पञ्चतायामपि तमनुवर्त्तते।

अथापरोऽपि प्रयोगो भवति। ताराधारणीमन्त्रेण मदनफलमष्टोत्तरशतवारान् परिजप्य तेन फलेन हयग्रीवेन सार्द्धं यां स्पृशति सा वश्या भवति।

अथापरोऽपि प्रयोगो भवति। ॐ तारे तुत्तारे तुरे अमुकस्य बन्धनमुक्तिं कुरु मुः स्वाहा, अनेन मन्त्रेणार्कदलं साध्यनामविदर्भितं लिखित्वा कुलीरगर्त्ते स्थापयेत्, बन्धनमुक्तिर्भवति।

॥ वज्रतारासाधनं समाप्तम् ॥

94.

नमस्कार्य[1]

अथातः सम्प्रवक्ष्यामि वज्रताराप्रसाधनम्।
होमकर्म्मविधानेन सर्व्वकामार्थसाधनम्॥

तत्रेमानि मन्त्रपदानि भवन्ति। तद्यथा, नम आर्य्यावलोकितेश्वराय बोधिसत्त्वाय महासत्त्वाय महाकारुणिकाय, तद्यथा, ॐ तारे तुत्तारे तुरे सर्व्वदुष्टप्रदुष्टान् मम कृते जम्भय स्तम्भय मोहय बन्धय हुँ हुँ हुँ फट् फट् फट्, सर्व्वदुष्टस्तम्भनि तारे स्वाहा। तत्रादौ तावत् स्वहृदि

[1] A नमः। AN °क्षति।
A फट फट only.

चन्द्रमण्डले ताँकारबीजं ध्यात्वा तद्रश्मिसमाकृष्टगुरुबुद्ध-बोधिसत्त्वान नानाविधपूजादिभिः सम्पूज्य पापदेशनादिकं कृत्वा त्रिशरणगाथां पठेत्। ततश्चतुर्ब्रह्मविहारान भावयित्वा ॐ शून्यताज्ञानवज्रस्वभावात्मकोऽहमिति मन्त्रमुच्चारयेत्। ततः पंकारजपद्मं चन्द्रमण्डलोपरि ताँकारबीजं पुनरपि ध्यात्वा तत्परिणामेन—

मातृमण्डलमध्यस्थां तारादेवीं विभावयेत्।
अष्टबाहुं चतुर्वक्त्रां सर्व्वालङ्कारभूषिताम्॥
कनकवर्णनिभां भव्यां कुमारीरूपधारिणीं उज्ज्वलाम्।
विश्वपद्ममहामौलिचन्द्रासनसमंस्थिताम्॥
पीतकृष्णसितरक्तश्यामवर्णचतुर्मुखाम्।
प्रतिमुखं त्रिनेत्रां च वज्रपर्य्यङ्कसंस्थिताम्॥

रक्तप्रभां चतुर्बुद्धमकुटीं वज्रशरशङ्खवरदमुद्रिणीं ललत्करां उत्पलचापवज्राङ्कुशवज्रपाशमतर्जनीवाममत्कराम—

वज्रपर्य्यङ्कयोगेन साधयेद् भुवनत्रयम्।
तदग्रतः पुष्पतारां सितवर्णां मनोरमाम्॥
ॐकाराक्षरनिष्पन्नां पुष्पदामकराकुलाम्।
द्विभुजां चैकवक्त्रां तु सर्व्वालङ्कारभूषिताम्॥
दक्षिणे धूपतारां च कृष्णवर्णां सुरूपिणीम्।
धूपघटीकरव्यग्रां सर्व्वालङ्कारशोभिताम्॥
पश्चिमे दीपतारां च पीतवर्णां मनोहराम्।
दीपयष्टिधरां दिव्यां चलत्कनककुण्डलाम्॥
उत्तरे गन्धतारां वै गन्धशङ्खकराकुलाम्।
रक्तवर्णनिभां देवीं भावयेद् गर्भमण्डले॥

एता एकवक्त्रा द्विभुजाः सर्व्वालङ्कारभूषिता वज्रपर्य्यङ्किन्यश्चेति । एताः षड् देव्य ईषत्करालवदना ललिताक्षेपसंस्थिताः । एताः सर्व्वा मण्डलचक्रे ध्यात्वा हृद्बीजरश्मिसमानीतज्ञानचक्रं जः-हुं-वं- होरित्येतैराकर्षणादिकं कुर्य्यात् ।

पूर्व्वद्वारे ततो ध्यायाद् वज्राङ्कुशीं मितद्युतिम् ।
वज्राङ्कुशसचिह्नकरात्मकं मनोहराम् ॥
दक्षिणद्वारे वज्रपाशीं कृष्णामतिरतिप्रियाम् ।
दिव्यालङ्कारभूषाङ्गीं वज्रपाशधरां वराम् ॥
वज्रस्फोटां पीतवर्णां वज्रस्फोटाङ्कसत्कराम् ।
चिन्तयेत् पश्चिमे द्वारे नानालङ्कारभूषिताम् ॥
वज्रघण्टामुत्तरद्वारे वज्रघण्टायुधामथ ।
रक्तवर्णां शुभां शश्वत् पश्येद् वै दिव्यरूपिणीम् ॥
ऊर्द्ध्वे उष्णीषविजयां पीतवर्णां सुरूपिणीम् ।
ध्यायात् सम्बाधिफलदां मन्त्री चक्रधरां ततः ॥
तन्नेमण्डलन्यायः कृष्णवर्णां विभावयेत् ।
सुभां भास्वरसदृपां नागपाशलसत्कराम् ॥
द्विभुजा एकवदनाः सर्व्वा ज्ञेया मनोहराः ।
अक्षरैर्दशभिर्युता देव्यो दश निर्म्मिताः ।
दशपारमिताः शुद्धाः सर्व्वकर्म्मप्रसिद्धये ॥

तच्च दशाक्षराणि— ॐ तारे तुत्तारे तुरे स्वाहा ।

---

[1] AN ह्रीम्य तं० ।
[2] ANC read सुरूपिणीं after पीतवर्णां
[3] C omits चिन्तयेत्.....चक्रधरां ततः ।
[4] ANC ०मुत्तरे ।
[5] B ०क्रमेक० ।
[6] B भास्वरत०

तथा चित्तवाक्कायाधिष्ठानाभिषेकबिन्दुक्षुक्षयोगजापादयोऽपि ध्यातव्या इति।

एतन्मन्त्रवरं श्रेष्ठं सर्व्वबुद्धैर्नमस्कृतम्।
पठितसिद्धिकरं दिव्यं वज्रपञ्जरभाषितम्॥

इति।

अथायं उपचारः। अनेन मन्त्रेण पटाञ्चलं गृहीत्वा सप्ताभिमन्त्रितं कृत्वा ग्रन्थिं बद्ध्वा विन्ध्याटवीमपि[1] गच्छन्न केनाप्यवलीयते, व्याघ्रचौरनक्रसिंहसर्पदन्तिमहिषभल्लुकगवयाश्वादयो नश्यन्ति विलीयन्त इति। तथा अनेन मन्त्रेणोत्पलानामष्टोत्तरशतं जुहूयात्, ॐ तारे तुत्तारे तुरे अमुकीं मे वशमानय स्वाहा। यामिच्छति तां वशमानयति। तथा अनेन मन्त्रेण काकपक्षं द्वाविंशद्वारान् परिजप्यारिगृहे गोपयेत्, सप्ताहेनोच्चाटयति— ॐ तारे तुत्तारे तुरे चल प्रचल शीघ्रगामिनि देवदत्तमुच्चाटय हुँ फट्। इति उच्चाटनविधिः।

अथापरः प्रयोगः। ॐ तारे तुत्तारे तुरे अमुकाभिधानां कुमारीं मह्यमुद्वाहेन तस्याः पिता प्रयच्छतु स्वाहा।

मदनं चण्डबीजं च उन्मत्तकफलं तथा।
अशोकपत्रं पुष्पं च जुहूयात् सहस्रपञ्चकम्॥
घृतमधुगुडहोमं वै कन्यासिद्धौ प्रशस्यते।
सप्ताहेन ततो योगी लभेत् कन्यां स्ववाञ्छिताम्॥

इति।

[1] ANC विन्ध्याया॰
[2] ANC तदुन्मत्तफ॰
[3] N बल प्रबल॰।
[4] A सुवा॰।

अथापरः प्रयोगः। ॐ तारे तुत्तारे तुरे अमुकाभिधानां स्वस्थानत आकर्षय ममान्तिके जः इत्यनेन[1] मन्त्रेण बदरकण्टकानि पञ्च सहस्राणि स्वयम्भूकुसुमाक्तानि होतव्यानि। एतेन नृपाणामपि कन्यामाकर्षयति।

अथापरोऽपि प्रयोगो भवति। रजःस्वलाकर्पटे भगवतीं द्विभुजामेकवक्त्रामङ्कुशपाशोत्पलहस्तां विलिख्य तस्याः पुरतः पूजां कृत्वा इमे पुष्पाः शुभा दिव्या इत्यादिना मन्त्रं जपेत् भावनान्वितः— ॐ तारे तुत्तारे तुरे अमुकीं ममेप्सितं स्वप्नं कथय हुं फट्। पञ्चमहस्रेणागच्छति।

पाशेन गलकं बद्ध्वा अङ्कुशेन विदार्य्य च।
चरणावुत्पलेनैव बद्ध्वाऽऽकृष्य ममन्तिकः।
माध्यं पादतले ध्यात्वा दासीरूपेण भुञ्जयेत्॥

अथापरः प्रयोगः। तारामारणीं सप्ताभिमन्त्रितां कृत्वा अक्षि द्वयमञ्जयेत्। राजकुलस्यान्तिके प्रविशति, स राजा गौरवादिकं करोति, एकान्ततो वश्यो भवतीति।

अथापरः प्रयोगः। तारामारणीं शतधाऽऽवर्त्त्य द्विवदनमाशीविषं भस्म कृत्वा रक्तवर्णगो गावी[2]घृतेनार्कतूलेन वर्त्तिकां च कृत्वा प्रज्वाल्याञ्जनं पातयेत्। तमञ्जनं सूर्य्यवज्राभ्यां[3] सम्यादृ परमान्नेन धूपयेत्। तद्धूमना माङ्गमक्षि अञ्जयेत्। यां पश्यति चक्षुर्वज्रेण सा यदि पद्मनर्त्तेश्वरं न रक्षति, तदाऽहं तारा न भवेयम्, घातिताश्च मे बुद्धा भगवन्तो भवेयुरिति।

---

[1] ANC अनेन। [2] A ०सुमानि।
[3] A दुस्थि०। [4] AN वज्रधर्म्माभ्यां, B वज्रसूर्य्यवज्रधर्म्माभ्यां।
[5] ANC क्षरति।

अथापरः प्रयोगः। उदर[1]कौटकं धारण्या[2] सप्ताभिमन्त्रितं कृत्वा वज्रधर्म्मेण माङ्गमेकीकृत्य ताम्बूलेन दद्यात्। अभ्यवहरति अनेन प्रयोगवरेण मुञ्चति स्वपत्नीवाचरति।

अथापरः प्रयोगो भवति। अदृशनशिशुलोलां गृहीत्वा ताराधारण्या सप्ताभिमन्त्रितां कृत्वा भृङ्गराजगोरोचनया माङ्गमेकीकृत्य ललाटे तिलकं परिधाय यां पश्यति तां वशं करुते।

अथापरोऽपि प्रयोगः। महातैलेनात्मानमभ्यङ्ग्य ताराधारणीमयुतमपि जपेत, भावयन् जपान्ते शालिपिष्टकेन कुड्मल्या[3] शक्कुलिकां[4] कृत्वा यस्मै दीयते स पञ्चतायामपि न मुञ्चति।

अथापरोऽपि प्रयोगः। चन्द्रोपरागसमये ताराधारणीं जपन, सेवां च कुर्व्वन, तदुद्भवलोकेश्वरेण शङ्खचूर्णं भावयेत्। तद् यस्यै दीयते सा [यावत्][5] पञ्चत्वमनुवर्त्तते।

अपरः प्रयोगः। ताराधारण्या मदनफलमष्टोत्तरशतवारान् परिजप्य तेन फलेन हयग्रीवेण माङ्गं यां स्पृशति सा वश्या भवति।

अपरोऽपि प्रयोगो भवति। ॐ तारे तुत्तारे तुरे अमुकस्य बन्धनमुक्तिं कुरु स्वाहा अनेन मन्त्रेणार्कदले साध्यनामविदर्भितं विलिख्य कुलीरगर्त्ते[6] गोपयेत्, बन्धनमुक्तिर्भवति।

॥ इति वज्रतारासाधनं समाप्तम् ॥

---

[1] B ०कोटं।
[2] धारण्या dropped in A.
[3] A कुदुमल्या०. N कुट्टमल्या
[4] ABC शंकुलिकां
[5] AC यत्।
[6] AC ०गर्भे।

95.

नमो वज्रतारायै ।

वज्रतारां नमस्कृत्य गुरुपूर्व्वक्रमागताम् ।
तस्याश्च साधनं स्पष्टं लिख्यते स्मृतये मया ॥

मनोऽनुकूले स्थाने सुखासनोपविष्टो योगी ॐ रक्ष रक्ष हुँ हुँ फट् स्वाहा इति स्थानात्मयोगरक्षां कृत्वा हृच्चन्द्रे ताँकारं दृष्ट्वा तद्रश्मिभिः समाकृष्टां भगवतीं वज्रतारां समाखण्डनेयां वक्ष्यमाणभुजायुधां समालम्ब्याकाशे पुष्पादिभिः सम्पूज्य —

रत्नत्रयं मे शरणं सर्व्वं प्रतिदिशाम्यघम् ।
अनुमोदे जगत्पुण्यं बुद्धबोधौ दधे मनः ॥

इत्युच्चार्य्य मैत्र्यादिभावनां कुर्य्यात । सर्व्वमत्त्वा मया संसारदुःखादुद्धृत्य महासुखे बुद्धत्वे [प्रतिष्ठापयितव्या इति] सर्व्वाकारवरोपेतशून्यतां भावयेत । चित्तमेवेदं भ्रान्तं तेन तेनाकारेण प्रतिभासते । यथा स्वप्ने चित्तादन्यच्च ग्राह्यं न विद्यते ग्राह्याभावात्, चित्तमपि ग्राहकं न भवति, तस्माद् विश्वमिदं निःस्वभावं प्रकृतिपरिशुद्धं आद्यमनुत्पन्नं पश्येत् ।

तदनु आकाशे पूर्व्वप्रणिधानबलादुत्पन्नं शुद्धलौकिकविज्ञानस्वभावं रेफोद्भवं सूर्य्यमण्डलं तदुपरि क्षणाहुँकारेण परिणतां शुक्लधर्म्मोदयां ऊर्द्ध्वस्थितां त्रिकोणां अन्तःशुषिरां विश्वपद्मविश्ववज्राधिष्ठितमध्यां ध्यात्वा विश्व-

This *Sadhana* is only to be found in B. *See* Fol. 67A

वज्रवेदिकायां चत्वारि महाभूतानि भावयेत्। लँकारजं पृथ्वीमण्डलं पीतं चतुरस्रं कोणेषु चिह्न[चि]कवज्राङ्कितम्, तदूर्द्ध्वं वँकारजं वरुणमण्डलं शुक्लं वर्त्तुलघटाङ्कम्, तदुपरि रेफपरिणतमग्निमण्डलं त्रिकोणं कोणेषु रेफाङ्कितम्, तदुपरि यँकारपरिणतं वायुमण्डलमर्द्धचन्द्राकारमन्तद्वयेन चलत्पताकाङ्कितं धूम्रवर्णं चिन्तयित्वा, तत्परिणतं कूटागारं पञ्चरत्नमयं चतुरस्रं चतुर्द्वारं चतुस्तोरणभूषितं हारार्द्धहारपट्टस्रग्दाममण्डितं अष्टस्तम्भोपशोभितं स्तम्भोपरि (वृत,वलयवज्रावलीवृतं मध्यपुटेषु पञ्चसु द्वारेषु अध ऊर्द्ध्वं च विश्वपद्मम्। तत्र मध्यासने अकारादिषोडशस्वरपरिणामेन चन्द्रमण्डलमादर्शज्ञानस्वभावं तदुपरि ककारादिचतुस्त्रिंशद्वज्रैः सूर्य्यमण्डलं तयोरेकतां समताज्ञानं तदुपरि ताँकारजोत्पलकर्णिकायां चन्द्रस्थताँकारं प्रत्यवेक्षणाज्ञानं तद्बीजरश्मिभिराकृष्टानां सर्व्वतथागतानां प्रवेशे कृत्यानुष्ठानज्ञानं तदनु भगवत्या निष्पत्तिः सुविशुद्धधर्म्मधातुज्ञानम्। एवं पञ्चाकाराणि सम्बोधिक्रमेणैव ताँकारनिर्गतस्वबीजचिह्नपरिणामनिष्पन्नदशदेवत्या महैव निष्पन्नां तां भगवतीं चिन्तयेत् पीतवर्णां पीतकृष्णरक्तश्वेतमिति चतुर्वक्त्रामष्टभुजां वज्रपाशशङ्खशरवरददक्षिणकरां वज्राङ्कुशोत्पलकार्म्मुकतर्ज्जनीवामकरां सर्व्वालङ्कारभूषितां रक्तप्रभाविभूषितां नवयौवनां वज्रपर्य्यङ्किनीं विश्वपद्मासनस्थितां पञ्चतथागतमुकुटिनीं ध्यायात्।

पूर्व्वदले पुष्यतारां श्वेतां ॐकारजां द्विभुजां पुष्यमालाधारिणीं सर्व्वालङ्कारभूषिताम्, ताकारेण दक्षिणे

धूपतारां कृष्णां धूपशाखाकराम्, रेकारेण पश्चिमे दीपतारां पीतां दीपयष्टिकराम्, तुकारेण उत्तरे गन्धतारां रक्तां गन्धशङ्खकरां ध्यायात् : गर्भमण्डले ताकारेण अङ्कुशतारां अङ्कुशहस्ताम्, दक्षिणे रेकारेण पाशतारां कृष्णवज्रपाशहस्तां, पश्चिमे तुकारेण स्फोटतारां पीतवर्णां निगडहस्ताम्, उत्तरे रेकारेणावेशतारां रक्तां घण्टाकराम्, अधसि स्वाकारेण सुम्भतारां कृष्णां नागपाशकराम्, ऊर्ध्वे हाकारेण उष्णीषविजयतारां पीतां चक्रधरां ध्यायात् ।

तदनु हृच्चन्द्रस्थितचिह्नबीजपरिणतज्ञानसत्त्वहृच्चन्द्रे ताँकारं दृष्ट्वा तद्रश्मिभिर्ज्ञानमण्डलमाकृष्य सम्पूज्य जः हूँ वँ होः इत्यनेन मन्त्रेण आकर्षणप्रवेशनबन्धनतोषणं कुर्य्यात् । तदनु चक्षुरादिषु मोहवज्रादयः षट् चिन्तनीयाः, कायवाक्चित्तेषु ॐ-आः-हुँकारपरिणताः खेचरीभूचरीनैरात्माश्चिन्तनीयाः । तदनु हृद्बीजरश्मिभिराकृष्टान् तथागतान् सम्पूज्य अभिषेकं प्रार्थयेत् । अभिषिञ्चन्तु मां सर्व्वतथागता इति । तैस्तथागतैर्ज्ञानामृतपूर्णकलशैरभिषिच्यते । अभिषिच्यमानानां अभिषेकजिनाः शिरसि जायन्ते । तत्र भगवत्या रत्नसम्भवः, पुष्यतारादीनां यथाक्रमं वैरोचनाक्षोभ्यामिताभाऽमोघसिद्धयः, अङ्कुशतारादीनामपि ते एव । अधोदेवत्यूर्द्धदेवत्योरक्षोभ्यवैरोचनौ हृद्बीजनिर्गतपुष्पादिभिः सम्पूज्य, वीणादिभिः संस्तुत्य, रसवज्रादिभिः ढौकितं समासाद्य, प्रत्येकं स्फुरणेनाखेदनपर्य्यन्तेन जगदर्थं कारयित्वा पुष्पादयः क्रमेण भगवत्या हृदये प्रतिष्ठाश्चिन्तनीयाः । भगवत्या

अपि स्फुरणयोगेन सर्व्वमेव विश्वं मायोपमस्वप्नोपमनिज-चित्ताधीनमाक[ल]य्य स्वहृद्बीजे प्रतिष्ठा ध्येया। तदनु तद्बीजं रश्मिपुञ्जाकारं क्रमावलीनं सूक्ष्मबिन्दुरूपं महा-सुखमयं ध्यात्वा तमपि निरुपलब्धिं कुर्य्यात्। पुनर्भ्रूटिति आविर्भूतं मण्डलं दृष्ट्वा बलिं दद्यात् ॐ अकारो मुखं सर्व्वधर्म्माणां आद्यमनुत्पन्नत्वात्। ॐ आः हुँ फट् स्वाहा इत्यनेन मन्त्रेण दिक्पालेभ्यः। तदनु मन्त्रं जपेत् ॐ तारे तुत्तारे तुरे स्वाहा। मालामन्त्रं वा ॐ आर्य्यावलोकितेश्वराय बोधिसत्त्वाय महासत्त्वाय महा-कारुणिकाय, तद्यथा, ॐ तारे तुत्तारे तुरे सर्व्वदुष्ट-प्रदुष्टानां मम कृते जम्भय स्तम्भय मोहय बन्धय हुँ हुँ हुं फट् फट् फट् सर्व्वदुष्टस्तम्भनि तारे स्वाहा।

विधाय वज्रतारायाः साधनं यन्मयार्ज्जितम्।
शुभं तेन जनाः सर्व्वे मन्त्रमम्बुजभास्कराः॥

॥ इति वज्रतारासाधनम् ॥

[1] Then follows the same *Prayogas* as given in the two previous *Sadhanas* of Vajratara

96.

नमो वज्रतारायै।

वज्रतारां नमस्कृत्य सितवर्णां मनोरमाम्।
तत्साधनविधिं वक्ष्ये सर्व्वसत्त्वार्थहेतुना॥

इह भावनाधिकृतो योगी स्वहृदि चन्द्रमण्डले ताँकारं विचिन्त्य मुखशौचादिकं कुर्य्यात्। अत्यन्तसुखासनोपविष्टः स्वहृद्बीजात् रश्मिं निश्चार्य्य तेन रश्मिनाऽऽकृष्य तारा-भट्टारिकां पुरतोऽन्तरीक्षेऽवस्थाप्य गुरुबुद्धबोधिसत्त्वांश्च पुरतः पापदेशनादिकं कुर्य्यात्। पापदेशना अकरणसंवरं अनुमोदना परिणामना त्रिशरणगमनं बोधिचित्तोत्पादनं मार्गाश्रयणं चतुर्ब्रह्मविहारौभावना। ॐ शून्यताज्ञान-वज्रस्वभावात्मकोऽहमिति शून्यताभावनां च विभाव्य बिम्बनिष्पत्तिभावनां च भावयेत्। ततः पंकारपरिणतं सितमष्टदल[1] कमलं तन्योपरि अकारपरिणतं चन्द्रं चन्द्रो-परि ताँकारपरिणतं सितमुत्पलं उत्पलमध्ये चन्द्रं चन्द्रमध्ये ताँकारं ताँकाराद् गगनतलं विश्वं च तारारूपेण संस्फार्य्य तारारूपेण त्रिभुवनस्थितान् सत्त्वान् व्यवस्थाप्य पुन-स्तत्रैव ताँकारे संस्फार्य्य[2] उत्पलचन्द्रे ताँकारपरिणत-तारा[3]भट्टारिकारूपेणात्मानं पश्यति। सितवर्णां सित-कमलोपरि चन्द्रासनस्थां वज्रपर्य्यङ्किनीं सितचन्द्राश्रितां षोडशाब्दवपुषमतीं नानाभरणभूषितां दक्षिणे हस्ते वरदां वामेनोत्पलधारिणीं अशेषमारविध्वंसन्तीं स्वकायरोम-

[1] AC ०मष्टदलं।
[2] A सम्पूर्य्य, N संहार्य्य।
[3] A ०वपुः०।

कूपतो बुद्धबोधिसत्त्वान् स्फुरन्तीं भावयेत्। ईदृशीं भावनां स्थिरीकृत्य मन्त्रं जपेत्। स्वहृदि सितमष्टारचक्रं विचिन्त्य अरं प्रति अष्टौ अक्षरान् विभाव्य मध्ये स्वाहाकारं दत्त्वा जपेत्, मनसा वाचयेन्मन्त्रं ॐ तारे तुत्तारे तुरे स्वाहा। अनेन चिन्तितमात्रेण सर्व्वमारैरवध्यो भवेत्।

कविता वक्तृता चैव प्रज्ञा चात्यन्तनिर्म्मला।
कल्पान्तं (अपि) जीवनोपायमुक्तं वज्रभृता स्वयम्॥
राजानो वशगास्तस्य शान्ताः पुरजनैः सह।
अप्यखण्डितरोमात्मा सर्व्वश्चपु सर्व्वदा॥
(आर्य्य)वज्रतारा महातेजाः सर्व्वसिद्धिप्रदायिका।
दत्त्वा तु दक्षिणां वा[ऽपि] सुवर्णरजतादिकम्॥
श्रोतव्यं परया भक्त्या पण्डितेन महात्मना।
अभिषेकाग्रलब्धो यो गुरुभक्तिपरात्मकः॥
स श्रोता च भवेदत्र प्रोक्तो जिनगणैः सदा।
अन्यथा नैव सिद्धति यदि साक्षात् स्वयं जिनः॥

॥ वज्रतारासाधनं समाप्तम्।

। कृतिरियं आर्य्यनागार्জ্জুনपादानाम्॥

---

[1] A अलि।
[2] AC परमया।
[3] AN °मारः अ०।

97.

नमस्तारायै ।

प्रथमं तावन्मन्त्री स्वहृद्यकारपरिणतं चन्द्रमण्डलं तच्च स्थिततताँकारं पीतवर्णं तत्परिणतं नवसूचिकवज्रं तद्धरटके ताँकारं भावयेत् । तद्रश्मिभिरानीतज्ञानसत्त्वस्वभावां भगवतीं वक्ष्यमाणभुजचिह्नाद्यलङ्कृतां अष्टभुजां चतुर्वक्त्रां वज्रपर्य्यङ्कनिषण्णां दशदेवतीपरिवृतां नभसि दृष्ट्वा स्वहृद्बीजनिर्गतपुष्पादिपञ्चोपचारपूजाभिः सम्पूज्य पापदेशना-पुण्यानुमोदना-त्रिशरणगमन-बोधिचित्तोत्पाद-मैत्रीकरुणामुदितोपेक्षा भावयेत् । ततः सर्व्वधर्म्मानात्मानं च स्वप्नोपमं निःस्वभावं आद्यमनुत्पन्नमधिमुच्य मन्त्रमुच्चारयेत् ॐ शून्यताज्ञानवज्रस्वभावात्मकोऽहम् । तदनन्तरं बोधिचित्तमनुस्मृत्य आकाशे रँकारपरिणतं सूर्य्यमण्डलं तच्च हुँकारपरिणतं त्रिसूचिकवज्रं तद्रश्मिसम्भूतं तावदिच्छाविस्तरं जाज्वल्यमानं वज्रप्राकारं तद्रश्मिनिर्म्मितवज्रपञ्जरं वज्रभूमिं बाह्यसीमाबन्धं च ध्यात्वा तद्रश्मिभिर्विघ्नानुत्सार्य्य पञ्जरमध्ये आकाशस्वभावां धर्म्मोदयामेकाराकारां अधः सूक्ष्माग्रामुपरि विशालां शुक्लां विभावयेत् । तन्मध्ये गगनस्वरूपविश्वदलकमलकर्णिकास्थितत्रिसूचिकवज्रं तद्देहिकाव्यापीनि चतुर्म्महाभूतमण्डलानि । यँकारपरिणतं अर्द्धचन्द्राकारं नीलं वायुमण्डलं कटिद्वये खलत्पताकाङ्कितम्, तदुपरि रँकारजं अग्निमण्डलं त्रिकोणं

AC ०सूक० ।
A सूक्ष्मामु०, N ०खोपरि० ।
AC ०सूक०
N omits.

रक्तं कोणेषु[1] रेफाङ्कं तस्योपरि वँकारजं वरुणमण्डलं वर्त्तुलं मितघण्टाङ्कं[2] तदुपरि लँकारजं माहेन्द्रमण्डलं पीतं चतुरस्रं कोणेषु चिह्नचिकवज्राङ्कितं तत्स्वभावं मायोपमं विज्ञानं विदित्वा चतुर्म्महाभूतपरिणामजं परिशुद्धबुद्धक्षेत्रसंक्षेपरूपं महामोक्षपुरं वैरोचनस्वभावं विश्ववज्रवेदिकामध्ये नानारत्नमयं कूटागारम्—

चतुरस्रं चतुर्द्वारमष्टस्तम्भोपशोभितम् ।
चतुर्वेदीपरिक्षिप्तं चतुस्तोरणमण्डितम् ॥

हारार्द्धहारपट्टा(घण्टा)दर्शचामरविचिचपताकाघण्टाविभूषितम्। तस्य गर्भपुटे अष्टदलं पद्मं सकेशरं[3] वरटकोपरि अकारपरिणतं चन्द्रमण्डलमादर्शज्ञानस्वभावं तस्योपरि ताँकारं पीतं समताज्ञानस्वभावं सूर्य्यमण्डलाक्रान्तम्[4]। ततः ताँकारपरिणतं कनकवर्णं नवसूचिकवज्रं बीजगर्भप्रत्यवेक्षणास्वभावं तन्निर्गतरश्मिभिः स्फुरित्वा दशसु दिक्षु भगवत्याकारैः[5] मत्त्वार्थं कृत्वा पुनस्तचैव बीजचिह्नसंहरणकृत्यानुष्ठानस्वभावम्। ततो बीजचिह्नचन्द्रसूर्य्यपरिणतां भगवतीं सुविशुद्धधर्म्मधातुस्वभावाम्—

वज्रतारां चतुर्वक्त्रां सर्व्वालङ्कारभूषिताम् ।
अष्टभुजां कनकवर्णां कुमारीलक्षणोज्ज्वलाम् ॥
नवयौवनकान्तिमतीं चलत्कनककुण्डलाम् ।
चतुर्बुद्धमहामुकुटीं पद्मरागप्रभान्विताम् ॥

[1] A कोणेत्तु।
[2] A ०घण्टाकां
[3] A ०लकमलपद्मं।
[4] A वरटकपरिणतं
[5] A ०कान्तं।
[6] NC ०त्यङ्गारैः।

वज्रपाशं शरं शङ्खं बिभ्रती दक्षिणैः करैः ।
वामैः पीतोत्पलं चापमङ्कुशं तर्ज्जनीं तथा ॥
हेमाभं प्रथमं वक्त्रं शुक्लदक्षिणमुत्तरम् ।
लोहितं पश्चिमं नीलं वज्रपर्य्यङ्कमासनम् ॥
मन्त्रो हृद्बीजसम्भूतो मण्डलाधिपतेर्मुखात् ।
निर्गतो दशदेवीनां विभक्तो बीजतां गतः ॥

ॐ तारे तुत्तारे तुरे स्वाहा । पूर्व्वदिग्दलेषु चन्द्रमण्डलस्थानि ॐ तारेतु अक्षराणि पूर्व्वादिदिग्द्वारेषु[1] सूर्य्यमण्डलस्थानि त्तारेतुरे अक्षराणि ऊर्द्ध्वे सूर्य्यमण्डलस्थं स्वाक्षरमधः सूर्य्यमण्डलस्थं ह्राक्षरं तद्बीजाक्षरपरिणतानि चिह्नानि बीजगर्भाणि भावयित्वा तद्रश्मिभिः स्फुरणसंहरणं कृत्वा तद्बीजचिह्नपरिणता देव्यः—

विज्ञेया दश देवत्यो दशभूमिस्वरूपतः ।
वज्रपर्य्यङ्कयोगिन्य एकास्या द्विभुजास्च ताः ॥
चन्द्रस्थां पूर्व्वतस्तारां शुक्लवर्णां विभूषिताम् ।
पुष्पदामान्वितकरां भावयेत् प्रणवोद्भवाम् ॥
दक्षिणे धूपतारां तु (कृष्णां) चन्द्रे ताकारसम्भवाम् ।
धूपशाखान्वितकरां सर्व्वालङ्कारभूषिताम् ॥
पश्चिमे दीपतारां च पीतवर्णां सुभूषिताम् ।
दीपवृक्षान्वितकरां चन्द्रे रेकारसम्भवाम् ॥
चन्द्रे तुकारसम्भूतां गन्धतारां तथोत्तरे ।
गन्धशङ्खोद्यतकरां रक्तवर्णां सुभूषिताम् ॥

---

[1] AN omit, but add पार्श्व० before तर्ज्जनीं in the same line.
[2] A पूर्व्वदिग्द्वा० । [3] C drops this line. [4] A तुतार० ।

विदिग्दले तथा चिह्नमक्षोभ्यादिप्रभेदतः ।
वज्रचक्रं तथा पद्मं शङ्खं तद्वर्णभेदतः ॥
द्वारपालीस्तथा ध्यायात् सूर्य्यस्थाः सर्व्वभूषणाः
पूर्व्वद्वारेऽङ्कुशीं शुक्लां बीजत्ता[1] कारसम्भवाम् ॥
दक्षिणे अङ्कुशधरां वामतो दृष्टतर्ज्जनीम् ।
दक्षिणे पाशीं पीतां बीजरेकारसम्भवाम् ॥
सपाशतर्ज्जनीहस्तां रक्तमण्डलसंश्रिताम् ।
स्फोटां च पश्चिमे रक्तां तुबीजाक्षरसम्भवाम्[2] ॥
वज्रालीं तर्ज्जनीहस्तां वज्रमण्डलसुस्थिताम् ।
श्यामामुत्तरतो घण्टां बीजरेकारसम्भवाम् ।
वज्रघण्टान्वितकरां रश्मिस्थां वामतर्ज्जनीम्[3] ॥
कोणभागेषु चिह्नानि मामक्यादिविशुद्धितः ।
बोधिचित्तघटो मेरुर्वह्नि कुण्डं महाध्वजः ॥
ऊर्द्धे चोष्णीषविजयां सूर्य्ये स्वाकारसम्भवाम् ।
शुक्लवज्रधरां शुक्लां वामे च रिपुतर्ज्जनीम् ॥
नागपाशधरां नीलां सूर्य्ये हाकारसम्भवाम् ।
वामे च तर्ज्जनीं घोरामधः सुम्भां विभावयेत् ॥
सर्व्वासां चक्षुराद्यधिष्ठानं मोहवज्रां न्यस्येत् ।
नेत्रद्वयेषु वज्रां च कर्णयोर्मात्सर्यिकां तथा ।
घ्राणे वक्त्रे तु रागवज्रिकाम् ।

[1] A बीजन्तु० । [2] N तद्बीजा० ।
[3] N वज्रावलीं; but this does not suit the metre.
[4] A ०गतो । [5] A ०कुण्डलं ।
[6] A ०स्वाहार ।

काये चेर्ष्यावज्रां तु मनो नैरात्म्ययोगिनी ॥

इति चक्षुराद्यधिष्ठानं कृत्वा कायवाक्चित्ताधिष्ठानं ॐकारेण कायाधिष्ठानं आःकारेण वागधिष्ठानं हुँकारेण चित्ताधिष्ठानम्। ततः सर्व्वासां देवतीनां हृदि चन्द्रमण्डलस्थं बीजाक्षरं पश्येत्।

ततो रश्मिभिरानीतं ज्ञानसत्त्वस्य मण्डलम्। पुष्पतारादिदेवताभिः स्फुरित्वा सर्व्वपूजाभिः पूजयेत्। ततो ज्ञानसत्त्वमण्डलं द्वारपालीप्रयोगेन समयमण्डले प्रवेशयेत् ॐ वज्राङ्कुशि आकर्षय जः, ॐ वज्रपाशि प्रवेशय हुं, ॐ वज्रस्फोट बन्धय वं, ॐ वज्रावेश वशीकुरु होः। तदनन्तरं स्वहृद्बीजनिर्गतरश्मिभिः स्वधातुकस्थितान् बुद्धानानीय सम्पूज्य मातृभिरनुनाथ्यते[2], अभिषिञ्चन्तु मां सर्व्वतथागता बुद्धज्ञानेनेति। ततस्तैर्बुद्धैः हेरुकरूपैः पञ्चामृतभृतपञ्चतथागतात्मकैः कलशैः पञ्चभिरभिषिच्यते[3]। अभिषिच्यमाने पुष्पकुङ्कुमवृष्टिर्दुन्दुभिशब्दश्च भवति, देवताभिः पूज्यते स्तूयते च। अभिषिक्ते मूर्द्धि रत्नसम्भव उत्पद्यते, मध्यपुटदेवतीनां यथाक्रमं वैरोचनाक्षोभ्यामिताभाऽमोघसिद्धिस्तथागता द्वारपालीनां मुकुटेषु भवन्ति। उष्णीषाया रत्नेशः, सुभाया मुकुटे अक्षोभ्य उत्पद्यते। ततो भगवतीं निर्म्माणकायैः सर्व्वासु दिक्षु सत्त्वार्थं कुर्व्वन्तीं दृष्ट्वा मन्त्रं जपेत् ॐ तारे तुत्तारे तुरे स्वाहा।

[1] जः dropped in N.
[2] A ०नाथ्यते, C ०नाथ्यते।
[3] A वज्र०।
[4] A ०धातुस्थि०।
[5] A ०षिञ्चते।

एतन्मन्त्रवरं श्रेष्ठं सर्व्वबुद्धनमस्कृतम् ।
पठितसिद्धिकरं दिव्यं वज्रपञ्जरभाषितम् ॥

अथापरोऽपि धारणीमन्त्रः— नम आर्य्यावलोकितेश्वराय बोधिसत्त्वाय महासत्त्वाय महाकारुणिकाय तद्यथा ॐ तारे तुत्तारे तुरे सर्व्वदुष्टप्रदुष्टान् मम कृते जम्भय स्तम्भय मोहय बन्धय हुँ हुँ हुँ फट् फट् फट् सर्व्वदुष्टस्तम्भनि तारे स्वाहा ।

॥ वज्रतारासाधनं समाप्तम् ।

। कृतिरियं महापण्डितस्थविरधर्म्माकरमतिपादानाम् ॥

98.

नमस्कार्य

तारां प्रणम्य महतीं जननीं जिनानां
निःशेषदोषरहितां गुणिनां हिताय ।
तत्साधनं सुविशदैः सुपदैश्च भक्त्या
संलिख्यते वचनतः सुहृदामिहापि ॥
नापूर्व्वं लिख्यते किञ्चित् किन्तु वाक्याद् गुरोरपि
श्रुतं यत् तदपि स्मर्त्तुं संक्षेपतः प्रलिख्यते ॥

[1] AN पण्डित० ।
[2] A जनजीनिनां ।
[3] N सुविसच्च ।
[4] A उदयि ।
[5] A धर्म्माकरपा० ।
[6] AC महत्या ।
[7] AN वाक्यात् ।

प्रथमं तावत् प्रातरुत्थाय मन्त्री मुखचरणादिकं प्रक्षाल्य पवित्रीभूय विजने मनोऽनुकूले सुगन्धोपलिप्ते सुरभिकुसुमावकीर्णे च भूप्रदेशे सुखासनोपविष्टः स्वहृदये प्रथमस्वरपरिणतं शीतांशुमण्डलं विचिन्त्य तन्मध्ये कमनीयनीलनीरजं तत्किञ्जल्के निष्कलङ्कशशाङ्कमण्डलं तदुपरि पीततांकारबीजं पश्येत्। ततोऽपि पीततांकारबीजात् निःसृत्य जगन्मोहान्धकारापहारिभिर्मयूखसमूहैर्दशसु दिक्षु ये चापर्य्यन्ता लोकधातवो विद्यन्ते, तान् सर्व्वानवभास्य तत्रस्थानप्यसंख्येयानप्रमेयान् बुद्धबोधिसत्त्वांश्चाकाशदेशेऽप्यानीयावस्थाप्यन्ते। तदनु तेषामाकाशदेशावस्थितानां महाकारुणिकानां बुद्धबोधिसत्त्वानां दिव्यपुष्पधूपगन्धमाल्यविलेपनचूर्णचीवरच्छत्रध्वजघण्टापताकादिभिर्महतीं पूजां कृत्वा पापदेशनां कुर्य्यात्। यत्किञ्चिदनादिसंसारे संसरता मया पापकं कर्म्म कायेन वा मनसाऽपि कृतं कारितं क्रियमाणमनुमोदितं वा तत् सर्व्वं प्रतिदेशयामि, इत्यनेन विधिना प्रतिदेश्य पुनरकरणसंवरं प्रतिगृह्य पुण्यानुमोदनां कुर्य्यात्। सुगतप्रत्येकश्रावकार्जिनानां तत्सुतानामपि बोधिसत्त्वानां सदेवकसब्रह्मकलोकानां यत् कुशलं तत् सर्व्वमनुमोदयामीति। तदनु रत्नत्रयशरणगमनम्—

बुद्धं शरणं गच्छामि यावदाबोधिमण्डतः।

०शशाङ्क० dropped in A.
A समावेश्य सस्ता।
A विना।
A भूकुशलं।
०घण्टा० dropped in A.
A omits.
A सदेव०।
मण्डलः in A.

धर्म्मं शरणं गच्छामि यावदाबोधिमण्डतः[1] ।
सङ्घं शरणं गच्छामि यावदाबोधिमण्डतः[1] ॥

इति । पश्चात् मार्गाश्रयणम्, मार्गस्तथागतोक्तः स चाश्रयणीयो मया नान्य इति । तदनु अध्येषणां कुर्य्यात् । जगदर्थमामंसारं कुर्व्वन्तो भगवन्तस्तथागतास्तत्सुता अपि तिष्ठन्तु मां परिनिर्व्वान्तु इति । तदनु याचना, तादृशीं निरुत्तरां धर्म्मदेशनां भगवन्तस्तथागता देशयन्तु, यया झटित्येव संसारिणः सत्त्वा भवबन्धनान्निर्मुक्ता भवन्तीति । तदनन्तरं पुण्यपरिणामनां कुर्य्यात् । सप्तविधानुत्तरपूजापापदेशनाकुशलमूलमुपजातं तत् सर्व्वं सम्यक्सम्बोधये[2] परिणामयामीति । अथवा समासतः सप्तविधानुत्तरपूजास्तवकं श्लोकमेनं पठेत्—

सर्व्वं पापमहं देशामि परमं प्रीत्यानुमोदे[3] शुभान्
आ जन्मस्थितयेऽर्थये भगवतः सद्धर्म्मरत्नस्य च ।
रत्नानां त्रयमभ्युपैमि शरणं बोधौ दधे मानसं
तन्मार्गं च समाश्रये शुभविधीन् सम्बोधये[4] नामये[5] ॥

इत्यनेन सप्तविधानुत्तरपूजां विधाय ॐ मुः[6] इति विसर्ज्जयेत् । अथवा—

शीलचन्दनलिप्ताङ्गा ध्यानप्रावरणावृताः ।
बोध्यङ्गकुसुमाकीर्णा विहरध्वं यथासुखम् ॥

इत्यनेन । तदनन्तरं चतुर्ब्रह्मविहारं मैत्रीकरुणामुदितोपेक्षासंज्ञकं वक्ष्यमाणक्रमेण भावयेत् । तत्र केयं मैत्री ?

[1] मण्डलः in A.
[2] A omits.
[3] A मा ।
[4] A ०म्बोधिं ।
[5] A ०मोदान् ।
[6] या जन्म० in A.
[7] AN ॐ आः ऊं ।

सर्व्वसत्त्वेष्वेकपुत्रप्रेमतालक्षणा, अथवा हितसुखोपसंहारा-
कारेति। करुणा पुनः कीदृशी! दुःखाद् दुःखहेतोः
समुद्धरणकामता, चिद्दुःखदुःखमहानलप्रज्वलितसंसार-
लोहभवनप्रविष्टान् जन्तून् ततोऽपि समुद्धरामीत्यध्या-
शयो वा करुणा, अथवा चिद्दुःखदुःखितानां सत्त्वानां
संसाराम्बुधेः समुद्धरणेच्छा। मुदिता तु ईदृशी। प्रमोदो
मुदिता, अथवाऽसदृशे बुद्धत्वे तदुपाये च सर्व्व एव
संसारिणः सत्त्वा मया प्रतिष्ठापयितव्या इत्यध्याशयो
मुदिता, यद्वा विश्वेषां यानि कुशलानि तेषु तद्भोगै-
श्वर्य्यादिषु च आकृष्टचित्तता। कोपेक्षा! प्रतिघानुनय-
निबन्धनमपहाय हिताहितेषु जन्तुषु परमहिताचरण-
मुपेक्षा, यद्वा सर्व्वस्मिन् प्रेमानुशयरहित[1] परहितधर्म्म-
तायां स्वरसवाहिनी प्रवृत्तिरुपेक्षा, अथवा 'लाभालाभ-
यशोऽपयशोनिन्दास्तुतिसुखदुःखेत्याद्यष्टलोकधर्म्मप्रमुख-
सकलाप्रस्तुतव्यापारोपेक्षणमुपेक्षा। चतुर्ब्रह्मविहार-
भावनानन्तरं सर्व्वधर्म्मप्रकृतिपरिशुद्धतां भावयेत्। सर्व्व
एव धर्म्माः प्रकृत्या स्वभावेन परिशुद्धा अहमपि प्रकृति-
परिशुद्ध इत्यादिकमामुखीकुर्य्यात्। इमां च सर्व्वधर्म्म-
प्रकृतिपरिशुद्धतामनेन मन्त्रेणाधितिष्ठेत् ॐ स्वभाव-
शुद्धाः सर्व्वधर्म्माः स्वभावशुद्धोऽहमिति। यदि प्रकृति-
परिशुद्धाः सर्व्वधर्म्माः कुतस्तर्हि संसारमावहति! ग्राह्य-
ग्राहकादिमलावृतत्वात्। तद्विगमोपायः सन्मार्गभावना,
तया स निरुद्धः स्यात्। अतः प्रकृतिपरिशुद्धाः सर्व्व-

---

[1] A प्रतिद्यानयन०। [2] N परममहिताचरणा, A ०हितावरणाः।
[3] ०परहित० dropped in A [4] A लाभयशो०।

धर्म्मा इति सिद्धम्। सर्व्वधर्म्मप्रकृतिपरिशुद्धतां विभाव्य सर्व्वधर्म्मशून्यतां विभावयेत्। तच्चेयं शून्यता। ग्राह्य[1]ग्राहकादिसकलकल्पनाप्रपञ्चवञ्चितचिच्चाद्वैतप्रकाशमात्मकं सचराचरं विश्वमिति चिन्तयेत्। इमामेव शून्यतामनेनापि मन्त्रेणाधितिष्ठेत् ॐ शून्यताज्ञानवज्रस्वभावात्मकोऽहमिति। तदनु पूर्व्वहृदिस्थमृगाङ्कमण्डलमध्यवर्त्तिसमन्ती[2]लोत्पलकिञ्जल्काभ्यन्तरस्थितनिष्कलङ्कनिशानाथमण्डलोपरिस्थितात् पीतताँकारबीजाद् भगवतीमार्य्यतारामुत्तमश्यामवर्णां द्विभुजां प्रहसितवदनां निरुत्तराशेषगुणशालिनीं निःशेषदोषरहितां दिव्यसुवर्णमाणिक्यमुक्तारत्नाद्याभरणभूषितां मनोहारिहारावलीशताललङ्कृतकुचयुग्मां दिव्यकङ्कणकेयूरादिमण्डितबाहुद्वयां मेखलामलमणिगणकिरणावलीसुशोभितनितम्बभागां नानारत्नखचितरणन्नू[4]पुरविशोभितचरणयुगलां पारिजातादिकुसुममञ्जरीपरिमलपरिकलितचारुनिबद्धकेशां भगवदमोघसिद्धितथागतरत्नविराजितशिरोदेशां अतिशयमूर्त्तिमतीं परमशृङ्गारोज्ज्वलविग्रहां अभिनवयौवनवतीं शरदमलनीलोत्पलनेत्रां दिव्यसर्व्वपटाम्बरावृतशरीरां शकटचक्रप्रमाणसितकमलोपरिसितरश्मिमण्डलोपविष्टामर्द्धपर्य्यङ्कस्थितां दक्षिणकरेण वरदां वामेन विकचकान्तेन्दीवरं बिभ्रतीं निष्पाद्य चिन्तयेत्। एवंरूपां भगवतीं यावदिच्छति तावद् विभावयेत्।

[1] ग्राह्य०, dropped in N.
[2] A ०वलीन०।
[3] N विकचकाचका०।
[4] C ०वर्त्तुलवली०।
[5] C ०चलन्नूपुर०।

तदनन्तरमत्या एव भगवत्या हृदिस्थहिमांशुमण्डल-
मध्यावस्थितमञ्जुनीलसरोजकिञ्जल्कान्तर्गतकलङ्काङ्क-
वर्ज्जितकुमुदबान्धवमण्डलमध्यावलोनपीततताँकारबीज-
विनिर्गतानेकमरीचिमालाभि स्त्रैलोक्यालोककारिणीभि-
र्गत्वाऽनादिमंमिङ्गा भगवतो ज्ञानमत्त्वरूपाऽप्याकाशादा-
नीयते[1]। आनीय तामाकाशदेशेऽवस्थाप्य रत्नभाज-
नावस्थितसुगन्धितोयेन सुरभिकुसुमेन च तस्या एव
भगवत्याश्चरणार्घं दत्त्वा दिव्यपुष्पधूपदीपनैवेद्यगन्धमाल्य-
विलेपनचूर्णचीवरच्छत्रध्वजघण्टापताकादिभिर्बाह्यगुह्य-
पूजाभिर्बहुविधाभिश्च तामेव भगवतीं पूजयेत्। पुनः
पुनः सम्पूज्य स्तुत्वा च मुद्रां दर्शयेत्। सम्पुटाञ्जलिं कृत्वा
मध्यमे स्वचौं कुर्य्यात्। तयोः पर्व्वत्रयोपरि किञ्चित् सङ्कोच्य
तर्ज्जन्यौ धारयेत्। अङ्गुष्ठौ ममौ कृत्य तत्पर्व्वत्रयसमीपे
स्थापयेत्। अनामिके करपुटे स्थाप्य कनिष्ठे प्रसार्य्य
श्लिष्टीकृत्य दर्शयेदिति विकचोत्पलमुद्रेयम्। अनया मुद्रया
तामेव भगवतीं ज्ञानमत्त्वरूपां मन्त्राप्य अत्रैव समयसत्त्व-
रूपाया भगवत्या मन्त्रं भावयेदित्यनयोरद्वैतमधिमुच्चेत्।

तदनु निशीथिनीनाथमण्डलमध्यनिविष्टविकचनीला-
म्बुजकिञ्जल्कान्तर्लीननिष्कलङ्केन्दुमण्डलोपरिस्थितपीत-
ताँकारबीजनिर्गताश्चापर्य्यन्ताश्च तारादेव्या दशदिग्लोक-
धातून् ममव भान्त्य तत्स्थितानामपि सत्त्वानां नानारत्न-
वर्षणेन दारिद्र्यादिदुःखमपनयन्ति। क्षणिकनैरात्म्यादि-

[1] ०स्त्रैलोक्या० ..... कुसुमेन repeated in C.
[2] A ०दानीयन्ते।
[3] A ०लजावस्थित०।
[4] A ०मध्यविष्ट०।
[5] N ०धातुमव०।

धर्म्मदेशनामृतेन तान् मन्तर्पयन्ति। पुनः पुनर्नानाप्रकारं जगदर्थं कृत्वा विश्वमपि तारारूपं निष्पाद्य तत्रापि पीतताँकारबीजे तास्वान्तर्भवन्तीत्येवमादिस्फुरणसंहरणक्रमेण यावत् खेदो न जायते तावद् भावयेत्। भावनातः खिन्नो मन्त्रं जपेत्। तत्रायं मन्त्रः ॐ तारे तुत्तारे तुरे स्वाहा। महाप्रभाव एवायं मन्त्रराजः सर्व्वैरेव तथागतैर्वन्दितः पूजितः सत्कृतश्चेति ध्यानाद् व्युत्थितो जगत् तारारूपं दृष्ट्वा भगवत्यहङ्कारेण यथेष्टं विहरेदिति। प्रायोऽमुना क्रमेण भगवतीं भावयतोऽष्टमहासिद्धयश्चरणयोर्निपतन्ति, किं पुनरन्याः सिद्धयः! अपि तु ताश्च सुतरामेव। यश्च विजनगिरिगुहासीनः सन् भगवतीं भावयेत् स खलु प्रत्यक्षत एव तां पश्यति। स्वयमेव भगवती तस्याः श्वासप्रश्वासादिकं ददाति। किं बहु वक्तव्यं, परमदुर्ल्लभं बुद्धत्वमपि करतलगतं तस्यावतिष्ठते।

॥ इति किञ्चिद्विस्तरं तारासाधनं समाप्तम्।

पुण्यं मया भगवतः खलु साधने यत्
प्राप्तं प्रकृष्टममलं विपुलं च तेन।
तारे त्रिलोकविदिते वरसाधनं ते
कृत्वा जनो जिनपुरं त्वरितं प्रयातु॥
तारायाः साधनं किञ्चिद्विस्तरं विरचय्य यत्।
लब्धं तेन शुभं लोकः प्रयातु शमपत्तनम्॥
। कृतिरियं पण्डितस्थविरानुपमरक्षितानाम्॥

A व्यथितो। A बुद्धत्वं रिपुकर०।
A विलम्ब्य तत्। A लोकैः।

99.

नम आर्य्यांष्टमहाभयतारिण्यै ।

यस्याः स्मरणमात्रेण नष्टमष्टभयानकम् ।
तां प्रणम्य प्रवक्ष्यामि साधनं च शिशो शृणु ॥
ध्यात्वा गगनमध्ये तु तारामष्टभयापहाम् ।
पूजां मनोमयीं कृत्वा कुर्य्यात् पापस्य देशनाम् ॥
पुण्यानुमोदनां पश्चादात्मपुण्यस्य यातनाम् ।
आत्मभावं ततो दद्यात् शरणानि त्रिधा पुनः ॥
करोत्यकरणं पश्चात् शून्यतायास्त्वनन्तरम् ।
स्वहृच्चन्द्रे ततः पद्ममष्टदलविकाशिनम् ॥
तन्मध्ये तां विचिन्त्यैव नीलाभमुत्पलं ततः ।
तस्य मध्ये पुनर्बीजं वह्निरश्मिप्रभास्वरम् ॥
तेन देवीं समुत्पाद्य सर्व्वालङ्कारभूषिताम् ।
सव्यतो वरदां देवीं वामे तूत्पलकरां तथा ॥
एकवक्त्रां सुबिम्बां च नवयौवनसंस्थिताम् ।
सुगन्धिपुष्पकेशां च पद्मचन्द्रोपरिस्थिताम् ॥
अर्द्धपर्य्यङ्कमवष्टभ्य रक्षयेद् भुवनत्रयम् ।
अष्टदेव्यन्तराले च भावयेत् तारूपिणीम् ।
स्फुरन्मन्त्रतया योगी कृत्वा ध्यानमनाविलः ॥

ॐ तारे तुत्तारे तुरे स्वाहा । ॐ ॐ स्वाहा पूर्व्वे, ॐ ता स्वाहा दक्षिणे, ॐ रे स्वाहा पश्चिमे, ॐ तु स्वाहा उत्तरे, ॐ त्ता स्वाहा वह्निकोणे, ॐ रे स्वाहा नैर्ऋत्यां, ॐ तु स्वाहा वायव्ये, ॐ रे स्वाहा ऐशान्याम् ।

N ०चन्द्रं । A ०त्तालैश्च

सर्व्वाः श्वेताः स्फुरद्रूपा यथा देवी तथा पराः ॥

ॐ तां तारिण्यै वज्रपुष्पं प्रतीच्छ स्वाहा पुष्पं देयम्। गन्धनैवेद्यादिकं उत्पलमुद्रया निवेदयेदिति।

कृत्वा साधनमेवेदं नवदेवीसमन्वितम्।
हृत्वाऽष्टभयं च सर्व्वं करोतु जगदुत्तरम् ॥

॥ आर्य्याष्टमहाभयतारायाः साधनं समाप्तम् ॥

100.

पूर्व्वोक्तविधानेन शून्यताभावनानन्तरं रक्तआःकारजरक्तपद्मोपरि मितटाँकारजपद्मभाजने सूर्य्यस्थनीलहुँकारजसबीजकर्त्तिपरिणामेन कृष्णामार्य्यतारामट्टारिकां चतुर्भुजैकमुखीं त्रिनेत्रां खर्व्वलम्बोदरां दंष्ट्राकरालवदनां प्रत्यालीढपदेन शवारूढां नागाष्टकभूषणां व्याघ्रचर्म्मवसनां अवलम्बमानमुण्डमालां पञ्चमुद्राविभूषितां खड्गकर्त्तिधारिदक्षिणकरामुत्पलकपालधारिवामकरां माक्षोभ्यनाथपिङ्गलजटाजूटां अतिघोराट्टहासभीमरूपां निष्पाद्य ॐ ह्रौँ हुँ फट् इति मन्त्रं विषयप्रज्ञाधिकारेण जपेत्।

निरंशुमालिकां ध्यात्वा खड्गस्थाने विचक्षणः।
स्फुरत्संहारयोगेन संजपेत् मन्त्रमुत्तमम् ॥

॥ इति महाचीनक्रमार्य्यतारासाधनम् ॥

---

[1] ANC ०तां०।
[2] AN हृष्टा०।
[3] A जूटौ।
[4] A ०कारं, N कारे।
[5] A कर्त्ता०।
[6] A ०पदां पञ्चमुद्रा०, N ०पदां मुद्रा०।
[7] N अभिमन्त्र्य।
[8] B ०क्रमतारा०।

101.

प्रत्यालीढपदार्पिताङ्घ्रिशवहृद्घोराट्टहासा परा
खड्गेन्दीवरकर्त्रिकार्पितभुजा हुँकारबीजोद्भवा ।
खर्व्वा नीलविशालपिङ्गलजटाजूटोग्रनागैर्युता
जाड्यं न्यस्य कपालके त्रिजगतां हन्त्युग्रतारा स्वयम् ॥

महाचीनक्रमां नत्वा तारां त्रिभवतारिणीम् ।
तत्साधनमहं वक्ष्ये यथा गुरूपदेशतः ॥
एकलिङ्गे श्मशाने वा शून्यागारे च सर्व्वदा ।
तत्रस्थः साधयेद् योगी विद्यां त्रिभवमोक्षणीम् ॥
मृदुमस्तरक(म)मासीनोऽन्येषु कोमलेषु वा ।
विष्टरेषु समाश्रित्य साधयेत् सिद्धिमुत्तमाम् ॥
झटित्याकारयोगेन त्रिवज्रं सुसमाहितः ।
त्रिषु स्थानेषु तं ध्यात्वा रश्मिं विस्फारयेत् ततः ॥
त्रिभवचारिणः सत्त्वानवभास्यानयेत् पुनः ।
संहारे च पुनर्ध्यायाच्छून्यं विश्वं समन्ततः ॥

ततः—

पठेत् जिनमन्त्रकं ॐ शून्यतादिस्वभावकम् ।
अन्तरीक्षं ततो ध्यायादाःकाराद् रक्तपङ्कजम् ॥
भूयस्तस्योपरि ध्यायात् टाँकारात् पद्मभाजनम् ।
तस्य मध्ये पुनर्ध्यायात् हुँकारं नीलसन्निभम् ॥

[1] A ०होरा हृद्धा च ।
[2] B मोक्षिणीं ।
[3] A आका०, B आंका० ।
[4] A ०केति ।
[5] C ०मचूलक०, N ०चूलक० ।
[6] AC वाङ्ग० ।

ततो हुँकारजं पश्येत् कर्चिकां बीजभूषिताम् ।
कर्चिपरिणतं ध्यायादात्मानं तारिणीसमम् ॥

प्रत्यालीढपदां घोरां मुण्डमालाप्रलम्बिताम् ।
खर्व्वलम्बोदरां भीमां नीलनीरजराजिताम् ॥

त्र्यम्बकैकमुखां दिव्यां घोराट्टहासभासुराम् ।
सुप्रहृष्टां शवारूढां नागाष्टकविभूषिताम् ॥

रक्तवर्त्तुलनेत्रां च व्याघ्रचर्म्मावृतां कटौ ।
नवयौवनसम्पन्नां पञ्चमुद्राविभूषिताम् ॥

ललज्जिह्वां महाभीमां सदंष्ट्रोत्कटभीषणाम् ।
खड्गकर्चिकरां सव्ये वामोत्पलकपालधाम् ॥

पिङ्गोग्रैकजटां ध्यायात् मौलावक्षोभ्यभूषिताम् ।
भावनाचलनिष्पत्तौ भवेद् योगी महाकविः ॥

जडोऽपि यदि मूर्खः स्याद् भावनारमनत्परः ।
लभते मञ्जुवाणीं तु लक्षमन्त्रस्य जापतः ॥

त्र्यक्षरोऽसौ महामन्त्रः हुँकारान्तो हृदि स्थितः ।
पञ्चरश्मिसमायुक्तो अज्ञानेन्धनदाहकः ॥

तस्य द्वारविधिं वक्ष्ये योगाचारानुसारतः ।
प्रथमं हपरं दत्त्वा चतुर्थस्वरभूषितम् ॥

[1] A प्रहृष्टाङ्गे चारूढां [2] A ०हृता कार्चि, N ०हृतकटिं
[3] B reads ०घरां, which, though more grammatical spoils the metre.
[4] A मञ्जुवर्णान्तु । [5] A व्यक्त० ।
[6] C ऊँकारान्ता, B ऊंकारान्तां ।
[7] B मंसरं, ANC मंपरं ।

रेफारूढं स्फुरद्दीप्तमिन्दुबिन्दुसमन्वितम् ।
चँकारं च ततो दद्यात् चतुर्थेनैव भूषितम् ॥

दीर्घाकार समायुक्तं हूँकारं योजयेत् पुनः ।
हूँकारं च ततो दद्यात् सम्पूर्णं सिद्धमन्त्रकम् ॥

निरंशुमालिकां ध्यात्वा खड्गस्थाने विचक्षणः ।
स्फुरत्संहारयोगेन मंजपेत् मन्त्रमुत्तमम् ॥

कल्पयेत् स्थिरचित्तेन पण्डितोऽहं महाकविः ।
अजस्रभावनाभ्यासाद् भवत्येव न संशयः ॥

तारायाः साधनं कृत्वा यन्मयो पचितं शुभम् ।
भवन्तु प्राणिनस्तेन पण्डिता जिनशासने ॥

कृतिः शाश्वतवज्रस्य सेयं मेधाप्रसाधनी ।
अगाधाः पण्डिता अत्र क्षन्तुमर्हन्ति साधवः ॥

॥ महाचीनक्रमतारासाधनं समाप्तम् ॥

---

[1] C उं ।
[2] C दीर्घाकार० ।
[3] AN यन्मया० ।

102.

नमः सिततारायै ।

पूर्ववच्छून्यतापर्य्यन्तं विभाव्य ।

सितारविन्दमध्यस्थां ताँभृतां चन्द्रविष्टराम् ।
आबद्धवज्रपर्य्यङ्कां वरदोत्पलधारिणीम् ॥
शरच्चन्द्रकराकारां पृष्ठचन्द्रसमाश्रिताम् ।
सर्व्वालङ्कारसम्पूर्णां षोडशाब्दवपुःक्रमाम् ॥
ध्यात्वाऽऽर्य्यतारां हृदये तस्याश्चक्रं [1]सितद्युति ।
अष्टकोष्ठकमष्टाभिरक्षरैः परिपूरितम् ॥
ॐहाव्यञ्जनमध्यस्थसाधनामाद्यनाभिकम् ।
ध्यायादेकाग्रचित्तः सन् षण्मासान् दृढनिश्चयः ॥
जपेदखिन्नचित्तः सन् मन्त्रमेनं दशाक्षरम् ॥

तच्चैष मन्त्रः ॐ तारे तुत्तारे तुरे स्वाहा ।

मृत्युदोषैर्न्न लिप्तः स्यात् ताराहृच्चक्रभावकः ।
लाभी च सर्व्वसिद्धीनां षण्मासावधि तत्परः ॥

॥ मृत्युवञ्चनतारासाधनम् ॥

---

[1] Ab सितं ।

103.

मृत्यु दोषैर् लिप्तः स्यात् ताराहृच्चक्रं भावकः ।
लाभी च सर्व्वसिद्धीनां षण्मासावधि तत्परः ॥

वागीश्वरकृताद्देशात् मृत्युवञ्चनसंग्रहात् ।
उद्धृता मिततारायाः भावना भयनाशनी ॥

तुर्य्यवर्ग्गाद्यसाकारत्विषा विस्फुरिताऽम्बरे[a] ।
मिताब्जेन्द्वासनां दृष्ट्वा पुरस्तिश्शरणं पठेत् ॥

मुहूर्त्तं शून्यतां पश्येत् प्राक्तारोपहानये ।
ततः प्रकृतिमामर्श्याद् बोधिचित्ताक्षरं भवेत् ॥

मितारविन्दमध्यस्थचन्द्रबिम्बासनोपरि ।
आबद्धवज्रपर्य्यङ्कां वरदोत्पलधारिणीम् ॥

शरच्चन्द्रकराकारां पृष्ठचन्द्रसमाश्रिताम् ।
सर्व्वालङ्कारसम्पूर्णां षोडशाब्दवपुष्मतीम् ॥

सर्व्वसम्बुद्धतत्पुत्र मातरं कामरूपधाम् ।
ध्यात्वाऽऽर्य्यतारां हृदये तस्याश्चक्रं सितद्युति ॥

अष्टकोष्ठकमष्टाभिरक्षरैः परिपूरितम् ।
ॐ हाव्यञ्जनमध्यस्थसाध्यनामाद्यनाभिकम् ॥

ध्यायादेकाग्रचित्तः सन् षण्मासान् दृढनिश्चयः ।
जपेदखिन्नचित्तः सन् मन्त्रमेनं दशाक्षरम् ॥

---

[a] ANC मन्त्र० ।
[b] ANC हृच्चक्र० ।
[c] A ०ताम्बरः, N ०तावृते ।
[d] A ०मात्र० ।
[e] B ०त्रना० ।
[f] Ab ०न्नलिप्तः ।
[g] A भव० ।
[h] N पुनः ।
[i] A ०रंकार० ।

ॐकारमादितो दत्त्वा पश्चात् तारे[1] प्रयोजयेत् ।
तुत्तारे स्यात् तुरे पश्चात् स्वाहान्तः[2] सार्व्वकर्म्मिकः ॥

ब्रह्मेन्द्रविष्णुचन्द्रार्करुद्रदिक्कालमन्मथैः ।
अप्यखण्डितरोमाग्रो मृत्युं जयति मुक्तवत् ॥

वलिपलितदौर्भाग्यव्याधिदारिद्र्यमंक्षयः ।
सिंहाद्यष्टमहाभीतिदुःखमन्दोहनाशनः ॥

अयाचिता[3] म्बरपानान्नहर्म्य[4]रत्नादिसङ्गमः ।
खड्गाञ्जनपादलेपभद्रकुम्भादिसिद्धयः[5] ॥

कविता वक्तृता मेधा प्रज्ञा चैकान्तनिर्मला ।
अन्या च वाञ्छिता सिद्धिश्चक्रादस्मात्[6] प्रजायते ॥

साधनं सिततारायाः[7] मृत्युव्याधिविनाशनम् ।
उद्धृत्य यच्छुभं तेन जगत् तारा[8] स्वयं भवेत् ॥

॥ मृत्युवञ्चन[9]सिततारासाधनम् ॥

---

[1] A पश्चारे ।
[2] A सार्व्व० ।
[3] AC अपचिता० ।
[4] AC हर्म्मे बलादि० ।
[5] A खड्गाञ्जन ।
[6] A च ह्यतो ।
[7] AC ०चक्रादस्मीन् ।
[8] A जगतस्तारा ।
[9] B सिततारा० ।

104.

पूर्ववच्छून्यताद्यनन्तरं[1] सुँकारपरिणतं नानारत्नमयं सुमेरुं तदुपरि पँकारेण श्वेतपद्मं तदुपरि अकारेण[2] चन्द्रमण्डलं तन्मध्ये शुक्लहुंकारनिष्पन्नां ताराभगवतीं शुक्लां त्रिनेत्रां चतुर्भुजां पञ्चतथागतमुकुटीं नानालङ्कारां भुजद्वयेनोत्पलमुद्रां दधानां दक्षिणभुजेन चिन्तामणि-रत्नसंयुक्तवरदां सर्व्वसत्त्वानामाशां परिपूरयन्तीं वामे नीलोत्पलमञ्जरीं बिभ्राणां ध्यायात्[3]। तस्या दक्षिणपार्श्वे मारीचीं पीतां चन्द्राननां नीलाम्बरां द्विभुजां वामेन रक्ताशोकपल्लवधरां दक्षिणेन सितचामरधरां रक्तकञ्चुका-भरणां वामपार्श्वे महामायूरीं प्रियङ्गुश्यामां द्विभुजां वामेन मयूरपिच्छधरां दक्षिणेन चामरधरां एवं विचिन्त्य ॐ भगवति तारे मम हृदये[4] प्रविश स्वाहा इत्यात्मान-मधितिष्ठेत्[5]। ततो मन्त्रं जपेत्[6]। ॐ नमस्तारे मनोहरे हुं हरे स्वाहा।

॥ सिततारासाधनम् ॥

---

[1] B ०भावनानन्तरं।
[2] A ०पुष्प०।
[3] AC हृदयं।
[4] A सुंका, B अका०।
[5] A तारा।
[6] B हर।

105.

तथैव शून्यताभावनानन्तरं रेफपरिणतसूर्य्यस्थहुँभव-विश्ववज्रपरिणतवज्रप्राकारादि विचिन्त्य तन्मध्ये [1]पँकारज-पद्मोपरि अकारजचन्द्रे सितहुँकारजं सबीजोत्पलं पश्येत्। [2]तत्स्फुरणादिपूर्व्वकं तत्परिणतां भगवतीं सिततारां त्रिमुखां षड्भुजां पीतनीलदक्षिणेतरमुखीं प्रतिमुखं त्रिनेत्रां वरदाक्षसूत्रशरधरदक्षिणत्रिकरां उत्पलपद्मचाप-धरवामपाणित्रयां अर्द्धपर्य्यङ्कनिषण्णां चन्द्रासनचन्द्रप्रभां जटामुकुटस्थितामोघसिद्धिं पञ्चमुण्डविभूषितमस्तकां अर्द्ध-चन्द्रकृतशेखरां नानालङ्कारधरां हिरण्यवर्षाकृतिमष्ट-श्मशानमध्यस्थितां हृच्चन्द्रस्थितनिजबीजमात्मानं विचिन्त्य मन्त्रं जपेत् ॐ अचले अनिमित्तवरे हुँ हुँ फट् फट् स्वाहा। [3]पोषधेन पूजापुरःसरं चतुःसन्ध्यायां मासैकं [4]जपतः शान्तिकादि[5] भवतीति।

॥ षड्भुज [6]शुक्लतारासाधनम् ॥

[1] A पंवज्रपद्मो०।
[2] B omits ०स्फुर०।
[3] B जपेत्।
[4] B शुक्लतारा०।
[5] AB स्फुरणा०।
[6] One फट् is dropped in B.
[7] A शान्तिकारा हि, C शान्तिकारादि

106.

जाङ्गुलीतारायै नमः ।

नत्वा भगवतीं तारां जाङ्गुलीरूपधारिणीम् ।
सत्त्वानामनुकम्पार्थं लिख्यते तत्प्रसाधनम् ॥

प्रथमं तावन्मन्त्री शुचिः स्नातः शुक्लमाल्याम्बरधरो विजने सुलिप्ते प्रदेशे शुक्लसुगन्धितोयोपमिक्ते[1] शुक्लपुष्पप्रकरावकीर्णे सुखासनोपविष्टो जगति मैत्रीं करुणां च विभाव्य ॐ स्वभावशुद्धाः सर्व्वधर्म्माः स्वभावशुद्धोऽहमित्युच्चारयेत्[2]। ततः शून्यतामामुखीकृत्य चिन्तयेत् शुक्लपंकारजपद्मं शतपत्रं शुक्लं तदुपरि अकारजचन्द्रमण्डलोपरि शुक्लह्रीःकारं स्फुरदनेकरश्मिनिकरं तद्भवां जाङ्गुलीं भगवतीं भावयेत् शुक्लवर्णां चतुर्भुजां जटामुकुटिनीं शुक्लां शुक्लोत्तरीयां सितरत्नालङ्कारवतीं शुक्लमर्पैर्भूषितां सत्त्वपर्य्यङ्कासनासीनां मूलभुजाभ्यां वीणां वादयन्तीं द्वितीयवामदक्षिणभुजाभ्यां सितसर्पाभयमुद्राधरां चन्द्रांशुमालिनीं ध्यायात्[3]। शिरसि कण्ठे स्तनान्तरे नाभौ चन्द्रमण्डलस्थ-आः-ह्रीः-हुँकारान् विभावयेदाखेदं यावत्[4]। तदनु मन्त्रं जपेत् ह्रीः। सप्तलक्षं जपेत्, सप्तायुतं जुहुयात् सितपुष्पं सितालङ्कारधरः सन्[5]। ततो भवति गरुडेश्वरप्रभावः कविः सर्व्वशास्त्रविशारद इति[6]।

॥ आर्य्यजाङ्गुलीतारासाधनं समाप्तम् ॥

[1] BN तस्य सा० ।
[2] A ०तयो० ।
[3] N ०सने उप० ।
[4] ०पद्मं dropped in AN.
[5] A ०सत्त्व० ।
[6] ANC स्तनान्ते चन्द्र० ।
[7] AB omits.

107.

नम आर्य्यतारायै ।

[1]तारा हरितैकमुखी चतुर्भुजा द्विनयना स्तवतुष्टा[2] ।
यस्या मण्डलचक्रे द्वादश देव्यो द्विनयनाश्च ॥

भगवत्यार्य्यतारायाः विशिष्टमति[3] दुर्ल्लभम् ।
प्रवक्ष्यामि ममासेन धनदाक्रममाधनम् ॥

प्रातः कृतबोधिचित्तोत्पादो योगी स्वहृच्चन्द्रे हरितताँ-कारं दृष्ट्वा कृतमुखशौचादिकः ॐ स्वभावशुद्धाः सर्व्वधर्म्माः स्वभावशुद्धोऽहमित्युच्चार्य्य ॐ अमृते हुँ फट् इत्यनेन नाना च्छटाभिर्दशदिग्विघ्नानुत्सार्य्य स्वहृदि पँकारजरक्त-कमलोपरि अकारजचन्द्रस्थं स्वबीजं विभाव्य तत्किरणा-कृष्टगगनस्थगुरुबुद्धबोधिसत्त्वान् सम्पूज्य पापदेशनादिकं विधाय शून्यतां च ध्यात्वाऽधिष्ठ च पुरतो रक्तरेफपरिणत-सूर्य्यस्थकृष्णहुँकारजविश्ववज्रं विलोक्य तत्किरण वज्रैर्वज्र-प्राकारं वज्रपञ्जरं वज्रभूमिं च ध्यायात् । अथ विश्ववज्र-वेदिकायां रक्तपँकारजकमलोपरि अकारजचन्द्रस्थशुभ्र-भ्रँकारपरिणतं सितचक्रं भ्रँकारमध्यं दृष्ट्वा पद्मचन्द्रे चक्रबीजपरिणामजं सर्व्वरत्नमयं चतुरस्रादिगुणयुक्तं द्विपुटं गर्भपुटस्थकमलाष्टदलकर्णिकासु नवचन्द्र रूपशोभितं चतु-

[1] तारा in B.
[2] A विघ्नं मन्त्र० ।
[3] A अमतहृदिन्य० ।
[4] A ०दिग्विमा०, N ०दिग्वि विघ्ना० ।
[5] A ०मध्यस्थं ।
[6] AB द्विनयनो स्तवस्तुष्टो
[7] A पीतः ।
[8] BN drop नाना० ।
[9] A ०वज्रि वज्र० ।
[10] N ०चन्द्रे ।

द्वारस्थचतुःसूर्य्यभासुरं कूटागारं पश्येत्। ततो मध्यचन्द्रोपरि तमेव ताँकारम्, ततः स्फुरणसंहरणम्, ततस्तद्बीजां तारांभगवतीमात्मानं भावयेत् चन्द्रासनप्रभां सौम्यां सत्त्वपर्य्यङ्कस्थां हरितश्यामामेकवदनां द्विलोचनां चतुर्भुजां अक्षसूत्रवरदोत्पलपुस्तकधरां विचित्रवस्त्रालङ्कारवतीम्। ततः ॐ शिरसि, ता ललाटे, रे चक्षुषोः, तु कण्ठे, त्ता बाह्वोः, रे हृदये, तु नाभौ, रे गुह्ये, स्वा जानुनोः, हा पादयोर्न्यस्येत। ततो हृदये पद्मचन्द्रस्थस्वबीजरश्मिमन्त्रोदितलोचनादिभिर्देवीभिरभिषिक्तमात्मानममोघमिद्धमुकुटं ध्यायात्। अथवा पुटस्थचन्द्रेषु वज्रतारादिदेवीर्भ्रुटिति दृष्ट्वा पश्चाद् विभावयेत। पूर्व्वे वज्रतारां कृष्णां वज्रहस्ताम्, दक्षिणे रत्नतारां पीतां रत्नहस्ताम्, पश्चिमे पद्मतारां रक्तकमलहस्ताम्, उत्तरे बुद्धतारां शुक्लां चक्रधारिणीम्, आग्नेयकोणे पुष्यतारां सितां पुष्पदामधराम्, नैर्ऋत्यकोणे धूपतारां कृष्णां धूपकटच्छूहस्ताम्, वायव्यकोणे दीपतारां पीतां दीपयष्टिधराम्, ऐशानकोणे गन्धतारां रक्तां गन्धशङ्खधराम्। इमा विश्वपद्मपत्रस्थचन्द्रेषष्टौ शशिप्रभाः सत्त्वपर्य्यङ्कनिषण्णा वामेनोत्पलधारिकाः स्मेरवदना नानालङ्कारवस्त्रधारिण्यः। पूर्व्वद्वारे वज्राङ्कुशीं कृष्णां वज्राङ्कुशकराम्, दक्षिणे वज्रपाशीं पीतां वज्रपाशहस्ताम्, पश्चिमे वज्रस्फोटां रक्तां वज्रस्फोटधारिणीम्, उत्तरे वज्रघण्टां शुक्लां वज्रघण्टा-

[1] A अकारं।
[2] A तं तन्नवो०।
[3] C adds ॐ after ततः
[4] C तो।
[5] AC ता।

हस्ताम्। एता[1] श्चतुर्द्वारस्थूर्येषु पश्येत् सूर्य्यप्रभाः पिङ्गलोर्द्ध्वज्वलत्केशा आलीढपदस्थिता भुजङ्गभूषणा विकृतवदना व्याघ्रचर्म्माम्बरधरा वामकरेणोत्पलधारिकाः। ततो ज्ञानसत्त्वेन सहैकीकृत्य स्वहृत्कमलगतस्वबीजमतिसूक्ष्मं भावयेत् निश्चलेन मनसा। ततो मन्त्रं जपेत् ॐ तारे तुत्तारे तुरे धनं मे दद स्वाहा। तत उत्थानसमये ॐ अकारो मुखमित्यादिना मन्त्रेणोत्पलमुद्रया बलिं दत्त्वा प्रणिधिं विधाय देवताचक्रं स्वबीजे अन्तर्भाव्य स्वदेवताहङ्कारमुद्वहन् यथासुखं विहरेत्। मध्याह्नसायाह्नसन्ध्ययोस्तु स्वहृद्बीजात् झटिति देवताचक्रं संस्कार्य्य पूर्व्ववद् ध्यानजपादिकं कुर्य्यात्। सायाह्नं[3] मध्याह्नसन्ध्यायां पुनरयं विशेषः। पुष्पादिना ज्ञानमण्डलं सम्पूज्य ॐ तारे तुत्तारे तुरे[5] मुरित्यनेन विसर्जयेदिति।

॥ धनदतारासाधनम् ॥

[1] A एतासु चतु०। [2] A विघ्नपदेवता०।
[3] A स्वबीर्य्यान्तं; C omits स्वबीजे... ... ०जपादिकं।
[4] A मध्याह्नम् ध्यानसन्ध्या०। [5] तुरे dropped in A.

108.

नमो रत्नत्रयाय।

नम आर्य्यावलोकितेश्वराय बोधिसत्त्वाय महासत्त्वाय महाकारुणिकाय नमस्तारायै, तद्यथा, ॐ तारे तारय हुँ हुँ हुं समयस्थिते भर[1] सर्व्वाभरणभूषिते पद्मे पद्मे पद्मभुजे पद्मासनस्थे इस इस वैलोक्यवरदे सर्व्वदेवदानवपूजिते स्मराहि[2] भगवत्तथागतपुरतः समयं धर धर महासत्त्वावलोकिते मणिकनकविचित्राभरणे ॐ विलोकय भगवति तारे हुँ हुँ हुँ फट् स्वाहा। मूलमन्त्रः मधातुके चैत्ये अष्टोत्तरसहस्रं जपेत्। ततो हि पूर्णे मति भगवती मार्य्यतारां पश्यति, यमिच्छति तं वरं लभते। ॐ मणितारे हुँ लक्षजापेनार्य्या अग्रत उपतिष्ठति, यदिच्छति तत् सर्व्वं ददाति। विना मण्डलकल्पानोपवासेन केवलं जापमात्रेण सिध्यति। सर्व्वं कार्य्यं च साधयति।

॥ लब्धा(म)मिताभगर्भतन्त्रे भगवत्यार्य्यतारायाः कल्पोद्देशः समाप्तः ॥

---

[1] A भरच, C भरज।
[2] N स्मारादि।
[3] A मायां।
[4] A ०कार्य्येति।
[5] A ०ताभतन्त्रे।

109.

स्वग्भाजो भगवत्यास्तारायाः कतिपयोपचारोऽयम् ।
सर्व्वाज्ञानविनाशनहेतोस्तज्ज्ञैस्सदा कार्य्यः ॥
स्थाने शुचौ मनोज्ञे स्नातो मन्त्राम्बुयोगतः स्थित्वा ।
पूजोपचारयुक्ते तदभावे भाविते वापि ॥
पूर्व्वाभिमुखो योगी परहितमनसा विभावितां देवीम् ।
अर्जुननीरजचन्द्रे स्थानमुपेतामनेकगुणबहलाम् ॥
शरदिन्दुधामधवलीं नवयौवनमण्डिताङ्गलक्ष्मीकाम् ।
नीलोत्पलदलनयनां सीमान्ते भक्तनागमभृताम् ॥
कुण्डलरुचकाङ्गदकै रसनामञ्जीरघुर्घुरासहितैः ।
मंशोभिगाचर्यष्टिं मुक्ताफलमाल्यचारुकुचयुग्माम् ॥
मण्डितदुकूलवसनां कर्णोत्पलहारिचाप[व]ब्रूकाम् ।
चिन्तावचनविलोकनहृत्यापां सर्व्वसत्त्वानाम् ॥
रत्नांशुजालबहलितजाम्बूनदपट्टशोभिमूर्द्धानम् ।
अमिताभबुद्धमध्यां जटिकां दधतीं मनोहरामेवम् ॥

या भगवती सोऽहं योऽहं मा भगवतीत्यहङ्कारमुत्पादयेत् । सर्व्वत्र पूजाविधानस्य मन्त्राधिष्ठानमार्य्यकर्म्मकेन मन्त्रनीतिप्रयोगेन न कर्त्तव्यम् । एतच्च चिसन्ध्यं सर्व्वदा च नित्यस्नातेन गृहीतब्रह्मचर्य्येण चिचेलपरिवर्त्तनतत्परेण दशकुशलकर्म्मपरिहारवता सर्व्वाकुशलपक्षकर्म्मपरिक्षयायोद्यतेन मनसा साधकेन तावद्विरतं भाव-

[1] This *Sādhana* is found only in B. *See* Fol. 79 A.

यितव्यं यावदसौ भगवती स्वयं न भवति। अत्र चोपदेशो ह्यार्हतमोजालपटलविघटनापकरणीयः। तद्यथाऽलिगु-[म]मध्यहरिणाङ्कवलयोपरि मायाबीजं स्रवत्सुधाधारिणं शुद्धार्कसन्निभं तदधो वातमण्डलीस्थाने तत्त्वबीजसूर्य्य-कोटिसमप्रभं देदीप्यमानं सर्व्वमोहान्धकारं दशदिग्गत-मामूलं शोधयन्तं मूर्द्धबीजक्षरितामृतधाराभिः स्रव(न्यस्र)-मानं स्थिरमना दीर्घं भावयेत्। खिन्नश्च ततो जिह्वा-रुणाम्बुजदले गुरूपदेशतो बीजं ध्यात्वा ततो मन्त्रमालां निश्चरन्तीं मणिमन्त्रौषधिबलं तथागतज्ञानामृतं चाक्रष्य जठरकूपे प्रविश्य तान्यधो व्याप्य पुनरुद्वहन्तीं निरीक्ष-माणो योगी मन्त्रं जपेत्। यद्येवमयं करोति तदाऽस्य मपद्यनुभवो महान् भवति, एवमेव यदि मन्नाहोरात्रान् करोति दृढध्यानस्तदा महाप्राज्ञो वाग्मी पटुः पद्यमुखभाषो गणज्ञोऽविरतवाक्यगद्यपद्यं करोति(कुरुहि)। संस्कृतान्य-यत्नतो वक्तुमलं भवति, नात्र विकल्पः करणीय इति।

अथ स्तुतिविधानमभिधीयते। योऽभूत् महापण्डितः श्रीमर्व्वज्रमित्रनामा भगवतीताराचरणेनाविष्टमानसः काश्मीरकविबुधजनचक्रवर्त्तितिलककल्पेन वक्रतोऽपि सङ्कट-गतेन तामेव भगवतीमार्य्यतारामाराध्य मरणाभिलाष-परायणेन मनसा कृतोर्द्धदृष्टिना कृतकरपुटाञ्जलिना नवनुतिकुसुममालया दरिद्रस्य मम मन्दकर्म्मणः स्रग्धरा भव मातः परस्मिन्नपि जन्मनि भगवतीचरणकमललाभी भवेयमिति कृतप्रणिधिना भगवत्यभिष्कृता तेन स्रग्धरेति नाम उपपन्नम्। स्रग्धरानाम्ना च वृत्तेन रचितत्वादस्याः स्तुतेः स्रग्धरेति नाम समुदितम्, तन्नाम्ना भगवत्याः

स्तुतित्वाद् वा, उभयथाऽपि वा तन्नामानयोरत्यन्नमिति वार्त्ता।

इह हि प्रज्ञापारमितां साक्षादधिगन्तुकामो योगी विद्याधरोऽर्धमासं कालत्रयं पूर्वोक्तविधानसमापन्नः पूर्वोक्तमकलव्रताचारानुपालक एकमना विजने भगवतीं स्तुयादजस्रमविच्छिन्नम्। तच्च चोपदेशः पठनवेलाया-मुच्चारणमातरिश्वावलग्नाग्रेषु यथाक्रमं तत्त्वबीजशक्ति-बीजमायाबीजानि विन्यस्य भगवतिविदा काल[च]यो-च्छलितरश्मिसुस्नातः सन्नहमिति—

ज्ञात्वा विधिमतियुक्तं तारायाः स्रग्धराया यत् कुशलम्।
तेन समस्तं भूयाज्जगदाशु तारिणीसदृशम्॥

॥ स्रग्धरायाः स्तुतिविधिः समाप्ता ॥

110.

प्रणम्य तारिणीं भक्त्या सर्व्वसम्पत्तिवर्द्धनीम्।
लिख्यते साधनं तस्या यथाम्नायं समासतः॥

प्रथमं तावत् योगी सुरभिगन्धपुष्पादिमनोहरध्यान-गारादिकं प्रविश्य सुखासने पर्य्यङ्कं बद्ध्वा स्वहृदये अकारपरिप्लुतं चन्द्रमण्डलं तस्योपरि पीतताँकारबीजं तत्किरणाक्रष्टमभिमुखमाकाशदेशे भगवतीचक्रमवलोक्य स्वहृदीवनिःसृत पुष्पादिदेवीः संस्कार्य्य पुष्पादिभिः मूलां

[1] A ०दिभिर्म०। [2] A ध्यागाद्या०।
[3] N पुष्पादिभिर्दे०।

विदध्यात् । ततस्तस्यैव भगवतोवज्रस्याग्रतः पापदेशनादिकं कुर्य्यात् । सर्व्वमात्मनः पापं प्रतिदेशयामि, सर्व्वबुद्धबोधिसत्त्वार्य्यपृथग्जनानां सर्व्वकुशलमनुमोदे[1] सर्व्वं चात्मनः कुशलमनुत्तरायां सम्यक्सम्बोधौ परिणामयामि, एषोऽहमाबोधेर्बुद्धं शरणं गच्छामि द्विपदानामग्र्यम्, धर्म्मं शरणं गच्छामि समग्रं महायानम्, सङ्घं शरणं गच्छामि अवैवर्त्तिकबोधिसत्त्वगणम्, अहो बताहमनुत्तरां सम्यक्संबोधिमभिसंबुद्धेयं सर्व्वं सर्व्वसत्त्वानामर्थाय हिताय सुखाय यावदत्यन्तनिष्ठं निर्व्वाणधातौ बुद्धबोधौ प्रतिष्ठापनाय च, एषोऽहमनुत्तरसम्यक्संबोधिमार्गमाश्रयामि यदुत वज्रयानम् । ततस्त्रिशरणगाथां पठेत् । ततः सर्व्वसत्त्वेषु सुखोपसंहाराकारां मैत्रीम्, सर्व्वदुःखापनयनाकारां करुणाम्, दिव्यसुखावियोगनियमाकारां मुदिताम्, क्लेशप्रतिपक्षमार्गोपसंहाराकारां उपेक्षां भावयेत् ।

ततः सर्व्वधर्म्मान् मनसाऽवलम्ब्य विचारयेत् । चित्तमेवैतत् तेन तेनाकारेण भ्रान्तं प्रतिभासते । यथा स्वप्ने नास्ति चित्तात् बाह्यचित्तं बाह्यग्राह्याभावात् चित्तमपि ग्राहकं भवति । तस्माच्चित्तशरीराः सर्व्वधर्म्माः तेषां ग्राह्यग्राहकशून्यता परमार्थ इत्येवमेकान्तेन निश्चित्य भ्रान्तिसमारोपितं भ्रान्तिचिह्नं सर्व्वधर्म्माणामाकारमपहाय तेषां प्रकृतिमेव केवलां[2] अद्वयविज्ञप्तिलक्षणां

[1] A ०कुशलमाह ।
[2] A ०धिबु० ।
[3] A ०त्तरायां ।
[4] AN omit.
[5] C ०कारो ।
[6] A ०यज्ञसाग्रेय० ।
[7] N चित्ते ।
[8] AC प्रतिकृति० ।
[9] NC ०नाभद्वय० ।

शुद्धस्फटिकसङ्काशं शरदमलमध्याह्नगगनोपमामनन्तां पश्येत्। इदमुच्यते लोकोत्तरं शून्यताज्ञानं निष्प्रपञ्चं निर्विकल्पम्। ततस्तन्मन्त्रेणाधितिष्ठेत् ॐ शून्यताज्ञान-वज्रस्वभावात्मकोऽहम्। सैव भगवती प्रज्ञापारमिता सैव परमा रक्षा। ततस्तस्य निष्यन्दभूतामाकारवतीं रक्षां शुद्धलौकिकज्ञानस्वभावां भावयेत्। ततो रेफेण सूर्य्यं पुरतो विभाव्य तस्मिन् रवौ हुँभवं विश्ववज्रं तेनैव वज्रेण विभावयेच्च प्राकारकं वज्रपञ्जरबन्धनं च विश्ववज्रकिरणैः प्रलयानलदुःसहैः सर्व्वतः स्फुरित्वा घनीभूय रचितं तिर्य्यक् चतुरस्रं ज्वलद्वज्रप्राकारं उपरिष्टाच्च वज्रपञ्जरमधस्तात् वज्रमयीं भूमिमारभानल-विरचितां पश्येत्। ततो रविविश्ववज्राभ्यां रश्मीभूय दशदिशि स्फुरित्वा घनीभूय बहिर्द्वारे सीमाबन्धः कार्य्य इति श्लोकार्थः। तन्मध्ये आकाशमहाभूतस्वभावं धर्म्मोदयालं महावज्रधरस्वभावं शरच्छशधरधवलमधः सूक्ष्मं उपरि विशालं चिकोणं अन्तर्गगनस्वरूपं तन्मध्ये विश्वदल-कमलकर्णिकावस्थितविपुलविश्ववज्रं तद्वेदिकायां चत्वारि महाभूतानि चतुर्मण्डलाकाराणि चतुर्द्देवीस्वभावानि उपर्य्युपरि पश्येत्। तत्रादौ यँकारेण वायव्यं धन्वाकारं धूमवर्णं कोटिद्वये चलत्पताकाङ्कम्, ततो रँकारेणाग्नेयं चिकोणं रक्तकोणेषु रेफाङ्कम्, ततो वँकारेण वारुणं वर्त्तुलं सितघटाङ्कम्, ततो लँकारेण माहेन्द्रमण्डलं चतुरस्रं

[1] A तस्मिन्नधो।
[2] A पञ्चल०।
[3] A adds ज्ञानकोणं।
[4] A ॐकारभवं।
[5] AC दिशि दिशि
[6] A रक्ता०।

पीतं कोणेषु चिह्नचिकं वज्राङ्कम्, तदुपरि भ्रुंकारजं चक्रं भावकस्त्विदानीं तदेव लोकोत्तरं ज्ञानं व्यापकत्वेन स्थितं ततो विश्ववज्रं वेदिकामध्ये चतुर्म्महाभूतपरिणामजं परिशुद्धबुद्धक्षेत्रं संक्षेपरूपं महामोक्षपुरं वैरोचनस्वभावं नानारत्नमयं कूटागारम्—

चतुरस्रं चतुर्द्वारं अष्टस्तम्भोपशोभितम् ।
चतुर्वेदीपरिक्षिप्तं चतुस्तोरणमण्डितम् ॥

हारार्द्धहारपट्टसग्विताना[1]दर्शचामरैः रुचिरवज्रसूत्रैश्च स्फुरद्बुद्धबोधिमंशुभिः चलच्चित्रपताकाग्रघण्टाभिर्मुखरदिङ्मुखं परमैः पञ्चकामोपहारैश्च हर्षगं द्विपुटं किञ्चान्यैर्न भावयेदेकं चिकोर्णनापरं स्मृतम् । तन्मध्ये द्विगुणालिपरिणतं चन्द्रं तदुपरि ताँकारपरिणतं वज्रं तद्वज्रके ताँकारं ततोऽपि द्विगुणोपेत[2]दृढदधयनोपेतद्विगुणकालिपरिणतं सूर्य्यं हयेर्म्मला महामुखं परमानन्दम् ।

आदर्शज्ञानवांश्चन्द्रः स तावान् समर्मणिकः ।
बीजैश्चिह्नैः स्वदेव्याश्च प्रत्यवेक्षणमुच्यते ।
सर्व्वैरैक्यानुष्ठानं निष्पत्तिः शुद्धधर्म्मता[3] ॥

इति पञ्चाकाराभिः सम्बोधिः । तद्बीजरश्मिभिः सञ्चाकृष्य स्वेष्टदेवताचक्रं तथैव प्रवेश्य च योगी चिह्नबीजपरिणतां तारादेवीं विभावयेत्—

AC चित्रक० । [1] A ०भृतं ।
ANC ०क्तस्भाव० । [2] AC मुख० ।
A द्विगुणपरि०, N द्विगुणनालिपरि० ।
A ०उपदधये० । [3] AC समता० ।

अष्टबाहुं चतुर्वक्त्रां सर्व्वालङ्कारभूषिताम् ।
कनकवर्णनिभां भव्यां कुमारीलक्षणोज्ज्वलाम् ॥
चतुर्बुद्धमहामुकुटीं वज्रसूर्य्याभिषेकजाम् ।
नवयौवनलावण्यां चलत्कनककुण्डलाम् ॥
विश्वपद्ममसामौनां रक्तप्रभाविभूषिताम् ।
वज्रपाशं तथा शङ्खं मच्छरोद्यतदक्षिणाम् ॥
वज्राङ्कुशोत्पलं चैव वामे कार्मुकतर्ज्जनीम् ।
वज्रतारात्मको योगी सर्व्वमन्त्रार्थपारगः ॥
वज्रपर्य्यङ्कयोगेन साधयेद् भुवनत्रयम् ।
पूर्व्वेण पुष्पतारां तु सितवर्णां मनोरमाम् ॥
ॐकारज्ञाननिष्पन्नां पुष्पदामकराकुलाम् ।
द्विभुजामेकवक्त्रां च सर्व्वालङ्कारभूषिताम् ॥
दक्षिणे धूपतारां तु कृष्णवर्णां सुरूपिणीम् ।
धूपशाखाकरव्यग्रां सर्व्वालङ्कारभूषिताम् ॥
पश्चिमे दीपतारां च दीपयष्टिकराकुलाम् ।
पीतवर्णां महाभूषां चलत्कनककुण्डलाम् ॥
उत्तरे गन्धतारां तु गन्धशङ्खकराकुलाम् ।
रक्तवर्णनिभां देवीं भावयेद् गर्भमण्डले ॥
द्वारपालीस्ततो ध्यायात् अङ्कुश्यादिप्रभेदतः ।
अङ्कुशं दक्षिणे हस्ते वामेन दुष्टतर्ज्जनीम् ।
सूर्य्यमण्डलमध्यस्थां शुक्लवर्णां मनोरमाम् ॥
अङ्कुशी ।

---

[1] AN देवीं । [2] N ०पद्मासना० । [3] AN प्रशोद्यत० ।
[4] A ०परागः । [5] A omits गन्धतारां तु ।

पाशदक्षिणहस्ते तु वामेन दुष्टतर्ज्जनीम् ।
रक्तमण्डलमध्यस्थां गौररूपां मनोरमाम् ॥

[1]पाशिनी ।

दक्षिणे तु करे स्फोटां वामहस्तेन तर्ज्जनीम् ।
वज्रमण्डलमध्यस्थां रक्तवर्णां विभावयेत् ॥

वज्रस्फोटा ।

वज्रघण्टाकरव्यग्रां वामेन दुष्टतर्ज्जनीम् ।
रश्मिमण्डलमध्यस्थां रक्तउत्पलसन्निभाम् ॥

वज्रघण्टा ।

कोणभागेषु चिह्नानि चत्वारि विधियोगतः ।
बोधिचित्तघटो मेरुर्वह्निकुण्डं महाध्वजः ॥
ऊर्ष्णीषोपविजयां शुक्लवर्णां सुरूपिणीम् ।
वज्रं दक्षिणहस्ते च वामेन दुष्टतर्ज्जनीम् ॥
नागपाशं दक्षिणे हस्ते वामेन दुष्टतर्ज्जनीम् ।
कृष्णवर्णां महाघोरामधः सुभ्रां विभावयेत् ॥

ततो ध्यात्वा मन्त्रं स्फुरन् जपेत ॐ तारे तुत्तारे तुरे स्वाहा ।

दशाक्षरैर्दश देवत्यो दशपारमिताश्रयाः ।
भावनीयाः प्रयोगेन सर्व्वकर्म्मप्रसिद्धये ॥
मोहवज्रां न्यसेन्नेत्रे द्वेषवज्रां च कर्णतः ।
ईर्ष्यावज्रां तथा घ्राणे वक्त्रे तु रागवज्रिकाम् ॥

[1] AN योगिनी ।
[2] AC कर्म्मस्फोटां ।
[3] C चक्रं ।
[4] AC °देवेभ्यो ।

स्पर्शे मात्सर्य्यवज्रां वै सर्व्वक्लेशतमोऽपहाम् ।
आयतनेषु विज्ञेया हृद्या नैरात्म्ययोगिनी ॥

इति चक्षुराद्यधिष्ठानम् ।

द्विभुजाश्चैकवक्त्राः स्युर्न्नाना रूपा हि योषितः ।
कर्त्तिकपालकरव्यग्रा गतप्राणोर्द्ध्वसंस्थिताः ॥

ततः कायवाक्चित्ताधिष्ठानम् ।

ॐकारोऽयं महावज्रो कायवज्रविभूषणः ।
(हुंकारः) चित्तवज्रो मोहवज्रो वज्रसत्त्वपदे स्थितः ॥
आःकारं परमं तत्त्वं बाह्यं चोद्घाटकं मतम् ।
सर्व्वामामेव मातृणां हृदि ज्ञानमयं न्यसेत् ॥
सत्त्वज्ञानप्रयोगेन बुद्धबोधिमवाप्नुयात् ।
स्वमन्त्राष्टारमन्त्रता मुद्राचिह्नन्य कल्पना ॥
स्फुरणं संहरणं कृत्वा मण्डलेयानां तु मन्त्रवः ।
आकाशधातुमध्यस्थं भावयेद् ज्ञानमण्डलम् ॥
पञ्चज्ञानगुणाकीर्णं नानारूपं समन्ततः ।
पूजयेत् सर्व्वपूजाभिर्मानयेच्च न हापयेत् ॥
द्वारपालीप्रयोगेन ज्ञानोदधिं प्रसाधयेत् ।
समयचक्रं समावेश्य ज्ञानचक्रं महोज्ज्वलम् ।
सर्व्वबुद्धसमो योगी अद्वयो भवति क्षणात् ॥

ॐ वज्राङ्कुशी आकर्षय जः, ॐ वज्रपाशी प्रवेशय

[1] A स्पर्शेमान् सर्पवज्राम्बे । [2] A वक्त्राम्बनाना०, N वक्त्रास्यन्नाना०
[3] A महाराजा । [4] A महाराजा ।
[5] A वाक्पथोघातकं, N बाह्यद्योतकं ।
[6] AC ०मण्डले । [7] A अर्द्धपिङ्गो ।

हुँ, ॐ वज्रस्फोट बन्धय वँ, ॐ वज्रावेशे वशीकुरु होः। स्वहृदीजनिःसृतरश्मिभिरङ्कुशाकारैस्त्रैधातुकस्थितान् बुद्धानाकृष्याष्टमातृभिः संपूज्यानुनाथ्यते। अभिषिञ्चन्तु मां सर्व्वतथागताः—

बोधिवज्रेण बुद्धानां यथा दत्तो महामहः।
ममापि चाणनाथाय खवज्राद्यं ददाहि मे॥

इत्यभिषेकयाचनम्।

अभिषेकं महावज्रं त्रैधातुकनमस्कृतम्।
ददामि सर्व्वबुद्धानां चिगुह्यालयसम्भवम्॥

इति पठद्भिर्बुद्धैर्हेरुकरूपैः पञ्चामृतभृतपञ्चतथागतात्मकैः कलशैः पञ्चभिरभिषिच्यते। अभिषिच्यमाने पुष्पवृष्टिर्भवति, दुन्दुभिशब्दश्चाच्छलति, कुङ्कुमवृष्टिर्भवति, रूपवज्रादिभिः पूज्यते, वज्रगीत्या लोचनादिभिः स्तूयते, अभिषिच्यमाने मूर्द्धि वज्रसत्त्व उत्पद्यते। मकुटस्य चतुर्दिक्षु वैरोचनाक्षोभ्यामिताभामोघसिद्धयस्तथागता मध्यपुटचतुर्देवीनां मुकुटेऽपि यथाक्रमं द्वारपालीनामपि, उष्णीषाया रत्नेशः, मुम्भाया मुकुटे अक्षोभ्यः।

द्वेषवज्रि नमस्तुभ्यं मोहवज्रि नमोऽस्तु ते।
मात्सर्य्यवज्रि मां त्राहि रागवज्रि प्रयच्छ मे॥
महामाने महेर्ष्येति सर्व्ववज्रि प्रमोद मे।
सर्व्ववज्रमयनाथा सर्व्वकर्म्मप्रसाधिका॥

स्तुतिः।

N omits यथादत्तो...सर्व्वबुद्धानां। A चाणा०।
A खवज्रायं, N खवज्रोऽयं। AC ०सिद्धिक्त०।
A कुम्भाया। A महामानेति।

इमे पुष्पाः शुभा दिव्याः शुचयः शुचियोनयः ।
मया निवेदिता भक्त्या प्रतिगृह्य प्रसीद मे ॥

पुष्पम् ।

वनस्पतिरसो हृद्यो गन्धाढ्यो धूप उत्तमः ।
मया निवेदितो भक्त्या प्रतिगृह्य प्रसीद मे ॥

धूपः ।

रक्षोघ्नश्च पवित्रश्च तमोभिदः मनःशुभः ।
मया निवेदितो भक्त्या प्रतिगृह्य प्रसीद मे ॥

दीपः ।

इमे गन्धाः शुभा दिव्याः शुचयः शुचियोनयः ।
मया निवेदिता भक्त्या प्रतिगृह्य प्रसीद मे ॥

गन्धः ।

तदनु नीलपँकारपरिणतधन्वाभध्वजाङ्कित वायुमण्डले रक्तरँबीजसम्भूतचिकोणाग्नेयमण्डलोपरि रक्तआःकार-सम्भूतपद्मभाण्डे वुँ-आँ-जौँ-खँ-हुँ-बीजपरिणतं तद्बीजाधिष्ठितगन्धार्कचन्द्रभैषज्यवारिलक्षणं यथाऽसंख्येयं पञ्चतथागतस्वभावं पञ्चामृतं गोकुटदहनाख्यं च पञ्चबीजं ध्यात्वा तदुपरि वितस्तिमात्रमतिक्रम्य चन्द्रस्थहुँकार-सम्भूतशुक्लपञ्चसूचिकमहावज्रं ध्यात्वा तदध ॐकारं विचिन्त्य वायुप्रेरिताग्नेयमण्डलाग्निना उपरि वज्राग्निना च तत् सर्व्वं परिणतं दृष्ट्वा तदाष्यस्पर्शेन प्रणवं वज्रविलीनं तस्मिन्नेवामृते [2]नवनीतवत् समरसीभूतं ध्यात्वा तदुपरि शुक्लताँकाररश्मिभिस्त्रैलोक्योदरवर्त्तिसर्व्वामृतमाकृष्य

---

[1] A शुचयोऽनयः । [2] A ०धन्वाभुजाञ्चित० ।
[3] AC ततः । [4] A omits नवनीतवत्...०ज्ञानामृत०

तचान्तर्भाव्य धर्म्मधातुसमतया सर्व्वतथागतहृदयवर्त्ति-ज्ञानामृतमाकृष्य तैरेव सहैकीकृत्य तदुपरि चितत्त्वं ध्यात्वा तेनैवाभिमन्त्र्य मर्व्वमाण्डलेय हृदये मण्डलचक्रं ध्यात्वा तज्जिह्वासु शुक्लहुंकारजं यवफलप्रमाणं शुक्लवज्रं ध्यात्वा तेन पञ्चामृतेन माण्डलेयानात्मानं च मन्तर्प्पये-दिति। एतेन मण्डलं निष्पन्नं विसन्ध्यं भावनां कृत्वा तिष्ठेत्। मततं देवतामूर्त्त्या स्थातव्यम्। तचायं जपमन्त्रः ॐ तारे तुत्तारे तुरे स्वाहा।

एतन्मन्त्रवरं श्रेष्ठं मर्व्वबुद्धैनमस्कृतम्।
पठितसिद्धिकरं तीव्रं वज्रपञ्जरभाषितम्॥

अथापरोऽपि धारिणीमन्त्रः, नम आर्य्यावलोकितेश्व-राय बोधिमत्त्वाय महामत्त्वाय महाकारुणिकाय, तद्यथा, ॐ तारे तुत्तारे तुरे मर्व्वदुष्टप्रदुष्टान् मम कृते जम्भय स्तम्भय मोहय बन्धय हुं हुं हुं फट् फट् फट् मर्व्वदुष्ट-स्तम्भनि तारे स्वाहा।

दशाक्षरस्य विधानम्— अनेन मन्त्रेण पटाञ्चलं सप्ताभिमन्त्रितं कृत्वा ग्रन्थिं बद्ध्वा विन्ध्यायामपि गच्छन् न केनाप्यवलीयते। व्याघ्रचौरनक्रसिंहसर्पदन्तिमहिषभल्लुक-गवयादयो नामस्मरणमात्रेण नश्यन्ति विलीयन्ते।

अनेन मन्त्रेण उत्पलानामष्टोत्तरशतं यावत् जुहुयात्। ॐ तारे तुत्तारे तुरे अमुकं मे वशमानय स्वाहा। पुनस्तेनैव मन्त्रेण काकपक्षं द्वाविंशद्वारान् परिजप्यारि-

[a] AC तेनैव
[b] A बहुल०
[c] AC तं।
[d] AN ०हृदय०।
[e] A मत्यो

गृहे गोपयेत् समाहेनोच्चाटयति। ॐ तारे तुत्तारे तुरे चल प्रचल शीघ्रगामिनि देवदत्तमुच्चाटय हुँ फट्।

अथापरोऽपि प्रयोगो भवति। ॐ तारे तुत्तारे तुरे अमुकाभिधानां कुमारीं मह्यमुद्वाहेन तस्याः पिता प्रयच्छतु स्वाहा।

मदनं चण्डबीजं च तथोन्मत्तकमेव च।
अशोकपत्रं पुष्पं च जुहुयात् पञ्चसहस्रकम्॥
घृतमधुगुडहोमं कन्यामिष्टां प्रशस्यते।
समाहेन तदा योगी लभेत् कन्यां स्ववाञ्छिताम्॥

अथापरोऽपि प्रयोगो भवति। ॐ तारे तुत्तारे तुरे अमुकाभिधानां स्वस्थानादाकर्षय ममान्तिके जः। अनेन मन्त्रेण बदरकण्टकानां पञ्चसहस्राणि स्वयम्भूकुसुमाक्तानि होतव्यानि। अनेन हुतेन नृपाणामपि कन्यामाकर्षयति।

अथापरोऽपि प्रयोगो भवति। रजःस्वलाकर्षणे भगवतीं द्विभुजामेकवदनामङ्कुशोत्पलपाशहस्तां विलिख्य तस्याः पुरतः पूजां कृत्वा इमे पुष्पाः शुभा दिव्या इत्यादिना पूजयेत्। पश्चान्मन्त्रं जपेत् भावनान्वितः ॐ तारे तुत्तारे तुरे अमुकीं कन्यां ममेप्सितं स्वप्नं कर्णे कथय हुँ फट्। पञ्चसहस्रेणागच्छति। पाशेन गलके बद्ध्वा अङ्कुशेन हृदि विदार्य च साध्यां पादतले ध्यात्वा दासीरूपेण भुञ्जयेत्।

अथापरोऽपि प्रयोगो भवति। ताराधारणीं समाभिमन्त्रितां कृत्वा आत्मनोऽङ्गिद्वयं अञ्जयेत्। राजकुलं प्रविशतः स राजा शिष्यवद् गौरवं करोति, विरुद्धं न

[1] A ०यन्त्र०।
[2] A प्रविशन्तः।
[3] A वदनकण्टकानां।
[4] AC शिष्यव।

वक्ति, प्रसादं च प्रयच्छति, प्रियालापं च कुरुते, दासतां ममुपैति, क्रुद्धोऽपि वशो भवेदिति दृष्टप्रत्ययश्च सम्भूतः।

अथापरोऽपि प्रयोगो भवति। ताराधारणीं शतधाऽऽवर्त्य हिवदनाशीविषं भस्म कृत्वा रक्तवर्णगो(गाभी)घृतेनार्कदलेन वर्त्तिं कृत्वा प्रज्वाल्य कज्जलं पातयेत्। तत् कज्जलं वज्रसूर्य्यवज्रधर्म्माभ्यां सम्मर्द्द्य परमान्नेन धूपयेत्। भस्मना सार्द्धमक्षि अञ्जयेत्। यां पश्यति चक्षुर्वज्रेण सा यदि पद्मनर्त्तेश्वरं न रक्षति तदाहं तारा न भवेयम्, घातिताश्च मया बुद्धा भगवन्तो भवेयुरिति।

अथापरोऽपि प्रयोगो भवति। अदृश्यनप्तृमुलोलां गृहीत्वा ताराधारण्या सप्ताभिमन्त्रितां कृत्वा भृङ्गराजमूलं गोरोचनया सार्द्धमेकीकृत्य ललाटे तिलकं परिधाय यां यां पश्यति, तां तां वशं करुते।

अथापरोऽपि प्रयोगो भवति। उदरकोटिं ताराधारण्या सप्ताभिमन्त्रितं कृत्वा वज्रधर्म्मेण सार्द्धं कन्यायै ताम्बूलेन सह दद्यात। अभ्यवहृतमात्रेण योगवरेण न मुञ्चति, नान्यं रमते, नान्यस्मिन गच्छति, नान्यं पुरुषमिच्छति, स्वपतिं त्यजति।

अथापरोऽपि प्रयोगो भवति। महातैलेनात्मानमभ्यङ्ग्य ताराधारणीं जपेत्। अमितं जपेद् भावयेच्च। जपान्ते शालिपिष्टकेन कुड्मल्या[*] शष्कुलिकां कृत्वा यस्यै यस्मै वा दीयते सा म पञ्चत्वं गता गतोऽपि न मुञ्चेदिति।

[1] AC सम्याद्य
[2] A धारा०।
[3] ANC च्छर्गति।
[4] A कुकुटुमलेन, N कुक्कुमलेन।

अथापरोऽपि प्रयोगो भवति। चन्द्रोपरागसमये तारा-धारणीं जपमानः सेवां कृत्वा ततः समुद्धृतं लोकेश्वरं संगृह्य शङ्खचूर्णेन भावयेत्। ततः प्रमदायै दातव्यम्, पश्चतां यावदनुवर्त्तते तमेव परमिच्छति नान्यम्।

अथापरोऽपि प्रयोगो भवति। ताराधारणीमन्त्रेण मदनफलमष्टोत्तरशतवारं परिजप्य तेन मदनफलेन हयग्रीवेण माद्यं यां स्वप्नयति सा वश्या भवति।

अथापरोऽपि प्रयोगो भवति। ॐ तारे तुत्तारे तुरे अमुकस्य बन्धनमुक्तिं कुरु मुः स्वाहा इत्यनेन मन्त्रेण अर्कदले साध्यनामविदर्भितं लिखित्वा कुलीरगर्त्ते गोप-येत्। तस्यावश्यं बन्धनमुक्तिर्भवति।

साधनं वज्रतारायाः संलिख्य यदुपार्जितम्।
तेन पुण्येन लोकोऽयं व्रजतां सोगतीं गतिम्॥

॥ वज्रतारासाधनं समाप्तम्।

। कृतिरियं रत्नाकरशान्तिपादानाम्॥

111.

संपूज्य देवीं [1]करवीरपुष्पै-
रष्टौ शतान्येव जपेत् चिमन्थम् ।
इष्टं वरं याचित [2]मेकमेव
मामेन दद्याद् ध्रुवमार्य्यतारा ॥

ॐ जम्भे मोहे स्वाहा, नमस्तारायै, नम आर्य्यावलोकितेश्वराय बोधिसत्त्वाय महासत्त्वाय महाकारुणिकाय, नमो भगवत्यै आर्य्यतारायै, ॐ तारे तुत्तारे तुरे वीरे दुर्गादुत्तारय ह्रीं ह्रीं ह्रीं सर्व्वदुःखान्मोचनि भगवति दुर्गोत्तारिणि महायोगेश्वरि ह्रीं नमोऽस्तु ते स्वाहा । एतां भगवतीं दुर्गोत्तारिणीतारां मुहुः श्यामां चतुर्भुजां वामेन पाशं दक्षिणेनाङ्कुशधारिणीं भक्तमाश्वासयन्तीं दक्षिणेन वरदां दिव्यमाल्याम्बरधारिणीं वामेन नीलोत्पलहस्तां सितवस्त्रप्रावृतदेहां पद्मासनस्थां त्रिकालं ध्यायेत् । सर्व्वदुःखेभ्य उत्तारयति । बन्धनात् मोचयति । शृङ्खलाविनिवेष्टितं पाशेन बद्धं ग्रहग्रस्तं वा उत्तारयति । बन्धस्थेन जप्तव्या । सहस्रमष्टशतं वा दिने दिने जपेत् मोचयति । यदि न मुञ्चति तदा मूर्द्धानं स्फुटति [भूम्यां] लुठति । स्वस्थो वदति अमुकं मुञ्चेति । तं यदि न मुञ्चति तदा शिरोवेदना भवति, ज्वरो महान् भवति, विषमा विसूचिका भवति, साधकस्य दर्शनं ददाति, सप्तमे दिवसेऽवश्यं मोचयति । एषा भगवती दुर्गोत्तारिणी

---

[1] N omits करवीर० ।
[2] AC ग्राभिमत० ।
[3] AC omit.
[4] AC जपन्ति सदा ।
[5] AC ०देहो ।
[6] AC स्रावयति ।

कथिता ह्रूँ ह्रौँ[1] मन्त्र वारान् पुष्पमभिमन्त्र्य दातव्यम्। पूजा। मँमध्ये खँ ताँ वामावर्त्तेन वुँ आँ जौँ हुँ। वामावर्त्तेन [2]लोँ मां पाँ ताँ।

॥ इति दुर्गोत्तारिणीसाधनं समाप्तम् ॥

112.

उत्थाय पूर्व्वमन्थायां भूप्रदेशे मनोहरे।
मृद्वासनोपविष्टः सन् स्वहृदि चन्द्रमण्डले॥
पञ्चमन्त्र प्रथमं तु द्वितीयस्वरयोजितम्।
अर्द्धेन्दुबिन्दुसंयुक्तं सितरश्मिविभूषितम्॥
तस्य शुक्लमयूखैस्तु तारामाकृष्य व्योमनि।
द्विभुजां सितदेहां तु वरदोत्पलधारिणीम्॥
पञ्चोपचार पूजाभिः पूजयित्वा तु भक्तितः।
पापानां देशनां पश्चात् ततः पुण्यानुमोदनाम्।
तत्परिणामनां चैव त्रिशरणगमनं तथा॥
ॐ शून्यताज्ञानवज्रस्वभावात्मकोऽहमिति पठेत्।
इति स्वपरशून्यं वै ध्यात्वा योगी विधानवित्।
सितारविन्दमध्यस्थचन्द्रबिम्बासनोपरि॥
पूर्व्वोक्तबीजनिष्पन्नां तारादेवीं मनोरमाम्।
आबद्धवज्रपर्य्यङ्कां वरदोत्पलधारिणीम्॥

---

[1] A क्रूँ क्रौँ जः।
[2] A खतां।
[3] A ह्रूँ, C क्रूँ।
[4] ANC लां।
[5] A ०हार०।

शरच्चन्द्रकराकारां पृष्ठचन्द्रसमाश्रिताम् ।
सर्व्वालङ्कारसम्पूर्णां षोडशाब्दवपुष्मतीम् ॥
सर्व्वमंबुद्धतत्पुत्रमातरं कामरूपधाम् ।
ध्यात्वाऽऽर्य्यतारां हृदये तत्प्राश्वक्रं मितद्युति ॥
अष्टकोष्ठकमष्टाभिरक्षरैः परिपूरितम् ।
ॐह्राव्यञ्जनमध्यस्थमाद्यनामाद्यनाभिकम् ॥
ध्यायादेकाग्रचित्तः मन् पद्मासान दृढ निश्चयः ।
जपेदखिन्नचित्तः मन् मन्त्रमेनं दशाक्षरम् ॥
ॐकारमादितो दत्त्वा पश्चात् तारे प्रयोजयेत् ।
तुत्तारे स्यात तुरे पश्चात् स्वाहान्तं सार्वकर्म्मिकम ॥
ब्रह्मेन्द्रविष्णुचन्द्रार्करुद्रादिकालमन्मथैः ।
अप्यखण्डितरोमाग्रो मृत्युं जयति मुक्तवत ॥
वलिपलितदौर्भाग्यव्याधिदारिद्र्यसंक्षयः ।
सिंहाद्यष्टमहाभीतिदुःखमन्दोहनाशनम् ॥
अयाचितान्नपानादिहर्म्यवस्त्रादिसङ्गमः ।
खड्गाञ्जनपादलेपभद्रकुम्भादिसिद्धयः ॥
कविता वक्तृता मेधा प्रज्ञा चैकान्तनिर्म्मला ।
अन्या च वाञ्छिता सिद्धिश्चक्रादस्मात् प्रजायते ॥

॥ इति मृत्युवञ्चनोपदेशतारासाधनं समाप्तम् ॥

---

[1] A सर्व्वबुद्ध० ।
[2] A सन्नामानुरूढ० ।
[3] A omits मृत्यु० ।
[4] A पद्मितं ।
[5] AN अवारिता० ।

113.

विश्वमातायै नमः

ध्यात्वा चन्द्रार्कमध्ये त्वलिकलिमहिते तोयबीजाब्जमेकं
तेनोत्पन्नैकवक्त्रां यमकरकमलां देवतीं चन्द्रवर्णाम् ।
आरूढां श्वेतनागं मितजलजकरीं चाभयां श्वेतवस्त्रां
श्वेताभ्यलङ्कारयुक्तां प्रहसितवदनां प्रेषयन् साध्यवेश्म ॥

तस्मात् साध्यं गृहीत्वा पुनरपि च विभोर्मण्डले सम्प्रविष्टा
भर्त्तुराज्ञां प्रलब्धाः पुनरमृतघटैर्लोचनाद्याः[1] प्रहृष्टाः ।
तं साध्यं स्नापयन्ति प्रवरदशविधाः शक्तयः पूजयन्ति
रूपाद्याः पोषयन्ति प्रकटदशबलान्यादय[2]स्तोषयन्ति ॥

भूताख्याश्चाह्वयन्ति प्रवरदशविधाः क्रोधजाः पालयन्ति
नागिन्यश्चुम्बयन्ति त्वमरयुवतयो द्वादशालिङ्गयन्ति ।
चण्डाः कुर्व्वन्ति रक्षां सकलभुवितलं यान्ति पुष्ट्यर्थहेतो-
रेवं साध्यं च सर्व्वं परमसुखकरं योगिना भावनीयम् ॥

॥ विश्वमातासाधनं समाप्तम् ॥

---

[1] N ०बीजाब्ज एकं ।
A इन्दो० ।
[2] A ०भ्यादयः० ।
[3] A पुष्ट्यर्थहेतोः ।
[4] A जल० ।
[5] A लोचनाये ।
[6] A चन्द्राः ।
[7] A योगीनां ।

114.

नमस्तारायै

पूर्व्वक्रमप्रयोगेन भगमध्ये शशिमण्डले।
हेमवर्णां महाघोरां तारादेवीं महर्द्धिकाम्।
चिनेत्रामष्टवदनां भुजषोडशभूषिताम्॥
ऊर्द्ध्वपिङ्गलकेशां सार्द्रगजाजिनमुण्डमालाकृतहाराम्—
प्रत्यालीढपदोपेतां जगत्त्राणां महाबलाम्।
विचित्रवस्त्रनेपथ्यां हसन्तीं नवयौवनाम्॥

प्रधानमुखं पीतं दक्षिणं द्वितीयं नीलं तृतीयं श्यामं चतुर्थं गगनश्यामं वामे कुन्दसन्निभं द्वितीयं रक्तं तृतीयं गगनश्यामं ऊर्द्ध्वास्यं धूम्रवर्णाभं महाघोरं मध्यास्यं विकटोत्कटं दक्षिणकरेषु खड्गोत्पलशरवज्राङ्कुशदण्डकर्त्ति-अभयधरां वामभुजेषु सपाशतर्ज्जनिकपालधनुःखट्वाङ्गम-वज्रं पाशब्रह्मशिरोरत्नकलशधरां विश्वपद्मचन्द्रस्थां सूर्य्य-प्रभाविभूषितां वामपादेनेन्द्रं दक्षिणपादेनोपेन्द्रं पादद्वय-मध्ये रुद्रं ब्रह्माणं चाक्रम्य स्थितां सर्व्वावरणविनाशनीं भावयेत्। योगी लघु सिद्धिमवाप्नुयात। जपमन्त्रः ॐ प्रसन्नतारे अमृतमुखि अमृतलोचने सर्व्वार्थसाधनि सर्व्वसत्त्ववशङ्करि हुँ फट् हुँ स्वाहा।

॥ इति सर्व्वार्थसाधन्याः प्रसन्नतारायाः साधनं समाप्तम्॥

A(1) सार्द्र०। A ऊर्द्ध्वान् प्रभृ०। A वक्त्रा०। A °विरागिनीं। (2) ANO(2) दक्षिणं। (3) N खड्गाङ्गो०, A खड्गदक्षिणकभुजो०। (4) A °सर्व्वत०। (5) A adds अमृते after this.

115.

नमस्तारायै ।

ॐ तारे तुत्तारे तुरे स्वाहा । ॐ कुरुकुल्ले स्वाहा मूलमन्त्रः शरीरे न्यस्तव्यः, हृदयमन्त्रेण जापः कर्त्तव्यः, ॐकारं शिरसि न्यस्तव्यम्, कुकारं शिखायां न्यस्तव्यम्, रुकारं चक्षुषि युञ्जयेत, कुकारं कवचं कुर्य्यात् ।

लकारं मस्तकमूर्द्ध्नि लँकारं हृदये न्यसेत् ।
स्वाकारं नाभिदेशे तु हाकारं पादयोर्न्यसेत् ।

एवं अक्षरविन्यास आत्मदेहे साधकेन कर्त्तव्यः ।

ॐकारं श्वेतवर्णाभं कुकारं श्यामसेव च ।
रुकारं रक्तमेवोक्तं कुकारं श्वेतमेव च ॥
लकारं पीतमुद्दिष्टं लँकारं श्यामसेव च ।
स्वाकारं रक्तमुद्दिष्टं हाकारं कृष्णमेव च ॥

एवमेवाक्षराणां वर्णं कथितम् । तारायां मन्त्रमेवम्— एहि देवि भगवति, प्रसादं मे देवि कुरु, पूजां गृहाणाच सन्निहिता भव आवाहनमन्त्रः । ॐ तारे तुत्तारे तुरे हुँ फट् स्वाहा अर्घमन्त्रः । पद्ममुद्रां बद्ध्वा सुगन्धपुष्पैरर्घो देयः । ॐ तारे तुत्तारे तुरे सर्व्वकर्म्मसु योजयेत् ताँकारः । स एवंविधः ॐ ताँ ताँ ताँ ताँ ताँ इति । अनेन सर्व्वशत्रून् स्तम्भयति । अङ्गुलिषु न्यस्तव्यः । सर्व्वशत्रोर्हस्ते दर्शयेत्, ततः स्तम्भितो भवति। ॐ चाँ चाँ चाँ चाँ चाँ पुनः

---

[1] AN कुंका० ।
[2] A मस्तकमुद्दौतं ।
[3] N भवति ।
[4] AC देहि ।
[5] AC कर्म्मसंयो० ।
[6] AC सुस्थितो ।

यस्य संप्रत्ययतो भवति। ताँकारं लक्षं जपेत्। ग्रामशतं लभते। ॐ चुं चुं चुं चुं [चुं] अनेन सर्व्वरक्षा भवति। राजकुलप्रवेशे गोरोचनां अष्टशताभिमन्त्रितां कृत्वा तिलकं दत्त्वा अष्टसु स्थानेषु योजयेत्। शिखायां ललाटे कण्ठे हृदये नाभौ जानुनोः(भ्यां) पादयोश्चेति एवं मन्त्रा न्यस्तव्याः। अनेनैव गोरोचनया अङ्गिण्यञ्जयेत्। ततो राजकुलप्रवेशे राजा ममभिमुखमवलोक्य कथयति। शतसहस्रजापेन सर्व्वमन्त्रा वश्या भवन्ति। चुं चुं चुं चुं [चुं] ॐ अस्य मन्त्रस्य लक्षं जापयेत्। ग्राममहस्रं लभते, भगवतीं तारां च पश्यति। दीपमन्त्रः। ॐ रूं रूं रूं हः हः हुं फट् स्वाहा शिखाबन्धमन्त्रः। ॐ ताँ ताँ ताँ ताँ तां बन्ध ता हा हः स्वाहा अधोर्द्धमन्त्रः। अयं ताराजाप-विधिक्रमः— ॐ चुं चुं चुं चुं चुं हृदयमन्त्रः। उपहृदयं ता(ति ते। अनेन) अयं वशकर्म्मणि प्रयोजयेत्। वशी-करणमण्डलमालिख्य श्मशानाङ्गारेण प्रतिकृतिं कृत्वा शिखायां ता, ताँ गुह्ये, ति पादयोरेवं विन्यस्य करवीर-पुष्पैर्भगं ताडयेत्। अनेन मन्त्रेण सा वश्या भवति। आकर्षणे गोरोचनया भूर्जपत्रे स्त्रिया वा पुरुषस्य वा प्रतिकृतिं कृत्वा ति शिरसि, ति हृदये, ति गुह्यदेशे, ति पादयोः, तँ ललाटे एवं अष्टधाविन्यासं कुर्य्यात्।

अथ पटविधाने भगवतीं तारां लिखेत् चतुर्भुजां रक्त-श्यामकृष्णशुक्लवर्णां विश्वरूपां एकहस्तेन पाशं अपरेण

[1] A लक्षणं।
[2] AC ०प्रदेशे।
[3] A तातादिते।
[4] A ०प्रदेशे।
[5] ताँ ताँ in C.
[6] A सुहृति, C तुहेति

खड्गं उत्पलं तथा अङ्कुशहस्तां[1] अङ्कुशेनाकर्षयन्तीं चिन्तयेत्। योजनशतमहस्राद्प्याकर्षयति। लक्षजापो देयः। यं इच्छति तं वशमानयति। ततोऽञ्जलिं विन्यसेत्। ततः शत्रोर्नामाभिलिख्य हस्तेनावष्टभ्य तावद् जपेत् यावत् तत्कालग्रहः। कृष्णवर्णां विचिन्तयेत्। ॐ चाँ चाँ चाँ चाँ चाँ ॐ अस्य लक्षजापेनाभिषेकबन्धो भवति। अथ नीलोत्पलपुष्पैर्भगवतीं तारां दशमहस्रैरर्चयित्वा अस्य जापो देयः। एकैकेनार्चयित्वा जपेत्। अन्यानुशंसात् सर्व्वजनप्रियो भवति त्रिकालमष्टशतिको जापः। एवमेव सेवा। राजकुले वा व्यवहारे वा देवागारे वा अरण्ये वा सर्व्वत्र भगवती तारा रक्षां करोति इति।

आर्य्यतारा भट्टारिकायाः कल्पः समाप्तः।

116.

महाश्रीतारायै नमः

आदौ तावन्मन्त्री [ॐ] स्वभावशुद्ध इत्यादिमन्त्रेणाधितिष्ठ[2] शून्यतां विभाव्य तदनन्तरं शुभ्राकारोद्भूत[3] चन्द्रमण्डलं तदुपरि हरितताँकारबीजसम्भूतां महाश्रीतारां चन्द्रासनस्थां श्यामवर्णां द्विभुजां हस्तद्वयेन व्याख्यान-

[1] अङ्कुशहस्तां dropped in A. [2] ०कट्ट०। A कोपः। [3] A एवं सेवा MS Ba begins here again after a long break. [4] Nb ०तिष्ठत्. [5] Nb सूचकारोद्भवन०

मुद्राधरां एकवक्त्रां सर्व्वालङ्कारभूषितां पार्श्वद्वयेनोत्पल-शोभां सुवर्णसिंहासनोपरि अपाश्रयादिशोभां नाना-पुष्पाशोकचम्पकनागेश्वरपारिजातकादिभीराजितामोघ-सिद्धिमकुटिनीम्।

महाश्रीतारायाः पार्श्वे एकजटामर्द्धपर्य्यङ्कोपविष्टां नीलवर्णां कर्त्रिकपालधरां सक्रोधां लम्बोदरां पिङ्गलजटा-विभूषितां व्याघ्रचर्म्माम्बरधराम्, दक्षिणे पार्श्वे अशोक-कान्तां पीतवर्णां रत्नमकुटिनीं वज्राशोकधराम्, पुनर्वामे आर्य्यजाङ्गुलीं श्यामवर्णां सर्पवरदहस्ताम्, दक्षिणे महा-मायूरीं मयूरपिच्छवरदहस्ताम्। भावनावमानसमये उत्पलमुद्रां बन्धयेत्। ततोऽलातचक्राकारं पश्यन् मन्त्रं जपेत् ॐ तारे तुत्तारे तुरे धनं दद्दे स्वाहा।

राजलीला स्थिता देवी महाश्रीः करुणान्विता।

इति महाश्रीतारिण्याः साधनं समाप्तम्।

०द्वयं। [1] Nb ददः।

B ०ललिता०।

[1] This *Sādhana* is found in Nb and B only; *see* for instance, B Fol. 81 A.

117.

पूर्व्वोक्ते[न] विधानेन स्वहृदि रक्तमण्डले ।
जाँकारज्ञाननिष्पन्ना[1] विद्या नाम्ना तु जाङ्गुली ॥
पीतसप्तफणाभोगा ज्वलत्सन्मणि[2]भूषणा ।
त्रिनेत्रा[3] तु त्रिमुखा कुमारीलक्षणोज्ज्वला ॥
सरोषहसिता[4] चैव सर्पमण्डितमेखला ।
षड्भुजा लक्षिताक्षेपाऽक्षोभ्यावष्टब्धमस्तका ॥
दक्षिणे[5] तु करे वज्रं द्वितीये खड्गमुद्यतम् ।
तृतीये नृत्याभिनयं मारचामिशरोद्यता ॥
वामे तर्ज्जनिकापाशौ[6] द्वितीये विषपुष्पकम् ।
तृतीये धनुर्हस्ता[7] च पुष्पमण्डितमेखला ॥
पद्मासनस्था कनकवर्णा रक्त[8]प्रभामण्डला
स्फुरन्तीन्द्रायुधनिर्म्माणज्वालापरिकरच्छदा ।
स्फुरद्द्वौघबिम्बांस्तु[9] चन्द्रकलशान्[10] स्वहस्तकान्
मेकयन्ती विषसुप्तांस्तु[11] जाँकारमुखरञ्जिता ॥
भावयेद् विषपाते तु[12] चिकायां जाङ्गुलीं सदा ।
एवं हि भाव्यमानेन चिराद् बोधिरवाप्यते ॥
हस्तद्वयेन सर्प्पभोगाकारेण मूर्द्धि फट्कृचं प्रयच्छ

---

[1] A ०सिध्यन्ना ।
[2] NB ०भूषिता ।
[3] ABa सरोषसहिता ।
[4] A ०नयनं ।
[5] A ०पुस्तकं ।
[6] N ०मण्डलप्रभा, Ba ०मण्डा ।
[7] A ०स्ताक्रान्तात् Ba ०स्तासन् ।
[8] Ba ०समणि०
[9] B त्रिमुखा त्रिनेत्रा तु
[10] AC ०मुद्यतां
[11] A ०पाणौ ।
[12] B गन्धहस्ता ।
[13] A विम्बां, N विम्बाम् ।
[14] ANC ०पानन्तु ।

तेन जाङ्गुलीमुद्रा। मन्त्रं जपेत् ॐ नमः शबरकुमारि ये चूर्च्छचाडि चालय चुच्चालय संघट्टनि मत्तमातङ्गि अडविद्ध अहे ॐ जः स्वाहा।

॥ आर्य्यजाङ्गुलीसाधनम् ॥

118.

ॐ इलिमिलि तिलिमिलि इलितिलिमिलि दुम्बे दुम्बालीए दुम्मे दुम्मालीए तक्के तक्करीए मर्म्मे मर्म्मरीए कश्मीरे कश्मीरमुक्के अघे अघने अघनाघने इलि इलीए मिलीए इलिमिलीए अक्याइए अप्याइए श्वेते श्वेततुण्डे अननुरक्के स्वाहा।

इयमस्माकं भिक्षवो विद्या सर्व्वश्वेता मृदङ्गिणी। य इमां विद्यां सकृत् शृणोति स मत्त वर्षाणि अहिना न दश्यते, न चास्य काये विषं संक्रमिष्यति। य इमां विद्यां भिक्षवो धारयिष्यति स यावज्जीवं अहिना न दश्यते, न वास्य काये विषं संक्रामति। यश्चैनमहिर्दशेत् तस्य मस्तधा स्फुटेत् मूर्द्धा अर्ज्जकस्येव मञ्जरी।

॥ आर्य्यजाङ्गुलीधारणी ॥

NC चूर्णचाडि, Ba चुर्चचाडि
A मिचमातङ्गि, Ba °मातङ्गि
B दुम्म।
B °लिये
°AC अप्या°, N अक्षया°
न dropped in A.
AC श्वेतस्य।
Ba चुचाल्य।
A अङ्ग।
दुम्मा।
B °लिये
ANCBa अनन्तरक्ते।
ANCBa चास्य।
B आर्य्याकस्येव।

119.

पूर्व्वोक्तविधानेन शून्यताभावनानन्तरं रक्तकमलचन्द्रे पीतजाँकारपरिणतामार्य्यजाङ्गुलीमात्मानं झटिति निष्पादयेत् पीतां त्रिमुखां षड्भुजां नीलसितदक्षिणेतरवदनां खड्गवज्रबाणदक्षिणहस्तत्रयां सतर्ज्जनीपाशविषपुष्पकार्म्मुकवामकरत्रयां स्फीतफणामण्डलशिरःस्थां सर्वदिव्यवस्त्राभरणभूषितां कुमारीं[1] लक्षणोज्ज्वलां अक्षोभ्याक्रान्तमस्तकां ध्यात्वा मन्त्रं जपेत् ॐ जाङ्गुलि सर्व्वविषप्रशमनि हुः स्वाहा।

॥ आर्य्यजाङ्गुलीसाधनम् ॥

120.

एवं मया श्रुतमेकस्मिन् समये भगवान् श्रावस्त्यां विहरति स्म जेतवने अनाथपिण्डस्यारामे महता भिक्षुसङ्घेन सार्द्धं अर्द्धत्रयोदशभिर्भिक्षुशतैः सम्बहुलैश्च बोधिसत्त्वैर्महासत्त्वैरनेकैश्च देवनागयक्षगन्धर्वासुरगरुडकिन्नरमहोरगमनुष्यामनुष्यैश्च सार्द्धम्। तत्र खलु भगवान् भिक्षूणामामन्त्रयते स्म। भूतपूर्व्वं भिक्षवो बोधिसत्त्वभूतो विहरामि। हिमवन्तस्योत्तरपार्श्वे पर्व्वते गन्धमादने तस्य पर्व्वतराजस्य प्राग्भारे कुमारीशतपुण्यलक्षणा—

Ba ०णोत्तर०।
AC जाङ्गली।
B कुमारी

गणेयचर्म्मवसना सर्पमण्डितमेखला ।
आशीविषसुभ्रलिका[1] दृष्टिविषा वर्तमिका ॥
खादन्ती विषपुष्पाणि पिबन्ती मालुतालताम् ।
सांमालयति[2] लागयति[3] (?) गृह्ण वत्स मृगोहि मे ॥
जाङ्गुलीनामाहं विद्या उत्तमा विषनाशनी ।
यत्किञ्चित् मम नाम्ना हि तत्सर्व्वं नश्यते विषम् ॥

तद्यथा, ॐ इलिमित्ते तिलिमित्ते इलितिलिमित्ते दुम्बे दुम्बालीए दुम्मे दुम्मालीए तक्के तक्करणे मम्मे मम्मरणे कश्मीरे कश्मीरमुक्के अघे अघने अघनाघने इलि इलीए मिलीए इलिमिलीए अक्खाडए अप्पाडए श्वेते श्वेततुण्डे अननुरक्के स्वाहा ।

इयमस्माकं भिक्षवो विद्या सर्व्वश्वेता सुदक्षिणा[4]। य इमां विद्यां मनुक्त[5] मृणोति म मस्य वर्षाणि अहिना न दश्यते[6]। न चास्य काये विषं संक्रमिष्यति। य इमां विद्यां भिक्षवो धारयिष्यति म यावज्जीवमहिना न दश्यते, न चास्य काये विषं संक्रामति। यश्चैनमहिर्दशेत् तस्य मस्तधा स्फुटेत् मूर्द्धा अर्जकस्येव मञ्जरी ।

इमानि च मन्त्रपदानि सर्पस्य पुरतो न वक्तव्यानि यत्कारणं सर्पा म्रियन्ते। तद्यथा, इर्णा चिर्णा चक्को वक्को

[1] A ०दुम्भलिका, Ba ०चुम्भलिका
[2] Ba दुम्ब ।
[3] ANC add इलो after this.
[4] N सर्व्वश्च यता
[5] AC ०दर्शयत ।
[6] Ba इच्छा

Ba ०वदर्शिका
[7] Ba दुम्भ०
[8] Ba श्वेति ।
[9] Ba दंश्यते ।
ANC यतस्य
[10] ANC omit.

कोडा कोडेति मोडा मोडेति कुरुडा कुरुडेति निकुरुडा निकुरुडेति पुरुडा पुरुडेति निपुरुडा निपुरुडेति फुट्टे फुट्टरहे फुट्टटुटुण्डरहे नागे नागरहे नागटुटुण्डरहे मर्प्पे मर्प्परहे मर्प्पटुटुण्डरहे अच्छे अच्छले इलविकल-विषे शीते शीतवत्तालें हले हलले तुण्डे तुतुण्डे तण्डिते तण्डितट्टे तट्ट स्फुट स्फुटतु विषं स्वाहा।

इति हि भिक्षवो जाङ्गुल्या महाविद्यायाः सर्व्वदेवासुर-नागयक्षभूतसमागमे भाषितलपितमुदीरितं प्रव्याहृतं सर्व्वं तत् तथा अवितथा नान्यथाभूतं सत्यतथ्यम्। तथा यथावदविपरीतं अविपर्य्यस्तं बुद्धसत्यमनुस्मर धर्म्मसत्य-मनुस्मर सङ्घसत्यमनुस्मर सत्यवादिनां सत्यमनुस्मर। अनेन सत्येन सत्यवचनेन इदं विषं अविषं भवतु, दातारं गच्छतु, दष्टारं गच्छतु, अग्निं गच्छतु, कुड्यं गच्छतु, जलं गच्छतु, स्तम्भं गच्छतु, शान्तिं गच्छतु, स्वस्त्ययनं गच्छतु, भूम्यां निपततु, विषं स्वाहा। इदमवोचत् भगवानानन्दस्त च भिक्षवः मा च सर्व्वावतो पर्षत् सदेवमानुषासुरगरुड-गन्धर्व्वकिन्नरमहोरगयक्षनागपर्षद् भगवतो भाषितमभ्य-नन्ददिति।

॥ आर्य्यजाङ्गुलीमहाविद्या समाप्ता ॥

A N C कोडिति | Ba निरुडा
Ba निरुडे० | Ba फुट्टे
A N फफट्टे फट्टे टुण्ठरहे | A C ०टुण्ड०
A ०हरे, Ba ०रटे | A मर्प्पटट०
N इलविख० | ०कलविषे found in N.
स्फटे, A विभुषं | भगवतो found in Ba.

121.

अथ भगवत्या हृदयकल्पं व्याख्यास्यामः। ॐ असि-जिह्वे शूलजिह्वे वज्रकाये ग्रस ग्रस ज्वल ज्वल महाज्वाले महायोगेश्वरि हुँ हुँ फट् फट् स्वाहा। दशसहस्रजापात् सर्व्वविषकर्म्मशमनसमर्थो भवति। जपश्चानेन विधिना कर्त्तव्यः। त्रिकालस्नायी मद्यमांसवसामत्स्याण्डतैललवण-विवर्जितस्त्रिकालं जपेत् यावद् दशसहस्राणि। ततः सिद्धो भवति। पश्चात् कर्म्माणि कारयेदनेन विन्यासेन।

प्रथमं तावन्मन्त्री आत्मानमीदृशं चिन्तयेत् कुमार्य्या-कारं हरितवर्णं सप्तफट्विराजितमूर्द्धजं चतुर्भुजं एकमुखं एकहस्तेन त्रिशूलं द्वितीयेन मयूरपिच्छं तृतीयेन सर्पं चतुर्थे प्रसारिताभयम्। सर्व्वाङ्गेन नूपुरमेखलावलय-कुण्डलादीन् सर्पाकारान् चिन्तयेत्। एकैकस्मात् रोम-विवरात् अग्निज्वालां समन्तान्निष्काशमानां विचिन्तयेत्। एवमात्मनि कल्पयेत् अहं तावद् देवता। ततः सर्पदष्टकं पुरतः संस्थाप्य ताम्रादिभाजने उदकं प्रतिष्ठाप्यानया विद्यया सप्तवाराभिमन्त्रितं तं सप्त वारान् शिरःप्रभृति-विषमाकृष्य ततो दक एव प्रक्षिपेत् पुनः पुनः। एतेन निर्व्विषो भवति। चलं च विषं यं यमेवाङ्गं मुञ्चति तस्मिन् तस्मिन् स्थाने मृत्तिकया सप्तजप्तया धारणीबन्धं सर्पाकारवलययोगेन कारयेत्। एतौ मुद्रौ सर्पाकारौ।

[1] AC दशप्रत०। [2] N ०दष्टकयुतं।

हुःकारं मुच्चेद् दृष्टकस्याङ्गे पिबन्तमिव विषं चिन्तयेत् एवं कर्म्मसिद्धिर्भवति नान्यथा ।

॥ इत्यार्य्यजाङ्गुल्या भगवत्याः कल्पः समाप्तः ॥

122.

नमो भगवत्यै आर्य्यजाङ्गुल्यै

नत्वा भगवतीं तारामार्य्यजाङ्गुलिरूपिणीम् ।
सत्त्वानामनुकम्पाय लिख्यतेऽस्याः प्रसाधनम् ॥

प्रथमं तावन्मन्त्री शुचिः स्नातः शुक्लमाल्याम्बरधरः शुक्लगन्धानुलिप्तो विजने सुलिप्ते प्रदेशे शुक्लसुगन्धितोयोपसिक्ते शुक्लपुष्पप्रकरावकीर्णे सुखासनोपविष्टो जगति मैत्रीकरुणामुदितोपेक्षां विभाव्य ॐ स्वभावशुद्धाः सर्व्वधर्म्माः स्वभावशुद्धोऽहमित्यु च्चार्य्य जगद् ग्राह्यग्राहकरहितं पश्येत् । तदनन्तरं चिन्तयेत् पँकारं शुक्लवर्णं तत्परिणतं पद्मं सितं विकसितशतपत्रं तद्दरटके शुक्लाकारेण

N मुच्चेद० Ba पिबन्तो०
This *Namaskara* is found only in Ab.
Ab जाङ्गुलीरूपधारिणीं
ANCBa लिख्यते तत्प्रसा०
शुक्लगन्धानुलिप्तो is found only in Ab.
A ०गन्धिते Ab ०प्रकारा०
Ab ०करुणां विभावयेत् ANC Ba ०चार्य्येत्ततो
Ab पश्यति Ab अकारं
Ab ०णतेन ANCBa omit विकसित०

चन्द्रमण्डलं दृष्ट्वा तदुपरि शुक्लवर्णह्रीःकारजातमानं आर्य्यजाङ्गुलीरूपां सर्व्वशुक्लां चतुर्भुजां एकमुखां जटा-मुकुटिनीं शुक्लां शुक्लनिवसनोत्तरीयां मितरत्नालङ्कार-भूषितां शुक्लसर्पैर्व्विभूषितां मत्त्वपर्य्यङ्के उपविष्टां मूलभुजाभ्यां वीणां वादयन्तीं द्वितीयवामभुजेन मित-सर्पधारिणीं अपरदक्षिणेनाभयप्रदां चन्द्रांशुमालिनीं ध्यायात् । शिरसि कण्ठे स्तनान्तरे चन्द्रमण्डले आः ह्रीः हंकारान् विभावयेत् । तदनु ह्रीःकाररश्मिनाऽऽकृष्य गगनस्थान् ज्ञानसत्त्वसमयसत्त्वान् एकीकृत्य विभावयेत जः हुं वं होः प्रयोगेणेति । पुनरपि ह्रीःकाररश्मिनाकृष्टाः सर्व्वतथागता गगनस्थाः मत्त्वार्थोद्यतं मामभिषिञ्चन्तु । सुचिरं बहलकायं चिन्तयेत् । एवं ध्यात्वा जपेन्मन्त्रम् । ह्रीः इति जापमन्त्रः सप्तलक्षं जपेत्, सप्तायुतं मितपुष्पं जुहूयात् मितालङ्कारभूषितः । अनेन क्रमेण गरुडस्वरत्वं कवित्वं सर्व्वशास्त्रविशारदत्वं सर्व्वविषहरत्वं भवति न सन्देहः ।

॥ आर्य्यजाङ्गुलीसाधनं समाप्तम् ॥

Ab ०वर्णां ०जाङ्गु० | ANCBa शुक्लोत्तरीयां |
ANCBa ०पर्य्यङ्गमा०
Ab दक्षिणाभय० | Ab ह्रीं ।
Instead of सर्व्वतथा०.....जपेन्मन्त्रम्, Ab has सर्व्वतथागतान् गगनस्थान् सितोदकेनाभिषिञ्च स्वशिरसि सितवर्णकाये सञ्चिन्तयेत् ।
Ba सुचिरं | Ab भूषितां ।

123.

नम एकजटाय[1]

अतः परं प्रवक्ष्यामि यथाकल्पोपदेशतः ।
तारामेकजटाम्नायां नत्वा तस्याः प्रसाधनम् ॥

ॐ हुं वज्राङ्गे मम रक्ष रक्ष फट् स्वाहा इत्यनेनात्मरक्षां कृत्वा प्रथमं तावद् योगी मुखशौचादिकं कृत्वा क्वचिद् विजने घनश्मशानचत्वरादौ सकलजगदभ्युद्धरणोत्साहवत्सलः परमसुखाभ्यामीनः स्वहृदि रक्तपद्मोपरि चन्द्रमण्डले कृष्णहुँकारं मरश्मिकं ध्यायात्। तस्य रश्मिनाऽऽकाशे गुरुबुद्धबोधिसत्त्वान् दृष्ट्वा पूजयेत्। पापदेशनापुण्यानुमोदनाचिशरणगमनबोधिचित्तोत्पादादिकं कृत्वा आत्मभावनिर्य्यातनामार्गाश्रयणं चाशयविशुद्धिरहङ्कारममकारपरित्यागश्चेति मैत्रीकरुणामुदितोपेक्षां च भावयेत्। ततश्च—

चित्तमात्रं तु वै तिष्ठेत् बोधिसम्भारभावनैः[2]।

प्रतिभासमात्रं ज्ञानं ॐ शून्यताज्ञानवज्रस्वभावात्मकोऽहं स्वपरं विभाव्य शून्यं प्राक्प्रणिधिमनुस्मरेत्[3]। रेफेण सूर्य्यं पुरतो विभाव्य तस्मिन्[4] रवौ हुंभवविश्ववज्रं विश्ववज्रान्तर्गतं सूर्य्यमण्डलं सूर्य्यमण्डलस्योपरि चन्द्रमण्डले स्फुरद्रत्नप्रदीपमिव हुंकारं निश्चलं ध्यायात्। ततस्तस्माद् विनिसृत्य नीलपीतरक्तहरितनानावर्णरश्मिनिकरैः रोम-

[1] C °जटानाम्ना ।
[2] Ab adds another फट्
[3] AC स्वमपरं ।
[4] A तस्मिन् only ।
[5] N लिख्यते चास्य साधनं
[6] Ba चतुर्ब्रह्मविहारौ
[7] Ab °स्मरन् ।

विवरविनिर्गतै रक्तपँकारजं रक्तकमलं रक्ततनु वैरोचनादिपरमाणुमयैः पूर्व्वादिदिक्षु चंक्रमणेन यमान्तकादयस्तत्रानीय संपूज्य तत्त्वपूजादिभिः त्रिशरणगमनादिकं ध्यायात् तान्येव प्रवेशयेत् इति बुद्धोपसंहारो नाम समाधिः।

ततः करुणाभिडितहृदयो यथाक्रमं नरकतिर्य्यक्प्रेतमनुष्यासुरदेवतामवलोक्य तद्विनिर्गतनानारश्मिभिः संस्पृश्य वैरोचनादितथागतरूपेण निष्पाद्य तत्रैव प्रवेशयेदिति समयसत्त्वोपकारो नाम समाधिः।

तत आकाशदेशे रक्तपँकारजं रक्तकमलं विस्वदलं केशरान्वितं तन्मध्ये रक्तरँकारपरिणतं सूर्य्यमण्डलं तन्योपरि कृष्णहुँकारजं सूर्य्यम्, सूर्य्यस्थहुँकारोद्भवं करालवज्रं यवप्रमाणं वज्रमयं रश्मिविकीर्णं सकलमारसैन्यविनाशयमानं विचिन्तयेत्। ततो भाभिरूर्द्ध्वगताभिर्वज्रपञ्जरं पार्श्वगताभिर्वज्रप्राकारं वज्रवितानमधोगताभिर्वज्रमयीं भूमिं विदध्यात्। तन्मध्ये शरदिन्दुधवलां अन्तःशुषिरामूर्द्धस्थितचिकोणां णकारजां धर्म्मोदयां भावयेत्। तद्गगनकुहरान्तर्गतं यँकारपरिणतं धूम्राकारं कृष्णाभं वायुमण्डलं ध्वजाङ्कितम्, तदुपरि रँकारजं पीतं चिकोणरेफाङ्कितं अग्निमण्डलं तन्योपरि वँकारपरिणतं श्वेतवर्णं चक्राकारं आपोमण्डलं घण्टाङ्कितम्, तदुपरि लँकारजं

[1] A ०दिक्चंक्रमेण। [2] A ०मुद्रि०, Ba ०मेडि०।
[3] ANC निष्पाद०। [4] ANC तन्मध्य०।
[5] A ०कारं। [6] ANC पर्व्वप्रमा०।
[7] अन्तः० dropped in A. [8] Ba omits.
[9] Ba आप०, A अपा०। [10] ANC घटा०।

श्यामवर्णं चतुरस्रं पृथ्वीमण्डलं विश्ववज्राङ्कितम्, तत्रोपरि मुँकारपरिणतं महासुमेरुपर्व्वतराजं चतूरत्नमयं अष्टशृङ्गोपशोभितम्, तस्योपरि झटिति रक्तकमलं विश्वदलं यावदिच्छाविस्तरं तत्किञ्जल्के रविशशिमंपुटयोर्म्मध्ये हुँकारं हुँकारेणात्मानं विभावयेत् कायवाक्चित्तात्मकं कृष्णहुँकारम्। पुनः कृष्णहुँकारपरिणतं विश्ववज्रं विश्ववज्रपरिणामजं कूटागारम्—

चतुरस्रं चतुर्द्वारमष्टस्तम्भोपशोभितम्।
हारार्द्धहारसंयुक्तं वज्रस्रक्चैरलङ्कृतम्॥

तस्मिन मण्डलचक्रान्तर्गतं रविशशिमंपुटयोर्म्मध्ये धर्म्मोदये गगनकुहरान्तर्गतं कृष्णहुँकारं ध्यायात्। तत आकारेण सूर्य्यमण्डलं भावयेत् तदुपरि पीतहुँकारपरिणतं महावज्रधरं सितवर्णं ध्यायाद् एकवक्त्रं द्विभुजं त्रिनेत्रं वज्रघण्टाधरं ध्यानस्थमात्मानं तस्य हृदये कृष्णहुँकारं नानारश्मीन् निश्चार्य्य दशदिगनन्तपर्य्यन्तावस्थितान् तथागतान् बुद्धबोधिसत्त्वविद्यादेवत्यः क्रोधादीन् मञ्चोद्य पुनरागत्य तस्मिन्नेव सूर्य्ये प्रविशन्तं चिन्तयेत्। तमेव महावज्रधरं तानेव तथागतादीन् एकलोलीभूतं सूर्य्ये प्रविशन्तं पश्येत्। ज्वलद्भासुराकाराश्च योजनसहस्र व्यापिनं तदुपरि कृष्णहुँकारं नानारश्मिसंयुतं ततो हुँकाराद् रश्मिं निश्चरन्तं पश्येत्। पुनस्तत्रैव प्रवेश्य

A श्यामा०
A ल्कान
All MSS read धर्म्मोदयायां
ANC वज्रवज्र०
बुद्ध० dropped in N.
दिच्छाविस्ताङ्
Ba विश्व०
AC आकार०
N दशदिशा०।
AC ०धायिनं।

तदेवाक्षरं विकरालकृष्णं महावज्रं श्वेतकपालस्थं नानारश्मिविस्फुरन्तं ध्यायात् । बुद्धबोधिसत्त्वक्रोधविद्यादेवत्योगगनतलतिलकबिम्बमिव सूर्य्यावस्थिताश्चिन्तयेत् । तैर्बुद्धादिभिः सत्त्वान् परिपाच्य पुनरागत्य वज्रबिम्बं प्रविशन्तं पश्येत् । तदेव वज्रबिम्बं द्वादशमुखां महाकृष्णवर्णां चतुर्विंशतिभुजां चतुर्मारममाक्रान्तां श्वेतकपालोपरि प्रत्यालीढपदां महाप्रलयाग्निसमप्रभां विकृतास्यां हाहाकारां ललज्जिह्वां सर्पैः विकृतकोटिभीमभृकुटीतटोद्भूनेचचलद्दर्त्तुलां भयस्यापि भयङ्करीं कपालमाला शिरसि भूषितां व्याडैरलङ्कृतां पञ्चमुद्रोपेतां प्रथममुखं महाकृष्णं तथा दक्षिणमुखपञ्चकं सितपीतहरितरक्तधूम्रवर्णं च वाममुखपञ्चकं रक्तसितपीतहरितसितरक्तं च ऊर्द्धमुखं धूम्रं विकृतं क्रूरं सर्व्वमुखानि दंष्ट्राकरालवदनानि त्रिनेत्राणि ज्वलितोर्द्ध्वपिङ्गलकेशानि, सर्पैः सर्व्वलम्बोदरीं पीनोन्नतपयोधरां व्याघ्रचर्म्मनिवसनां दक्षिणद्वादशभुजेषु खड्ग-वज्र-चक्र-रत्नच्छटा-अङ्कुश-शर-शक्ति-मुद्गर-मुसल-कर्त्ति-डमरु-अष्टमालिकां च वामद्वादशभुजेषु धनुः-पाश-तर्ज्जनी-पताका-गदा-त्रिशूल-चषक-उत्पल-घण्टा-परशु-ब्रह्मशिरः-कपालं च—

सुप्रहृष्टां शवारूढां नागाष्टकविभूषिताम् ।
नवयौवनसम्पन्नां हाहाट्टहासभासुराम् ।
पिङ्गोग्रैकजटां ध्यायात् मौलावक्षोभ्यभूषिताम् ॥

Ba drops स्व॰
A तटोद्भव॰
A अर्द्ध॰
A ॰च्चा॰ ।
AC वलया॰ ।
AC वगमुखो॰ ।
A महाधूम्रं ।
AC ॰चक्र॰ ।

ॐ आः हुं कायवाक्चित्ताधिष्ठानं कुर्य्यात्। ॐ ह्रौं चौं हुं वायुवरुणमाहेन्द्राग्निमण्डलेषु बीजं यथोपदेशतः एवम्भूतं भगवत्यात्मको मन्त्री पुनर्गगनकुहरे ज्ञानचक्रमालोक्याग्रतः स्फुटीकृत्यावलीय स्वममयचक्रे प्रवेशयेत्। प्रवेश्य एकीकृत्य देवताहङ्कारमुद्वहमानः स्वकायविनिर्गतरश्मिममृतं तथागतबोधिमन्त्रविद्यादेवतीक्रोधादिभिः पञ्चामृतपरिपूर्णाकलशजलैरभिषिच्यमानं विविधपूजाविशेषैः सम्पूजयेत् आत्मानं भावयेत्। उष्णीषे हुं ललाटे ॐ कण्ठे आः हृदि ह्रीं नाभौ चौं नाभितले हुं गुह्ये चां पादयोः अं अः फट् स्वाहा इत्यङ्गन्यासः। एवं ममयी भूत्वानेन विधिना यान्येव मन्त्राक्षराण्युच्चार्य्यन्ते तानि देवतीमुखान्निर्गतानि मरश्मिकानि स्वमुखं प्रवेश्य कुलिशमार्गेण निश्चार्य्य देवीपद्मप्रविष्टानि पुनर्हेवीमुखात् स्वमुखमनेन क्रमेणाविच्छिन्नं मन्त्रमावर्त्तयेत्। एवमाखेदपर्य्यन्तं परिजप्य ततः स्वहृदये रश्मिपुञ्जाकारं क्रमेण दीपशिखेव यावदनुपलब्धिकं कुर्य्यात्। यथोक्तां उत्पलमुद्रां बद्ध्वा शिरसि ललाटकण्ठनाभिनाभितलगुह्यपादद्वयेषु विन्यस्य मन्त्रं जपेदनिमित्तयोगेन। तत्रायं मन्त्रः— ॐ ह्रौं चौं हुं फट् मूलमन्त्रः, ॐ ह्रौं चौं हुं हुं फट् स्वाहा हृदयमन्त्रः, ॐ ह्रौं चौं हुं उपहृदय-

C क्रौं।
N omits: A has त्र only.
[b] ABa ०चक्रेषु।
[c] ANC कलसेर०।
[d] AC समयभूतो।
[e] ANC ०र्देवतो०।
[f] A डौं।
[g] A वंनग०।
[h] A ०क्षत्याह०।
[i] A हं।
[j] AC विधिनान्ये च।
[k] AC खग्नि०।

मन्त्रः । एवं विचिन्त्य दृढीकृत्यात्मानं भावयेत् । अथवा पटगतां भगवतीं भावयेत् । पूर्ववत्सेवालक्षं जपेत् । दशांशेन होमं कुर्य्यात् । श्वेतफलपुष्पं पद्मं वा श्वेतार्कपुष्पं श्वेतकरवीरपुष्पं वा गव्यघृतेन होमं कुर्य्यात् । यथाविधिना पटं लिखापयित्वा पूजाध्यानजापं कुर्य्यात् । पञ्चानन्तर्य्यकारिणोऽपि कोटिजापेन सिध्यति । सर्व्वभावनिःस्वभावं कृत्वा झटिति हृदि कमलं कमलोपरि रविशशिमध्ये रक्तहुँकारं सूक्ष्मरूपं वालाग्रमहस्वभागं बिन्दुरूपं हुँकारान्वितं वज्रनलनामायां ध्यायात् । हुँकारोद्भवां वज्रयोगिनीं रक्तवर्णां द्विभुजैकमुखां त्रिनेत्रां नग्नां मुक्तकेशां ललितक्रोधां पद्ममुद्रोपेतां धर्म्मोदयान्तर्गतां शवाक्रान्तां अधऊर्द्ध्वपादस्थितां कर्त्रिकपात्रधरां सरोषां भावयेदहर्न्निशम् ।

॥ विद्युज्ज्वालाकरालीनामैकजटासाधनं समाप्तम् ॥

[1] AC दशात्मन ।
[2] A ०नाग्रां ।
[3] A ०म्फोटां ।
[4] AC ऊर्द्ध० ।
[5] N ०पत्रं ।
[6] ANC मुकुट० ।
[7] AC सर्व्वाक्रा० ।

124.

नम एकजटायै ।

तारा मारभयङ्करी सुरवरैः[1] सम्पूजिता सर्व्वदा
लोकानां हितकारिणी जयति मा मातेव या रक्षति ।
कारुण्येन समायुता बहुविधान् संसारभीरून् जनान्
चाची भक्तिमतां विभाति जगतां नित्यं भयध्वंसिनी ॥

एकजटोद्भवं सद्यः साधनं च भविष्यति ।
ज्ञानेन चाधुना तेन सर्व्वकर्म्म प्रसिध्यति ॥
आमित्यक्षरमुच्चार्य्य शून्यता क्रियते सदा ।
तदेवाक्षरमुच्चार्य्य विश्वपद्मस्य भावना ॥
विश्वपद्मस्य मध्ये तु टामि[2]त्यक्षरभावना ।
कपालं भाव्यते शुक्लं हुँकारं तस्य मध्यतः[3] ॥
नीलं चैतद्युक्तं[4] च नीलरश्मिसमन्वितम् ।
तत्परिणामयोगेन आत्मचित्तमयेन तु ॥
भाव्यते तत्क्षणाद् देवी नीलाञ्जनसमप्रभा ।
चतुर्भुजा त्रिनेत्रा च रक्तभीमसुलोचना ॥
व्याघ्रचर्म्मपरिधाना कपालाभरणोज्ज्वला ।
मौक्तिकेनैव हारेण शोभनेन विराजिता ॥
दिरष्टवर्षाकारा च पीनोन्नतपयोधरा ।
सुपिङ्गैकजटा देवी लम्बोदरसुशोभना ॥

---

[1] AC °सूरै ।
[2] A ज्ञाते० ।
[3] AC तामि० ।
[4] AC मध्ये तु ।
[5] AN °क्तञ्च, Ba °युक्तञ्च ।

ईषद्दंष्ट्राकरालास्या ललज्जिह्वा भयङ्करी ।
नीलमर्म्मैः सुघोरैश्च मण्डिता तीव्ररश्मिभिः ॥
केयूरनूपुराद्यैश्च किङ्किणीभिः प्रमण्डिता ।
वामहस्ते कपालं च दक्षिणे कर्त्रिशोभना ॥
उत्पलं चापरे हस्ते कलिकानाल संयुतम् ।
पुनर्दक्षिणहस्ते च खड्गं विभाव्य यत्नतः ॥
खड्गपरिणामयोगेनाक्षमाला च दृश्यते ।
आलीढस्थानरक्ता च कपालमध्यदेशतः ॥
प्रलयानलपुञ्जाभा रश्मिज्वालासमन्विता ।
ध्यानं यः कुरुते नित्यं देव्या भक्तिसमन्वितः ॥
जापं च कुरुते यो हि साधाक्षरचतुष्टयम् ।
तस्य वश्यं जगत् सर्व्वं यथा बुद्धेन देशितम् ॥
पुनः कपालमध्ये च साध्यं प्रयात्य यत्नतः ।
शिरः पादौ च सम्पीड्य पद्भ्यां स्थानेन तेन च ॥
निग्रहं क्रियते नूनं यदि ध्यानमयं मनः ।
मन्त्रश्च कथ्यते सम्यक् यथा देवीप्रबोधकः ॥
हान्तं हुताशनस्थं च चतुर्थस्वरभेदितम् ।
बिन्दुमस्तकसंभिन्नं खण्डेन्दुसहितं पुनः ॥
एतद् बीजं महद्बीजं द्वितीयं शृणु साम्प्रतम् ।
तान्तं वह्निसमायुक्तं पुनस्तेनैव भेदितम् ॥

[1] A केयूराद्यै० ।
[2] AC ०कानन० ।
[3] A ०नररक्ता च, NBa ०स्थानरक्ताच ।
[4] AC सार्व्वक्षर०, Ba साङ्क्षर० ।
[5] Ba वश्यं ।
[6] A पद्भ्या० ।
[7] AC एकबीजं ।
[8] A ग्रान्तं ।

नादबिन्दुसमायुक्तं द्वितीयं भवति स्थिरम् ।
तृतीयं तु पुनर्बीजं कथयामि प्रयत्नतः ॥
ह्रान्तं षष्ठस्वराक्रान्तं नादबिन्दुसमन्वितम् ।
एतद् बीजवरं श्रेष्ठं त्रैलोक्यदहनात्मकम् ॥
कथयामि चतुर्थं च यथा बुद्धेन भाषितम् ।
फ्रान्तं शुद्धं सुतेजाढ्यं सर्व्वसिद्धिप्रदायकम् ॥
शृणु अर्द्धाक्षरं सम्यक् मन्त्रनिष्पत्तिकारणम् ।
टान्तंविहीनं तु उच्चारेण तु रक्षणम् ॥
देव्या एकजटायास्तु मन्त्रराजो महाबलः ।
अस्य श्रवणमात्रेण निर्व्विघ्नो जायते नरः ॥
सौभाग्यं जायते नित्यं विलयं यान्ति शत्रवः ।
धर्म्मस्कन्धो भवेन्नित्यं बुद्धतुल्यो न संशयः ॥

॥ इदमेकजटायास्तु साधनं सुष्ठु समाप्तम् ॥

AC विस्तरं । ANC ग्रान्तषष्ठ० ।
A या कं । A नान्तमविच्छितानन्तु
NCBa ०चारणस्य तु लक्षणं । AC सद्धं, Ba सिद्धं ।

125.

नम एकजटायै

प्रथमं तावन्मन्त्री मनोऽनुकूले ध्यानालये सुखासनोपविष्टो गुरुबुद्धबोधिसत्त्वान् बाह्याध्यात्मपूजाभिः सम्पूज्य त्रिशरणगमनं पापदेशनादिकं विधाय दृढं बोधिचित्तमुत्पाद्य आमित्यक्षरमुच्चार्य्य सर्व्वधर्म्मशून्यतामामुखीकृत्य पुनः आँकाराक्षरमुच्चार्य्य तत्परिणतं विश्वपद्मं विभावयेत्। तन्मध्ये टाँकारजं पद्मभाजनं चन्द्रकान्तसमप्रभं तन्मध्ये स्फुरन्मयूखावभासितानन्तलोकधातुं इन्द्रनीलप्रभं हुँकारं विचिन्त्य तत्परिणतां इन्द्रनीलमहारत्नद्युतिव्याप्तजगत्त्रयां चतुर्भुजां महाभीमां रक्तभीमत्रिलोचनां व्याघ्रचर्म्माम्बरधरां पद्मभाण्डरत्नङ्कृतां नैरंग्रुकेन हारेण मण्डितां चण्डरूपिणीं दिरष्टवत्सराकारां पीनोन्नतपयोधरां आपिङ्गैकजटां क्रूर नागाभरणविभूषिताम्—

ईषद्दंष्ट्राकरालास्यां लम्बज्जिह्वां भयङ्करीम्।
लम्बोदरीं महाभैरवीकरुणाविष्टमानसाम्॥
हारनूपुरकेयूरकिङ्किणीमेखलादिभिः।
मण्डितां च हुँकारजितमारमहाचमूम्॥
वामपाणिधृताम्भोजभाजनं दक्षिणे करे।
प्रोल्लसन्मारमन्त्रा मिवज्रवत्कर्त्रिधारिणीम्॥
उत्पलं च पुनर्वामे मनालकलिकाकृतम्।
दक्षिणे तु करे खड्गं दृष्ट्वा तत्परिणामतः॥

A adds ध्यात्वा
B बाह्यपूजा०।
N टां०
A पलं समुखाव०।
AC ०भीमां त्रिलो०. N भीमत्रिलो०।
रक्तभीम० found only in Ba.
AC चन्द्र०।
AC ०जटाकुल०।
AC ०तन्त्वा०।

स्फुरत्तारावलोकान्तां[1] भावयेदक्षमालिकाम् ।
रक्तपूर्णकपालस्थ मध्य आलीढसंस्थिताम् ॥
प्रलयानलवद्वह्निमज्वालान्तर्वर्तिविग्रहाम् ।
ध्यायादेकजटां देवीं स्फुरन् मन्त्रं जपेत् ततः ॥
मन्त्रस्त्वचिन्त्यमामर्थ्यः साद्यक्षरचतुष्टयः[2] ।
जगत्क्षोभवशावेशः चामुण्डे[3] बुद्धभाषितः ॥
आलीढपद्मामाक्रम्य साध्यं मूर्ध्नि पदद्वये ।
पद्मभाण्डे विभार्य्यैवं[4] योगी मन्त्रं स्फुरन् जपेत् ॥
मन्त्रस्तु कथ्यते सिद्धैः[5] सम्यग् देवीप्रबोधकः ।
आद्यमग्नि[6] थारूढं हान्तमीश्वर भेदितम् ॥
उद्धरेदर्द्धचन्द्रार्द्धबिन्दुभूषितमस्तकम् ।
द्वितीयं तु तथा किन्तु तान्तरूपेण भेदयेत् ॥
हान्तमेव तृतीयं च षष्ठस्वर समन्वितम् ।
पूर्ववच्छौर्षशोभं च चतुर्थं स्यात् फडन्तकम्[7] ।
जपेन्मन्त्र मिमं मन्त्री ह्रौँ चौँ हुँ फडितीदृशम्[8] ॥

॥ आर्य्यैकजटासाधनं समाप्तम् ॥

---

[1] A ०त्तारावलोकान्तां ।
[2] A ०चिन्तमावेद्य ।
[3] A जगक्षो भवमावेशः
[4] Ba विभार्य्येयं ।
[5] AC सिद्धिः ।
[6] Ba ०वेदितं ।
[7] A तृतीयपद्म ।
[8] AC फडन्तकं
[9] A क्रौं ।
[10] AC स्तवं ।
[11] ACBa सार्द्धाक्ष० ।
[12] ANC ०क्षत्यर्द्ध० ।
[13] A म्यलं ।
[14] A ०मग्निमथा ।
[15] ANC ग्रान्त०
[16] AC ०सन्धितं ।
[17] Ba ०मविच्छिन्नं ।
[18] N ०वृद्धं ।

126.

पूर्व्वोक्तविधानेन शून्यताभावनानन्तरं विश्वपद्मोपरि टाँकार परिणतकपालमध्ये हुँकारं स्फुरणसंहरणपूर्व्वकं तत्परिणामेन भगवतीमेकजटां सर्व्वाङ्गकृष्णां चतुर्भुजैकमुखीमारक्तचिनयनां व्याघ्रचर्म्मवसनां कपालमालाशिरःपिङ्गोर्द्ध्वकेशां दंष्ट्राकराललल्लज्जिह्वां लम्बोदरीं नीलभुजगविचित्राभरणां द्विरष्टवर्षां पीनोन्नतपयोधरां हारकेयूरकिङ्किणीखड्गदामान्वितमितमकलावयवां दक्षिणभुजाभ्यां खड्गकर्त्रिधारिणीं वामभुजाभ्यां उत्पलकपालधारिणीमात्मानं झटिति निष्पाद्य मन्त्रं जपेत् ॐ ह्रीं [त्रीं] हुँ फट् ।

॥ इत्येकजटासाधनम् ॥

127.

ॐ आः हुं ॐ वज्रयोगिनि प्रतीच्छेमं बलिं ह्रीँ हुँ हहहह हं हः फट् मम शान्तिं कुरु स्वाहा, ॐ आः अरलि होः इत्यादीनुच्चारयेत् ।

अथातः संप्रवक्ष्यामि द्विभुजैकजटासाधनम् ।
पिङ्गोग्रैकजटां देवीं कर्त्रिकरोटधारिकाम् ॥

[1] A ता[का]ग्र० ।
[2] A नीलर्क्ष० ।
[3] A omits.
[4] AC ०हेः, N ०हेः ।
[5] N अरले, AC अरलि ।
[6] A होमि० ।
[7] ANC ०दिमुद्रा० ।

तथा चतुर्भुजां देवीं कल्पोक्तां च ब्रवीम्यहम् ।
शर शङ्खधरां सव्य वामे चापकरोटकाम् ॥

तथा चाष्टभुजायान्तु वक्ष्यामि क्रममंगतम् ।
मव्ये खड्गशरं वज्रं कर्त्तिकां च तथैव च ॥

चापोत्पलपरशुं च वामे करोटधारिकाम् ।
कृष्णवर्णा मताः सर्व्वा व्याघ्रचर्म्मावृताः कटौ ॥

एकवक्त्राः त्रिनेत्राश्च पिङ्गोर्द्ध्वकेशमूर्द्धजाः ॥
खर्व्वा लम्बादरा रौद्राः प्रत्यालीढपदस्थिताः ॥
सरोषकरालवक्त्रा मुण्डमालाप्रलम्बिताः ॥
कृष्णपक्षा महाभीमा मौलावक्षोभ्यभूषिताः ।
नवयौवनमम्पन्ना घोराट्टहासभास्वराः ॥

टाँकारबीजसम्भूताः सद्यः प्रत्ययकारिकाः ।
विश्वपद्मोपरि सूर्य्ये चिन्तनीयाः प्रयत्नतः ॥

ह्रौं चौं हुं फट् ।

निरंशुमालिकां ध्यात्वा खड्गस्थाने विचक्षणः ।
पूर्व्वोक्तं यथाक्रमेण मंजपेत् मन्त्रमुत्तमम् ॥

भावनाबलनिष्पन्नो भवेद् योगी महाकविः ।
लभते मञ्जुवाणीं तु लक्षमन्त्रस्य जापतः ॥

Ba खड्ग० ।
A ०धर
कटिं in all MSS.
AC ०बलान्विताः, N ०वलम्बिताः ।
A मदा ।
Ba omits निरंशु० ..... जापतः ।
ABa सव्ये, N मध्ये ।
AC चापशूल० ।
A सरोषाकार० ।
ANC चौं ।

तारायाः साधनं कृत्वा पुण्यमासादितं मया ।
तेनैव प्राणिनः सर्व्वे भवन्तु तारिणीसमाः ॥

॥ एकजटासाधनं समाप्तम् ।
। आर्य्यनागार्জ্জুনपादैः भोटेषु उद्धृतमिति ॥

128.

नमः शुक्लैकजटायै ।

पद्मावस्थितपद्मभाजनवरे हुंकारजाता मिता
माध्यालीढपदस्थिता गुरुकुचा संरक्तचक्षुर्द्वया ।
मत्पिङ्गैकजटा निरंशुमहिता सर्व्वेऽक्षमालाधरा
वामे नीलपयोजकोरकधरा देवी सदा पातु वः ॥
भीमाष्टनागमहिता करुणावशेन
पूर्णातिलोलरसना भयकारिहासा ।
चित्तेशशेभितशिरा मृगशचुचर्म्म-
वस्त्रा भवस्य च निहन्तु तमांसि तारा ॥
श्रीमद्वज्रस्य गुरोर्नत्वा पदाम्बुजम् ।
श्रीमल्ललितगुप्तेन तारासाधनमुच्यते ॥

ANC तेन प्राणिजनाः

This part of the Colophon is not to be found in ACBa.

This *Sādhana* is found only in B, *see* Fol. 82 ff.

MS वभस्य । MS °गुप्तेन ।

प्रथमं तावन्मन्त्री कृतमुखशौचादिकः सुविष्टरोपविष्टः सुरभिकुसुमनिकरावकीर्णे प्रदेशे विभवानुरूपतः पूजां विधाय स्वहृदये शुक्लवर्णं हुँकारं पश्येत्। हुँकारादात्मनो रोमविवरेण मुखादिद्वारेण पञ्चाकारान् रश्मीन् निश्चरतश्चिन्तयेत्। तैश्च रश्मिभिरनन्तापर्य्यन्तगङ्गानदीवालुकासमालोकधातवोऽवभासिताः। ततोऽकनिष्ठभुवनस्थिता भगवती वक्ष्यमाणवर्णादिसहिता कोऽपि सत्त्वो मामध्येषयति तमधिष्ठामि इत्युक्ता झटिति पुरतोऽवस्थिता चिन्तयितव्या पश्चात्। तत एवं हुंकारान्नानापुष्पधूपगन्धमाल्यादीनि निश्चार्य्य ततो मैत्रीकरुणामुदितोपेक्षापापदेशनापुण्यानुमोदनापुण्यपरिणामनाचिशरणगमनादिकं कुर्य्यात्। ॐ वज्रपुष्पे ॐ आः हुँ इत्यनेन मन्त्रितं पुष्पं एवं नामचिह्नितमन्त्रेण धूपादीन्यपि दद्यात्। तत आमित्यक्षरमुच्चारयेत्। आद्यनुत्पन्नाः सर्व्वधर्म्मा इत्युक्ता सर्व्वस्वभावशून्यं भावयेत्। मन्त्रमुच्चारयेत् ॐ स्वभावशुद्धाः सर्व्वधर्म्माः स्वभावशुद्धोऽहम्, ॐ शून्यताज्ञानवज्रस्वभावात्मकोऽहम्।

ततः प्रणिधिसामर्थ्यात् अँकारपरिणतं शुक्लवर्णं पद्मं तन्मध्ये टाँकारेण करोटकं चन्द्रकान्तिमणिप्रभं रुधिरपरिपूर्णं तच्च मध्ये हुँकारं पञ्चरश्मिकं पञ्चात्मकं सुन्दरं शुक्लं तत्परिणतां नीलोत्पलकलिकां हुँकाराधिष्ठितां पश्येत्। सर्व्वमेकत्र परिणम्यात्मानं भगवतीरूपं विभावयेत् शुक्लां द्विभुजामेकाननां दक्षिणे निरंशुकाक्षमालाधरां वामे नीलोत्पलकलिकां बिभ्रतीं अतिपिङ्गैकजटां व्याप्तब्रह्माण्डखण्डां क्रूरनागाभरणभूषिताम्; शिरोवेष्टनं

कर्कोटको नीलः, कण्ठा(वा)भरणं तक्षको रक्तः, नन्दोपनन्दौ कर्णकुण्डलौ पीतौ, ब्रह्मसूत्रं अनन्तो सितः, कटिसूत्रं वासुकी शुक्लः, दक्षिणभुजे वलयं कुलिकः पारावतवर्णः, इतरभुजे वलयं शङ्खपालो धवलः, नूपुरौ पद्ममहापद्मौ रक्तौ; हारनूपुरकेयूरकिङ्किणीमेखलादिमण्डितां शवोपरि प्रत्यालीढपदस्थितां अत्यन्तभीमरूपां ईषद्दंष्ट्रालसज्जिह्वां श्रीमदक्षोभ्यालङ्कृतमुकुटां महामैत्रीकरुणाविष्टमानसाम्। ततः स्वहृदये शुक्लहुँकारं तद्रश्म्याकृष्टज्ञानमण्डलं पश्येत्। पश्चात् जः हुं व होः इत्यनेन क्रमेणाकृष्य प्रवेश्य बद्धा तोषयेत्। ततो नीरक्षीरवत ज्ञानमत्त्वममरसं भावयेत्।

ततो भट्टारिकाहृदये कमलोपरि चन्द्रे ह्रौँकारं शुद्धस्फटिकसंकाशं रश्मिकोटिशतसहस्रं (रश्मीन्) निश्चरन्तं पश्येत्। भावनातः खिन्ना मन्त्रं जपेत्। पुनर्म्मन्त्रमहामामर्थ्यमण्डलं न द्रुतं न विलम्बितं नात्यष्टं न माचाहीनं मनसाभिलिखम्। तचायं मन्त्राद्धारः—मन्मथस्य चतुर्थं वह्निसंयुक्तं ईकारभेदितं अर्द्धेन्दुबिन्दुभूषितं इत्थं जपेत्। नाभिमध्ये अष्टदलकमलं तदुपरि चन्द्रे देदीप्यमानं ह्रौँकारं जिह्वोपरि अकारेण चन्द्रमण्डलं तदुपरि ह्रौँकारं पश्येत्। अक्षसूत्रगुलिकं च ह्रौँकारेण ग्रन्थिकाः नाश्राविच्छिन्नं मुखान्निःसृत्य नाभिमार्गेण प्रविशन्ति च स्वमुखान्निर्गच्छन्ति चिन्तयेत्। एकाक्षरोऽयं मन्त्रराजश्चिन्तामणिकल्पः पापव्याधिनाशनो विशेषेण जगदक्षोभ्यबुद्धभाषितं मन्त्रमावर्त्तयेत्। दृढमतिः एवं मन्त्रं जपेत्। लक्षजापेन महाकविर्भवति श्रुतिधरो वाग्मी च, वज्रवाणीं च लभते। महाधनो दीर्घायुः सर्व्व[शास्त्रवि]शारदो

गरुडेश्वर इव त्रिभुवनं निर्विषं करोति। शीघ्रं च बोधिमभिसम्बोत्स्यते नास्ति अत्र सन्देहः। ॐ आः ह्रीँ हुं हँ हः अयं मन्त्रराजो बुद्धत्वं ददाति किं पुनरन्याः सिद्धयः। ॐ आः ह्रीँ हुं घातय घातय सर्व्वदुष्टान् हुँ फट् स्वाहा इमं बलिं दद्यात् सर्व्वमारविनाशनम्।

॥ शुक्लैकजटासाधनं समाप्तम्।
। कृतिरियं ललितगुप्तपादानाम् ॥

129.

नमश्चुन्दायै

नत्वा सम्यग् जिनांस्तांश्च चुन्दा देवीं महर्द्धिकाम्।
तस्या आराधनं वक्ष्ये संक्षेपात् क्षिप्रसाधनम् ॥

प्रथमं तावन्मन्त्री स्वहृदौन्दुमध्ये बीजं तृतीयवर्गाद्यं प्रथमपञ्चमेन पूरितं अर्द्धेन्दुबिन्दुभूषितं शरच्चन्द्रांशुमालिनं सर्व्वबुद्धैरधिष्ठितं दिव्यं ततो रश्मिभिर्निष्पन्नां भगवतीं गुरुमंबुद्धादींश्च दृष्ट्वाऽभिवन्द्यानेन मन्त्रेण पूजयेत्। ॐ वज्रधूपे हुँ, ॐ वज्रपुष्पे हुँ, ॐ वज्रदीपे हुँ, ॐ वज्रगन्धे हुँ, ॐ वज्रनैवेद्ये हुँ। ततो—

[1] This *Namaskāra* is absent in N. A omits नमः .....पूरितं। चुन्दा is uniformly spelt as चुण्डा in Ba.
[2] N सर्व्वान् जि०, Ab सर्वान् जिनानां।
[3] NC चुन्दां। [4] Ba ०मध्यबीजं।
[5] A ०तिष्ठितं।

रत्नत्रयं मे शरणं सर्व्वं प्रतिदिशाम्यघम् ।
अनुमोदे जगत्पुण्यं बुद्धबोधौ दधे मनः ॥

इत्यादि पठेत् । ततः णिधिपूर्व्वकंप्र सर्व्वधर्म्मनैरात्म्यं भावयेदनेन मन्त्रेण ॐ शून्यताज्ञानवज्रस्वभावात्मकोऽहम् । ततो —

बीजं मायोपमाकारं चैधातुकमशेषतः ।

ॐ स्वभावशुद्धाः सर्व्वधर्म्माः स्वभावशुद्धोऽहम । ततः पूर्व्वोक्तबीजनिष्पन्नश्रीचुन्दा देवीरूपेणात्मानं भावयेत् शरच्चन्द्राभां चतुर्भुजां दक्षिणेन वरदां वामे पुस्तकाङ्कित-पद्मधरां करद्वये पाचधरां सर्व्वालङ्कारभूषितां पद्मचन्द्रा-मनस्थां भावयेत्, पश्चात मुद्रां बन्धयेत । हृदयकण्ठ-मूर्द्धसु रक्षां कृत्वा जपं कुर्य्यात । तत्रेयं मुद्रा, हस्तद्वयेन अञ्जलिं कृत्वा तर्ज्जनीद्वयं मध्यमामध्ये कुण्डलाकारेण लग्नं अङ्गुष्ठौ पार्श्वतः । इयं चुन्दाया मुद्रा, मन्त्रश्चायम्—
ॐ चले चुले चुन्दे स्वाहा ।

॥ चुन्दासाधनं समाप्तम् ॥

[1] AC ०मोद्य ।
[2] ANCBa तत्त्वमिधि० ।
[3] Ab adds विचिन्त्य ।
[4] ANC adds विचिन्त्य ।
[5] ANC ०न्ना० ।
[6] चुन्दा is differently spelt as चुन्द्रा, चून्द्रा, चुगद्रा in different MSS.
[7] ०रूपेण० found only in Ab.
[8] Ab मध्यकु० ।
[9] AC पद्मं ।
[10] चुले omitted in Ab only.

130.

प्रथमं हृदि चन्द्रे शुक्लचुँकारबीजं दृष्ट्वा तद्रश्मिभिर्बुद्धादीनभिपूज्य प्रणम्य संस्तुत्य च पापदेशनादिसप्तविधानुत्तरपूजानन्तरं त्रिशरणगाथां पठित्वा क्षमयित्वा चतुर्ब्रह्मविहारान् विभाव्य शून्यतां ध्यायात्। ततो विस्वदलपद्मचन्द्रे पुनः निजबीजं ध्यात्वा तत्परिणामेनार्य्यचुन्दां शरच्चन्द्राभासमेकमुखां[1] चतुर्भुजां वरददक्षिणभुजां पुस्तकाङ्कितपद्मवामभुजां पाचधारिशेषभुजद्वयां नानाभरणविभूषितां वज्रसत्त्वमुकुटां अनेकसत्त्वार्थकारिस्फुरद्विग्रहां आत्मानं झटिति निष्पाद्य निजबीजं च हृदि विचिन्त्य मुद्रां त्रिषु स्थानेषु न्यसेत्। हस्तद्वयेनाञ्जलिं कृत्वा तर्ज्जन्यार्मध्ये कुण्डलाकारेण लग्नमङ्गुष्ठद्वयं पार्श्वतो विदध्यात्। मन्त्रः ॐ चले चुले चुन्दे स्वाहा।

॥ इति चुन्दासाधनम् ॥

---

[1] A ०भासमेक०।
[2] A ०कृत०।
[3] C ०वङ्कुष्ठ०।

131.

नमश्चुन्दायै।

प्रथमं हृदीन्दुमध्यस्थ[1]चुँबीजविनिर्गतविचित्ररश्मिभिर्निष्पन्नान् गुरुबुद्धबोधिसत्त्वान् दृष्ट्वा पुरतः पूजादिकं कुर्य्यात् ॐ वज्रपुष्पे हुँ इत्यादिमन्त्रैः। ततः चित्तशरणगाथामुच्चारयेत्। तदनन्तरं शून्यतां विभाव्य ॐ शून्यताज्ञानवज्रस्वभावात्मकोऽहमित्युच्चारयेत्। ततश्चुँ[2] निष्पन्नां चुन्दां शरच्चन्द्रप्रभां चतुर्भुजां सर्व्वालङ्कारभूषितां दक्षिणे वरदां वामे पुस्तकपद्मधरां शेषभुजाभ्यां पात्रधरां पद्मचन्द्रे मत्त्वपर्य्यङ्कासीनां भावयेत्। पश्चान्मुद्रया हृदूर्णाकण्ठमूर्धसु[3] संस्पृश्य रक्षां कृत्वा जपं कुर्य्यात् ॐ चले चुले चुन्दे स्वाहा। तत्रेयं मुद्रा— हस्तद्वयेनाञ्जलिं कृत्वा तर्ज्जन्योर्मध्ययोर्मध्ये कुण्डलाकारेण लग्नावङ्गुष्ठौ पार्श्वतः स्थितौ।

॥ इति चुन्दासाधनम् ॥

[1] A चून्दोज॰, B चुंविनि॰
[2] AC पुनः।
[3] ANC तत्र चुँ॰।
[4] ACN ॰मूर्द्ध सुसं॰

132.

नमो [1]मारीच्यै ।

पूर्व्वोक्तविधिना पँकारजविश्वपद्मोपरि चन्द्रे सितमाँकारजां मारीचीं श्वेतां पञ्चमुखीं दशभुजां चतुश्चरणां झटित्यात्मानं चिन्तयेत्। तच्च प्रधानमुखं श्वेतं दक्षिणं कृष्णं वामं वाराहं रक्तं पश्चान्मुखं हरितं मस्तकोपरि मुखं पीतं नानारत्नविरचितचिशिखालङ्कृतजटामुकुटीं दक्षिणपञ्चभुजेषु सूर्य्यमण्डलवज्र[2]शरअङ्कुशस्रुचीहस्तां वामपञ्चभुजेषु चन्द्रमण्डलचापाशोकपल्लवमपाशतर्ज्जनीस्रुचहस्तां विविधालङ्कारधरां कुमारीं नवयौवनां मितकञ्चुकोत्तरीयां चैत्यगर्भस्थां मत्तशूकररथारूढां विष्णविन्द्रशङ्करब्रह्माक्रान्तचतुश्चरणाम्। तद्रथमध्यावस्थितमकरसमाक्रान्ताऽन्यतमा भगवती कृष्णा शूकरमुखी वज्रतर्ज्जनीधरदक्षिणवामकरा; दक्षिणदिशि अपरा भगवती रक्ता शूकरमुखी चतुर्भुजा अङ्कुशस्रुचीधरदक्षिणहस्तद्वया मपाशतर्ज्जनीस्रुचधरवामहस्तद्वया दिव्यालङ्कारधरा चेति; वामदिश्यपरा भट्टारिका रक्ता शूकरमुखी आकर्णपूरितचापशरा[3] वज्राशोकपल्लवधारि[4]शेषदक्षिणवामभुजा विचित्राभरणा चेति। रथवाहकशूकराणामध आदित्यादिनव[5]ग्रहा नानेत्युप[6]द्रवरोगसङ्कुलाश्च मनुष्यरूपेणाधःपतिताश्चिन्तनीयाः। ततो हृच्चन्द्रस्थितमाँबीज-

---

[1] मारीची is also spelt as मारिचि, मारिची and मारीचि
[2] Ba ०घातेन ।
[3] ANCBa ०रत्नचित्र० ।
[4] AB ०नीलवज्र० ।
[5] ०कमल० in A.
[6] B ०चापधरा० ।
[7] ०शेष० found in Ba only
[8] आदिनव० in A.
[9] A नान्यं त्युप०, N नानाम्त्युप०

रश्मिभिस्तथागतानानीयाभिषेकं गृहीत्वा वैरोचनमुद्रिता भवति। ततो हृद्बीजादेवाक्षस्रचाकारेण मन्त्राक्षराणि निश्चार्य्य मुखान्नाभौ नाभेर्मुखे मुखात् पुनरपि[1] नाभावित्यादिकचक्रभ्रमणक्रमेण मन्त्रमावर्त्तयेत्। तचायं मन्त्रः- ॐ मारीच्यै माँ हुँ हुँ फट् फट् स्वाहा। स्वबीजाधिष्ठितं च सर्व्वभोजनादिकमनुष्ठेयम्। खेदे[4] च शताक्षरमन्त्रमुच्चार्य्य यथासुखं विहरेदिति।

॥ कल्पोक्त[5] दशभुजसितमारीचीसाधनम् ॥

133.

नमो मारीच्यै।

अथ शून्यताभावनानन्तरं चन्द्रे पीतमाँभवाशोकस्तवकं तदुपरि माँ तत्परिणता पीता द्विभुजैकमुखी वैरोचनमनाथरत्नमुकुटिनी कनकनिभशुकरपृष्ठविश्वपद्मचन्द्रे मल्लीलमूर्द्धस्थिता अशोकवृक्षशाखावलम्बवामकरा वरददक्षिणकरा हारादिभूषिताङ्गी नवयौवनकाम्या चेति। इत्यमेनां ध्यात्वा हृदि माँ बीजस्फारित[7]रश्मिसनाथशूकरनिकरैर्दुष्टान् सम्मर्द्य मन्त्रार्थमनेकविधं च विधाय ॐ मारीच्यै[8] माँ स्वाहा इति मन्त्रं जपेत्[10]।

॥ इति अशोककान्तामारीच्याः[11] साधनम् ॥

[1] ANC मुखादनेनापि।
[2] One फट् is dropped in ANC.
[3] कल्पोक्तसित० in B.
[4] A ०स्फरित०, B ०स्फरित०।
[5] A मारिच्यै। [6] AC जपेत्।
[7] ANC ०भ्रमणमन्त्र०।
[8] A खेदेन।
[9] A सिबीज०।
[10] AC समर्च्य, N समर्प्य।
[11] Ba ०मारीचि०।

134.

नमो मारीच्यै ।

निरुत्तरसुखामङ्गप्रज्ञापारङ्गतान् गुरून् ।
प्रणम्य कल्प[2]मारीच्याः साधनं लिख्यतेऽधुना ॥

तत्रादौ तावद् योगी सकलजगदभ्युद्धरणाध्याशयः ॐ फडिति मन्त्रेण हृत्कण्ठोर्णामूर्द्धसु क्रोधमुष्टिं दत्त्वा ॐ मारीच्यै विघ्नान्[3]त्सारय हुँ फडित्यनेन च विघ्नान् विमर्द्य स्वहृदये आँकारपरिणतसूर्य्ये पीतमाँकारं ध्यात्वा तद्विनिर्गतरश्मिनिवहैराकाशे [4]मामाक्ष्य भगवतीमग्रतः स्थापयेत् गौरीं त्रिमुखां त्रिनेत्रामष्टभुजां रक्तदक्षिणमुखां नीलविकृतवामवाराहमुखां वज्राङ्कुशशरसूचीधारिदक्षिणचतुष्करां [5]अशोकपल्लवचापसूचतर्ज्जनीधरवामचतुष्करां वैरोचनमुकुटिनीं[6] नानाभरणवतीं चैत्यगर्भस्थितां रक्ताम्बरकञ्चुकोत्तरीयां मत्तश्रूकर[7]रथारूढां प्रत्यालीढपदां यँकारजवायुमण्डले हँकारजचन्द्रसूर्य्यग्राहिमहोग्रराहुममधिष्ठितरथमध्ये देवीचतुष्टयपरिवृताम्; तत्र[8] पूर्व्वदिशि वर्त्तालीं[9] रक्तां वराहमुखीं चतुर्भुजां सूच्यङ्कुशधारिदक्षिणहस्तां पाशाशोकधारिवामहस्तां रक्तकञ्चुकां चेति, तथा दक्षिणे वदालीं पीतां अशोकपल्लव[10] सूचीवाम-

[1] Ab निरन्तर० ।
[2] ANC कल्पं ।
[3] A फटिति० ।
[4] N मारीचि ।
[5] Ba ०नुच्चार्य ।
[6] A आका०, N तांका ।
[7] A ०कारग्रीव० ।
[8] A ०मन्वतः ।
[9] Ab सुवर्णगौरां ।
[10] ANCAbB ०मुकुटीं ।
[11] Ba ०रथाभि० ।
[12] A नेत्रं ।
[13] A वर्त्तारिं, Ab वेतालीं ।
[14] ०पल्लव० is found only in Ab.

दक्षिणभुजां वज्रपाशदक्षिणवामकरां कुमारीरूपिणीं नवयौवनालङ्कारवतीम्, तथा पश्चिमे वरालीं शुक्लां वज्रसूचीवद्दक्षिण[1]भुजां पाशाशोकधरवामकरां प्रत्यालीढपदां सुरूपिणीं चेति, तथोत्तरदिग्भागे वराहमुखीं रक्तां त्रिनयनां चतुर्भुजां वज्रशरवद्दक्षिण करां चापाशोकधरवामकरां दिव्यरूपिणीम्; ध्यात्वा पूजाप्रणामस्तुतिपापदेशनापुण्यानुमोदनापरिणामनायाचनाशिशरणगमनबोधिचित्तोत्पादमार्गाश्रयणादिकं कृत्वा चतुर्ब्रह्मविहारांश्च[2] भावयित्वा ॐ शून्यताज्ञानवज्रस्वभावात्मकोऽहमिति शून्यतासमाधिमालम्बयेत्।

ततः सूर्य्यमण्डले ॐकारजं वैरोचनं सिंहासनस्थं शुक्लं जटामुकुटधरं बोधअ्गौमुद्राधरं शान्तं सर्व्वालङ्कारभूषितं तस्य हृदि चन्द्रे पञ्चविंशत्यक्षरपरिवारमाँकारबीजपरिनिष्पन्नाशोकपल्लवं तदुपरि चन्द्रे माँबीजं ततस्सर्व्वपरिणामेन यथोक्तवर्णभुजादिलक्षणं मारीचीरूपमात्मानं झटिति ध्यात्वा ॐ मारीचै वर्त्तालि वदालि वराहि वराहमुखि आकर्षय जः स्वाहेत्यनेन वर्त्तालीं पूर्व्वस्यां दिशि न्यसेत्। तथा ॐ मारीचै वर्त्तालि वदालि वराहि वराहमुखि सर्व्वदुष्टप्रदुष्टानां मुखं बन्ध बन्ध हुँ स्वाहेत्यनेन[3] दक्षिणस्यां वदालीम्। तथा ॐ मारीचै वर्त्तालि वदालि वरा[4]हि वराहमुखि सर्व्वदुष्ट-

---

[1] ANC ०दक्षिणवाम०।
[2] प्रत्यालीढपदां..... वामकरां omitted in A.
[3] NCB ०शरदक्षिण०। [4] A ०विहारौ मुखं।
[5] AC बोधअ्गौ, N बोधयौ, Ba बोधं श्रौ।
[6] A मुखं, B मुखां। [7] Aa वेत्तालि, B वत्तालि।
[8] ANCB स्वाहेति। [9] A वरा०।

प्रदुष्टानां मुखं स्तम्भय वँ स्वाहेति पश्चिमायां वराहीम्। तथा ॐ मारीचे वर्त्तालि वदालि वरालि वराहमुखि सर्व्वसत्त्वान् वशमानय होः स्वाहेत्यनेन चोत्तरस्यां वराहमुखीं चेति। ॐ मारीचे माँ हुँ हुँ फट् फट् स्वाहेति भावनानन्तरं मन्त्रजापः। एवं मन्त्राचयमधिष्ठाय देवतायोगेन विहर्त्तव्यमिति।

॥ कल्पोक्तमारीचीसाधनं समाप्तम् ॥

135.

नमो मारीचै

प्रथमं तावत् स्वहृदि चन्द्रे शुक्लमाँकाररश्मिसमाकृष्टां भगवतीं नानोपहारैरभिपूज्य पापदेशनादिकं च कृत्वा चतुर्ब्रह्मविहारान् भावयेत्। ॐ शून्यताज्ञानवज्रस्वभावात्मकोऽहमित्युच्चार्य्य पँकारजविश्वपद्मोपरि चन्द्रमण्डले पुनरपि सितमाँकारपरिणतां मारीचीं कुन्देन्दुसन्निभां पञ्चमुखीं दशभुजां चतुश्चरणां झटित्यात्मानं चिन्तयेत्। तत्र प्रधानमुखं शरीरवर्णं दक्षिणमुखं कृष्णां वाममुखं वाराहं रक्तं पश्चान्मुखं हरितं मस्तकोपरि मुखं पीतं नानारत्नविचित्रचिश्रिखजटामुकुटिनीं दक्षिणपञ्चभुजेषु सूर्य्यमण्डलनीलवज्रशराङ्कुशसूचिहस्तां वामपञ्चभुजेषु चन्द्रमण्डलचापाशोकपल्लवसपाशतर्ज्जनीसूच-

---

NCAb °दुष्टानां। A omits सर्व्वदुष्टा°.....वराहमुखि।
Ab omit.
Ab omit.
A नानोपहारैरभि°
A हरितचक्रं।
AN °मण्डलवज्र°।
AC °तर्ज्जनीसूक्तां।

हस्तां विविधरत्नविरचितकुण्डलकेयूरचूडाकिङ्किणी वस्त्राभूषितशरीरां नवयौवनां सितकञ्चुकोत्तरीयां चैत्यगर्भस्थां मत्तशूकररथारूढां विष्णविन्द्रशङ्करब्रह्माक्रान्तचतुश्चरणाम्। तस्याश्च रथमध्ये स्थितमकरसमाक्रान्ता ऽन्यतमा भगवती सा च कृष्णा शूकरमुखी वज्रतर्ज्जनीदक्षिणवामभुजा, दक्षिणदिशि अपरा भगवती सा च रक्ता शूकरमुखी चतुर्भुजा अङ्कुशसूचिदक्षिणद्वयहस्ता सपाशतर्ज्जनीसूचवामद्वयहस्ता दिव्यालङ्कारभूषिता चेति, वामदिश्यपरा भट्टारिका सापि च रक्तवर्णा शूकरमुखी आकर्णपूरितचापशरवज्राशोकपल्लवदक्षिणवामभुजा विचित्रवस्त्राभरणा चेति, रथवाहकशूकराणामध आदित्यादिनवग्रहा नानामृत्युपद्रवरोगसङ्कुलाश्च पतिता मनुष्यरूपेण सन्ति। एवंरूपां भगवतीं ध्यात्वा हृच्चन्द्रे माँकारविनिर्गतरश्मिभिस्तथागतानानीयाभिषेकं गृहीत्वा शिरसि वैरोचनेनाङ्कयेत्। ततो हृदीजादेवाक्षसूचाकारेण मन्त्राक्षरान्निश्चार्य्य मुखान्नाभौ नाभेर्मुखे मुखात् पुनरपि नाभावित्यादिकचक्रभ्रमणक्रमेण मन्त्रमावर्त्तयन् त्रिकोटितथतां मनसि कुर्य्यादिति। तचायं मन्त्रः— ॐ मारीच्यै माँ हुँ फट् स्वाहा। स्वबीजाधिष्ठितं च सर्व्वं भोजनादिकमनुष्ठेयम्। खेदे च शताक्षरमन्त्रमुच्चार्य्य यथासुखं विहरेदिति।

॥ कल्पोक्तविधिना सितमारीचीसाधनं समाप्तम् ॥

A ०केयूरकाञ्चित०। AC स्थितकमले सर्व्वाक्रान्ता०।
A वामदिग्ये भट्टा०। [a] A ०चित्राभ०।
[b] AN omit. [c] A omits ०क्रमेण०।

136.

नमो मारीच्यै ।

ॐ आः ह्रीँ स्वाहा इति शिरोललाटकण्ठहृदयजानुहृयेषु आत्मनो विभाव्य ॐकारात् सर्व्वं पूर्व्ववत् शुद्धिपाठपर्यन्तं विधिं विधाय ॐकारेण निष्पन्नां च वज्रधात्वीश्वरीं मारीचीं द्वादशभुजां रक्तां षण्मुखीं लम्बोदरां ज्वलत्पिङ्गलोर्द्ध्वकेशां कपालमालिनीं सर्पमण्डितमेखलां व्याघ्रचर्म्माम्बरधरां चरणयुगनिपतितानेकविघ्नसन्ततिं चैत्यगर्भसूर्य्यमण्डले प्रत्यालीढस्थितां वैरोचनसनाथां नानावराहाक्रष्यमाणरथां रक्तकृष्णहरितपीतसितप्रथमादिपञ्चमुखीं ऊर्द्धकृष्णवराहैकमुखीं दक्षिणे खड्गमुषलशरअङ्कुशएणकखट्वाङ्गचिकवज्रपरशून् वामे सपाशतर्ज्जनीकपालअशोकपल्लवब्रह्मशिरश्चापचिशूलानि धारयन्तीं चिनेत्रां ललज्जिह्वां करालवदनामतिभयानकाकारां चिन्तयेत्। रथमध्ये द्विभुजां तर्ज्जनीअशोकपल्लवहस्तां रथवाहिकां प्रत्यालीढासनां भीषणां चिन्तयेत्। स्फुरणादिकपूर्व्वकं स्तम्भयन् मोहयन् घातयन् दुष्टसत्त्वान् ॐ वज्रधात्वीश्वरि सर्व्वदुष्टसत्त्वान् हन हन दह दह पच पच ॐ मारीच्यै हुँ फट् स्वाहेति मन्त्रं जपेत्।

॥ वज्रधात्वीश्वरीमारीची साधनम् ॥

[1] B क्रो, Ab क्रीः।
[2] A पाठयन्तं।
[3] ANC ज्वलित्पिङ्गो, B ज्वलित्पिङ्गो।
[4] Ab समय०।
[5] Ab ०म्बरां।
[6] Ab रक्तहरितकृष्ण०
[7] B ०कायां।
[8] A मोहयेत्। B omits.
[9] ANC हर हर।
[10] ANCAb ॐ ह्रुं।
[11] B रक्तमारीचिसाधनं. A ०मारीच्याः साधनं. Ab मारीचीसाधनं।

137.

प्रथमं तावन्मन्त्री सुखासनोपविष्टो वामक्रोधमुष्टिना हृदूर्णाकण्ठमूर्द्धसु[1] ॐ फट् इति मन्त्रेण संस्पृश्य दक्षिण-क्रोधमुष्टिमुन्नाम्य निर्विघ्नं चिन्तयेत्। ततो मुखशौचादिकं कृत्वा पुनरुपविश्य स्वहृदये रात्रिदिनभेदेन[2] अकारा-कारनिष्पन्नौ शशिसूर्य्यौ[3] दृष्ट्वा तदुपरि पीतं ॐकारं विभाव्य तद्रश्मिनिष्पन्नां भगवतीमग्रतो दृष्ट्वा यथालब्ध-पुष्पादिभिः सम्पूज्य तदग्रतः पापदेशनादिकं कृत्वा सकलं शून्यं विभावयेत्। तत ॐ स्वभावशुद्धाः सर्व्वधर्म्माः स्वभावशुद्धोऽहमित्युच्चार्य्य तदाँकारपरिणतमष्टारचक्रं तन्मध्यस्थितमोँकारं परिणम्यात्मा[4]नं वैरोचनरूपं पीतवर्णं जटामुकुटधरं रक्ताम्बरं[5] शान्तं पद्मगर्भसिंहासने वज्र-पर्य्यङ्कस्थं सर्व्वाभरणभूषितं बोध्यङ्गी[6]बद्धमुद्रकं ध्यायात्। तस्य हृदये चन्द्रस्थमाँकारपरिणतं अशोकपुष्पं तदुपरि माँकारं तद्रश्मीन् निश्चार्य्य सकलमन्त्रार्थं कृत्वा तत्रैवा[7]नीय प्रवेशयेत्। ततोऽग्रत आकारपरिणतं सूर्य्यमण्डले माँका-रजां भगवतीमष्टभुजां रश्मिमयीमुपदेशतो[8] ध्यायात्। तदनन्तरं ॐ मामिति मन्त्र[9]मुच्चारयन्नात्मानं चैत्यगर्भस्थां सप्तशूकररथारूढां मारीचीं विभावयेत्। रथस्याधस्ताद् यँकारजवायुमण्डले हूँकारनिर्म्मितो राहुः। तत्र भगवतीं

[1] A ०क्रोड० [2] Ab ०मूर्द्धसु।
[3] AB ०न्दिवस्य भेदेन, NC ०न्दिवभेदेन। [4] A शरीरस्थं।
[5] Ab ०वातमात्मा०। [6] NC ०म्बरधरं।
[7] A ०बायौ०, NC बोध्ययो०। [8] ANCAb तत्रैवा०।
[9] Ab ०कारबीजं। [10] A देशतौ, NC देशतो०।
[11] ANC ०मुच्चार्य्य मा०, Ab ०मुच्चारयेत्।

रत्नमुकुटां अष्टभुजां त्रिनेत्रां त्रिमुखां सुपीतां मूलमुखं पीतं बन्धूकजवाकुसुमसदृशाधरं दक्षिणं रक्तं वर्त्तुलं वामं वाराहं [1]सरोषं नीलं ललज्जिह्वं विकृत[2]वदनं भीषणं भृकुटीकरालं वामे तर्ज्जनिकापाशं धनुरशोकपल्लवं स्रुचं च दक्षिणे स्रुच्यङ्कुशौ शरं वज्रं च नानावलयादिसर्व्वाभरणभूषितां विचित्ररक्तकञ्चुकोत्तरीयां प्रत्यालीढस्थां चतुर्हस्तां[3] परिवृतां चिन्तयेत्। पूर्व्वतो वर्त्तालीं [4]आलीढस्थितां चतुर्भुजां वराहैकमुखीं रक्तां दक्षिणे स्रुच्यङ्कुशधरां वामे पाशपल्लवौ, दक्षिणे वदालीं प्रत्यालीढस्थितां चतुर्भुजां वराहैकमुखीं पीतवर्णां दक्षिणे सपुष्पाशोकपल्लवसस्रुचं स्रुचीधरां वामे पाशवज्रधराम्, पश्चिमे[10] वरालीं आलीढस्थां चतुर्भुजां [11]पीतवर्णां वराहैकमुखीं दक्षिणे वज्रस्रुचीधरां वामे पाशाशोकपल्लवधराम्, तथैवोत्तरे वराहमुखीं रक्तां उदितादित्यवर्णोज्ज्वलां प्रत्यालीढस्थितां चतुर्भुजां दक्षिणे शरवज्रधरां वामे चापाशोकपल्लवधराम्। सर्व्वा एताश्चैत्यकूटागारस्था नाना[12]लङ्काररत्नमुकुटरक्तकञ्चुकोत्तरीयास्त्रिनेत्रा[13] विचित्राभरणा ध्येयाः[14]। ततो ॐ हुँ वँ होः ज्ञानसत्त्वप्रवेशे[15] मुद्रां बन्धयेत्।

---

[1] A सर्व्व।
B वामे।
[2] Ab वेतालीं।
[3] A सर्व्वा।
[4] ANAb ०स्रुच।
[10] N omits.
[11] A ०त्तरीयास्त्रियाः।
[12] Ab ०प्रवेशः।
[13] A कृत०।
[14] ANCB ०हवौ०।
[15] C प्रत्यालोढ०, Ab ०लोढस्थां।
[16] A ०यवौ।
[17] A omits पश्चिमे...पल्लवधरां।
[18] A नागारत्ना०।
[19] A श्वेताः।

उभौ हस्तौ समौ कृत्वा अञ्जल्याकारमिश्रितौ[1] ।
कुर्य्याद् विकसितावग्रा वुभावङ्गुष्ठनामितौ ॥
मध्यमाङ्गुलिसमाश्लिष्टौ कुण्डला[2]कारचिह्नितौ ।
पर्य्यङ्केणोपविष्टेन[3] नाभिदेशे तदा[4] न्यसेत् ॥

ततो भावनापूर्व्वङ्क्रमं मन्त्रं जपेत् ॐ[5] मारीच्यै स्वाहा । न्यूनाधिकं विधिं[6] शताक्षरमन्त्रेण पूरयेत् ॐ वज्रसत्त्वेत्यादि । विसर्ज्जनकाले तु ॐ मारी[10]च्यै मुरिति स्वमुद्रां मुञ्चेदिति[11] ।

॥ अष्टभुजपीत[12] मारीचीसाधनम् ॥

138.

ओड्डियानमारीचीसाधनं भवति । प्रथमं तावत् मन्त्री[13] स्वहृदि आकारपरिणतं सूर्य्यमण्डलं तस्योपरि प्रथमस्य त्रयोदशं बीजमर्द्धेन्दुबिन्दुभूषितं तथैव सर्व्वं पाप-देशनादिकं कृत्वा तेनैव निष्पन्नं माँकारं तत्सर्व्वपरिणतां मारीचीं रक्तवर्णां षण्मुखां द्वादशभुजां प्रथममुखं रक्तं द्वितीयं कृष्णं तृतीयं श्यामं चतुर्थं पीतं पञ्चमं सितं

[1] AC ०मञ्जितौ ।
[2] A ०सितागौड० ।
[3] A अधमा० ।
[4] A ०वर्त्तुला० ।
[5] A ०विद्धा च । [6] B तथा ।
[7] A ०तमं, B ०क्रमो ।
[8] This *Mantra* is omitted in Ab.
[9] N ०क्रविधिं ।
[10] A ०चि ।
[11] N मुदिति ।
[12] Ab संक्षिप्त० ।
[13] ANC omit मन्त्री ।

शिरःस्थितं तदूर्द्धं वाराहकृष्णं षष्ठमुखम्, अशोकचैत्या-
लङ्कृतां पीतवैरोचननाथां लम्बोदरीं कपालमाला-
विभूषितां ऊर्द्ध्वपिङ्गलकेशां व्याडैर्विभूषितां व्याघ्रचर्म्म-
निवसनां प्रत्यालीढस्थितां शूकराक्रान्तविघ्नां दक्षिणकरै-
र्खड्गं वज्रं मुषलं शरं एकसूचिकवज्रं परशुं वामे तर्ज्ज-
निकापाशं कपालं अशोकपल्लवं ब्रह्मशिरश्चापं त्रिशूलं
त्रिनेत्रां रक्तवर्त्तुलां दंष्ट्राकरालवदनां रथमध्ये स्थितां
अपरां देवीं द्विभुजां तर्ज्जनिकापाशपल्लवसहितां भावयेद्
अहमेव भगवती। ततो मुद्रां बन्धयेत्।

वज्राञ्जलिं समाधाय मध्यमेऽथ निकुञ्चनात्।
अङ्गुष्ठहृदयपर्य्यङ्ककुञ्चिताग्राग्र विग्रहाम्॥

मन्त्रः— ॐ मारीच्यै ॐ माँ हुँ हुँ फट् फट् स्वाहा।

॥ द्वादशभुजरक्तवर्णवाराहीयानमारीचीसाधनं समाप्तम्॥

A ०व्यादेवी०।

Ba omits शूकरा०.....०करालवदनां। B शूद्ध।

All MSS read either ०शूक० or ०सूक०, which ought to stand for ०सूचिक०।

Ab ०शिरं। A दग्धा०।

After this N reads केशालं। अशोकपल्लवं। ब्रह्मशिरः। चापं त्रिशूलपल्लवसहितां। Ab ०तीति।

ANC ०मोऽथ, Ba ०माथे। A ०ताथ०।

Ab and B read वोडियानमारीचीसाधनं only.

139.

पूर्व्वोक्तविधानेन पापदेशनानन्तरं शून्यतां विभाव्य विश्वपद्मसूर्य्ये रक्तमाँ[1]कारबीजपरिणतां ओड्डियानमारीचीं रक्तवर्णां षण्मुखीं द्वादशभुजां प्रतिमुखं त्रिनेत्रां रक्तकृष्ण-शुक्लहरितपीतदक्षिणावर्त्तपञ्चमुखां ऊर्द्ध्वकृष्णशूकरमुखां प्रथमषड्दक्षिणभुजेषु यथाक्रमं खड्गचक्रमुपलशरपरशुएक-सूचिकवज्राणि वामभुजेषु तर्ज्जनीपाशखट्वाङ्गकपाल-अशोकपल्लवब्रह्मशिरआपत्रिशूलानि चैत्यगर्भस्था[2]मष्ट-नागेन्द्रभूषणशरीरामूर्द्ध्वपिङ्गलकेशां दंष्ट्राकरालवदनां शुष्कपञ्चमुण्डमालामौलिकां विगलन्मुण्डमालाप्रल-म्बितकन्धरां अनेकरत्नविरचितरथाधोविचित्र[3]मत्त-शूकरारूढां बहिरष्टश्मशानपरिवृतां रथमध्यस्थितां पर्य्यङ्कनिषण्णां वज्रसूचिअशोकतर्ज्जनीधारिणीं(रीं) रक्त-वर्णमारीचीं पीतकञ्चुकां नानारत्नाभरणां व्याघ्रचर्म्म-वसन[4]भूषितां रक्तप्रभां स्फुरत्पञ्चतथागतां झटिति ध्यात्वा तद्धृदयसूर्य्ये माँबीजविनिःसृतरश्मिशतसमानीतैर्बुद्धबोधि-मत्त्वैरभिषेकं गृहीत्वा वैरोचनमुकुटिनीमात्मानं चिन्त-येत्। ततो निजबीजप्रसाधितयथालब्ध[5]समयद्रव्यसेवा-

---

[1] AC ०मा० ।
[2] N ०सूचिक० ; others read ०सूक० ।
[3] AC ०गभा० ।
[4] ABC सुक्ल० ।
[5] A वकुल० ।
[6] AC ०कन्दरां ।
[7] A अकरे ।
[8] A रथो०, B रथाबोधि० ।
[9] N चित्र० ।
[10] ANA ०रथाकुटं ।
[11] AC ०रक्त० ।
[12] A पीतं कक्षं ।
[13] AC ०निवसनां ।
[14] A ०लय, i.e., ०र्च० ।

पूर्व्वकं मन्त्री तद्बीजाच्च विनिर्गताक्षसूचमालाकारेण हृदयान्निर्गत्य[1] नाभौ नाभेः[2] पुनः हृदय इत्यनेन[3] चक्रभ्रमणयोगेन मन्त्रं जपेत् ॐ मारीच्यै माँ हुँ हुँ फट् फट् स्वाहा। उत्तरकाल[4]समाध्युप[5]संहारे [6]जप्त्वा तद्योगेनैव यथासुखं विहरेदिति।

॥ आडियान[7]मारीचीसाधनम् ॥

140.

आदौ हृदि सूर्य्यासने हुँकारकिरणैरानीय भगवतीमनेकविधपूजाभिः सम्पूज्य पापदेशनादिकं कृत्वा शून्यताभावनानन्तरं विश्ववज्राकारं चेतः संचिन्त्य तत्परिणामेन वज्रभूमिं वज्रप्राकारादिकं ध्यात्वा तन्मध्ये श्रीआडियानपीठं[10] त्रिकोणमारक्तं तन्मध्ये सूर्य्यस्थपञ्चसूचिकवज्रं ॐकाराधिष्ठितवरटकं तत्परिणामेन बोधिचित्तरूपां महाप्रलयानलविस्फुलिङ्गदुर्द्धर्षामट्टाट्ट[11]हासां समाक्रान्तचतुर्मारां[12] प्रत्यालीढपदां द्वादशभुजां घणमुखीं

[1] A ॰यनिर्ग॰। [2] A omits.
AC ॰दिनेन। [4] A ॰कारं।
[5] AC समाधाय। [6] A omits जप्त्वा.....विहरे॰
[7] Instead of आडियान A reads रक्तवर्णद्वादशभुजा॰।
[9] A ॰तानन्त॰। [10] A चिर्भवतः।
[10] A ॰आडियानं पीतं, B ॰आडि॰।
[11] A ॰मत्ताट्टाट्ट॰, B ॰मट्टट्ट॰। [12] ANC ॰मारां।

चिनेचां रक्तवर्णां प्रथमदक्षिणषड्भुजेषु [1]खड्गविश्व-
वज्रएक[2]सूचिकवज्रपरशुशरमुषलान् दधा[3]नां वाम-
भुजेषु मतर्ज्जनीपाशिका[4]चिशूलअशोकपल्लवचापपाश-
ब्रह्मशिरोधारिणीं नरशिरोमालाप्रलम्बित[5]सर्व्वाङ्गावयव-
शोभां व्याघ्रचर्म्मोत्तरीयवाममं मूलमुखं रक्तं सितकृष्णं
वाममुखद्वयं पीतकृष्णं दक्षिणमुखद्वयं कृष्णोर्द्ध्ववाराह-
मुखं ललज्जिह्वामूर्द्ध्वज्वलितपिङ्गलकेशां वैरोचनमुकुटिनीं
भुजगाष्टा[6]भरणभूषितां निर्जाकिरणैः सर्व्वतो मारविध्वं-
सिनीं दशदिक्षु[7]लायमान[8]डाकिनीभूतवेताड[9]फेत्का र-
हाहारव[10]भीषणपरिवेष्टितश्मशानाष्टकमण्डितां श्रीमदो-
ड्डि[11]यानमारीचीमात्मानं झटिति निष्पाद्य शिरःकण्ठ-
हृदयेषु ॐ आः हुँ सर्व्वाङ्गेषु फँकारं चिन्तयेत्। ततो
नाभेरुपरि विश्वकमले [12]चन्द्रसूर्य्यसम्पुटमध्ये हुँकारात्
मृणालतन्तु[13]स्वभावं विश्ववर्णमक्षरं चिन्तयेत्। ॐ वज्र-
मत्तेश्वरि[14] सर्व्वदुष्टान् [15]हन हन दह दह पच पच ॐ
मारीचे मां हुँ हुँ [16]फट् स्वाहा हृदयमन्त्रः। ॐ आः हुँ
भावनामन्त्रः। ॐ वज्रवेतालि [17]हुँ फट् जापमन्त्रः। ॐ

[1] B reads ०खट्टाङ्ग०।
[2] N omits ०सूचिक०; other MSS read ०सूक०।
[3] B ०लदधा०। [4] AB ०लौपिका०।
[5] AC ०लालम्बित०। [6] B ०वराह०।
[7] A ०जनस्था०, NC ०जगास्था०।
[8] AC ०दिग्नि य०। [9] A ०लापमान०।
[10] AC ०ताल०। [11] AC हत्का०।
[12] Ba ०कार०। [13] AC ०मन्त्रोभि०, N ०मन्नोभि०।
[14] N omits चन्द्र०। [15] B ०वर्ण०।
[16] B ०श्वरी। [17] A हर हर।
[18] Ba फट् फट। [19] A ०वेतारि, B ०वेतालो।

मारीचि ॐ माँ हुँ हुँ फट् द्वितीयजापमन्त्रः। तदनु चतुःसन्ध्यासु बलिमन्त्रः ॐ [1]अलक्ष्मि होः जः हुँ वँ होः ॐ वज्रडाकिनि समयस्त्वं दृश्यहोः ख ख खाहि खाहि सर्व्व-यक्षराक्षसभूतप्रेतपिशाचोन्मादा[2]पस्मारडाक[3]डाकिन्यादय इमं बलिं गृह्णथ पिबथ जिघ्रथ[4] मातिक्रमथ महासुख-विहृ[5]ह्ये मम सहाय[6]का भवथ[7] हुँ हुँ फट् फट्[8] स्वाहा। भोजनादिकं च होःकारेण हुँकारादिना वा[9] संशोध्या-चरेदिति।

॥ द्वादशभुजरक्तवर्णत्रैडियानस्वाधिष्ठान-क्रम[10] मारीचीसाधनम् ॥

[1] A चन्द्र०।
[2] A आचण्डिखि, B ०आरक्षि, N आरक्षि, C अरक्षि। The *Mantra* given in Ba is here upheld.
[3] A ०त्पादो।
[4] ०डाक० is found only in Ba.
[5] Ba इदं।
[6] जिघ्रथ found only in Ba.
[7] ANCBa प्रहृ०।
[8] A सर्व्वका।
[9] Ba भवन्तु।
[10] The second फट् is omitted in B.
[11] ANBa च।
[12] B omits द्वादशभुजरक्तवर्ण०।
[13] A ०कुक्षम०।

141.

स्वहृदि विश्वपद्मे चन्द्रोपरि पीतमाँकारं विन्यस्य तथैव सर्व्वं प्रतिभासमात्रमात्मानं चाकलय्य ॐ स्वभावशुद्धाः सर्व्वधर्म्माः स्वभावशुद्धोऽहमिति पठेत्। ततस्तन्माँकारेण परिणतमशोकस्तवकं पुनर्म्माँकारं तत् सर्व्वं परिणमय्य भगवतीं[1] पीतवर्णां द्विभुजां एकमुखां वैरोचनोपशोभित-शिरोभागां रत्नमुकुटिनीं देदीप्यमानां कनकवर्णां शूकररूपां विश्वपद्मचन्द्रे लीलया स्थितां नवयौवनोद्गतां ऊर्द्ध्वस्थितां वामकरेणाशोकदक्षशाखाविलग्नां दक्षिणेन वरदां हारादिविभूषिताङ्गीं[2] श्वेतवस्त्रनिवसनां स्वहृदि माँकारादनेकशूकराकाररश्मिस्फुरणेन दुष्टान् निवार-यन्तीं[3] विचिन्तयेत्। ॐ मारीच्यै स्वाहा। ततो यथावद् विमर्ज्य यथासुखं विहरेद् इति। देशान्तरगमने तु अनेन मन्त्रेणात्मीयोत्तरीयाञ्चलं गृहीत्वा सप्त वारान् परिजप्य सहायस्य[4] च वस्त्रान् गृहीत्वा यथावद् ग्रन्थिं कृत्वा गच्छेत्। चौरादिभिर्न मुष्यते[5]। प्राप्ते अभिमते देशे ग्रन्थिं मोचयेदित्युपदेशः। यथावद् ग्रन्थिं कृत्वा सप्त वारानभिमन्त्रितमुत्तरीयाञ्चलं कृत्वा दिशो दश व्यवलोक्य दुष्टानां मुखचक्षुर्बन्धं करोमि इति विचिन्त्य स्वामं निवार्य्य अन्तर्ज्जल्पाकारेण मन्त्रमुच्चारयन् ग्रन्थिं बध्नीयादिति।

॥ अशोककान्तामारीच्याः साधनं समाप्तम् ॥

[1] A ०भागोज्ज्वां।
[2] AC ०वसनवतां।
[3] A विचार०।
[4] A पुष्प०।
[5] A देवय्०।
[6] N ०विव०।
[7] A सदा सप्त
[8] A वेत्यु०।

142.

सम्यक् प्रणम्य मारीचीं वैरोचनकुलोद्भवाम् ।
कल्पोक्तविधिना तस्याः कथ्यते साधनक्रमः ॥

तच तावत् श्रीमारीचुद्यमण्डलाभिषिक्तो मन्त्री स्वमन्त्रसंवरपरिपालनशुद्धचित्तः सकलसत्त्वाभ्युद्धरणाशय ॐ फट् इत्युच्चारयन् क्रोधमुष्टिं हृदूर्णामूर्द्धसु विन्यस्य मुखशौचादिकं कृत्वा देवगृहं प्रविश्य पटादिगतमूर्त्तिं भगवतीमवतार्य्य मारीचीविघ्नोत्सारणमन्त्रेण गन्धोदकं परिजप्यानेनैव पञ्चोपहारादिकं प्रपूज्यम्। तचायं विघ्नोत्सारणमन्त्रः— ॐ मारीचै हुँ सर्व्वविघ्नानुत्सारय हुँ फट्। ततः स्वहृदयाक्षरेण निशि चन्द्रमण्डलं दिवा सूर्य्यमण्डलं आकारेण ध्यात्वा तस्योपरि प्रथमचयोदशबीजं अर्द्धेन्दुबिन्दुभूषितं तप्तचामीकराभम्। ततो विस्वरश्मीन् निश्चार्य्य तै रश्मिभिर्निष्पन्नां भगवतीं मूर्द्धि गुरुबुद्धबोधिसत्त्वांश्च दृष्ट्वा पूजयित्वा अभिवन्द्य च अनेन मन्त्रेण, ॐ मारीचै पुष्पं प्रतीच्छ स्वाहा, ॐ मारीचै धूपं प्रतीच्छ स्वाहा, ॐ मारीचै स्वाहेत्यर्घं परिजप्य ॐ मारीचै अर्घं प्रतीच्छ स्वाहा, अभावे सति ध्यानेन वा। ततः—

रत्नत्रयं मे शरणं सर्व्वं प्रतिदिशाम्यघम् ।
अनुमोदे जगत्पुण्यं बुद्धबोधौ दधे मनः ॥

[1] A ०चोद्भव०। [2] AN स०।
[3] A ०पारण०। [4] AC ०हृदि०।
[5] A ०चारण०। [6] A ०पञ्चप्र०।
[7] AN omit. [8] A निमिश्रि। [9] AC ०मण्डलाका०।

आबोधेः शरणं यामि बुद्धं धर्म्मं गणोत्तमम् ।
बोधौ चित्तं करोम्येष[1] स्वपरार्थप्रसिद्धये ॥
उत्पादयामि[2] वर बोधिचित्तं
निमन्त्रयामि बहु[3] सर्व्वसत्त्वान् ।
दृष्टां चरिष्ये[4] वरबोधिचारिकां
बुद्धो भवेयं जगतो हिताय ॥

इति चिरुच्चार्य्य प्रणिधिपूर्व्वकं सर्व्वधर्म्मनैरात्म्यं भावयेद् अनेन मन्त्रेण । ॐ शून्यताज्ञानवज्रस्वभावात्मकोऽहमिति पठित्वा—

बीजं मायोपमाकारं[5] चैधातुं च[6] विशेषतः ।
दृश्यते स्पृश्यते चैव यथा माया हि सर्व्वतः ।
न चोपलभ्यते चैव सर्व्वस्य जगतः स्थितिः ॥

इति पठित्वा[7] प्रतिभाममात्रमवगम्य[8] ततो अनादिकारणमत्कल्पनाबीजमपनीय स्वभावशुद्धोऽहमित्यधिमुच्चेत् । स्वभावशुद्धाः सर्व्वधर्म्माः स्वभावशुद्धोऽहमिति वारत्रयमुच्चार्य्य ततः पूर्व्वोक्तबीजनिष्पन्नं चन्द्रं तस्योपरि ॐ[11]कारं तत्सर्व्वं परिणम्य श्रीमद्वैरोचननाथं पद्मगर्भसिंहासनस्थं वज्रपर्य्यङ्कनिषण्णं सुवर्णचन्द्रे बोध्यङ्गी[12]समाधिसमापन्नं जटामुकुटधरं शान्तं सर्व्वालङ्कारभूषितं ध्यायात् । ततः स्वहृदि चन्द्रमण्डलं तस्योपरि पञ्च-

[1] A चित्तान्तरोप० । [2] AC add परमं after this.
[3] A omits बहु० । [4] AN चरिष्यं ।
[5] MSS चरिष्यामि, which makes the metre faulty.
[6] A ०माकारं । [7] AC read विचिन्त्य before चैधा० ।
[8] A तुकश्च । [9] C omits. [10] A ०समात्रमगम्य ।
[11] AC ङ० । [12] AC बोधश्रो०, N बोधयो० ।

विंशतिकमक्षरं परमहृदयं प्रथमस्य द्वितीयेन समायुक्तं अर्द्धेन्दुबिन्दुभूषितं विभाव्य निष्पन्नमशोकस्तवकं तस्योपरि चन्द्रस्थमाँकारं ध्यात्वा तत्सर्व्वपरिणतमात्मानं मारीची-रूपेण भावयेत् अहमेव मारीची भगवती इति। सुपीतां जाम्बूनद[1]प्रभाकारां दीप्तदेहां चैत्यगर्भस्थां रक्ताम्बर-धरां रक्तकञ्चु[2]कोत्तरीयां नानावलयमर्व्वालङ्कारभूषितां कट[3]कुण्डलकटिसूत्रकिङ्किणीनूपुररवां अष्टभुजां त्रिमुखां त्रिनेत्रां ज्वलत्स्फुरद्रश्मिमालिनीं बन्धू[4]कजवाकुसुमसदृश-धरां वैरोचनकृतमूर्द्धजां अशोकमाला शिरसि भूषितां वामकरैरक्षसूत्राशोकचापधरां दक्षिणे स्फुरद्वज्रसूचिका-ङ्कुशशरोल्लसन[5]प्रियां प्रथमं मुखं सौम्यं विकसिताननं सुपीतकनकावदातं उत्फुल्ललोचनं सिन्दूररेणु[6]रञ्जिता-धरं शृङ्गाररसविभ्रमं वाममुखं वाराहं मरोषविकृतं विकटोत्कटभीषणं इन्द्रनीलप्रभाकारं द्वादशार्क[7]समप्रभ-मुरु भृकुटिकरालं ललज्जिह्वं भयस्यापि भयङ्करं दक्षिण[8]मुखं सुरक्तं दिव्यज्वलद्भासुरमिव, हर्म्योत्थिता[9] शोकतरु[10]कुसुम-मालावकीर्णां तस्याः शिरसि वैरोचनं नाथं पूर्व्वोक्त-वर्ण[11]मुद्रोपेत मधःस्तात् समशूकररथगतां प्रत्यालीढस्थितां कुमारीं नवयौवनस्थाम्, रथवाहकशूकराणां अधस्तात्

[1] A ०नन्द०।
[2] AC ०पञ्चु०।
[3] A कटक०।
[4] A ०नवां।
[5] AC जम्बक०
[6] A ०नारुनन०।
[7] A ०दार्क।
[8] A ०वदनां।
[9] AC सिन्दूरेवोज्वल०।
[10] AC ०प्राकार०।
[11] AC सुभ्र०।
[12] A हर्म्मस्थिता०।
[13] A ०वर०।
[14] ०चन्द्र० in A.
[15] A ०द्रोपम०।

यँभवं वायव्यमण्डले हँकारपरिणतं राहुग्रहं हस्ताभ्यां ग्रस्तं चन्द्रसूर्य्यौ दिवा दिनकरं निशिगतं चन्द्रमसं देवी-चतुष्टयपरिवृतां ध्यायात् ।

तच पूर्व्वेण ॐ मारीच्यै वर्त्तालि वदालि वरालि वराहमुखि सिद्धिमाकर्षय जः स्वाहेति एवं देवीं रक्तवर्णां वराहैकमुखीं चतुर्भुजां रक्तकञ्चुकोत्तरीयां वामे पाश-शोकहस्तां दक्षिणे वज्राङ्कुशसूचिधरां सर्व्वाभरणभूषितां कल्पोक्तविधिना अभिप्रेतसिद्धिमाकर्षयन्तीं ध्यायात् ।

ॐ मारीच्यै वर्त्तालि वदालि वरालि वराहमुखि सर्व्वदुष्टप्रदुष्टानां मुखं बन्ध बन्ध हुं स्वाहा । वदालीं देवीं पूर्व्वोक्तवस्त्राभरणतद्रूपां पीतवर्णां वामे पाशवज्रधरां दक्षिणे पल्लवसूचीधरां दुष्टानां मुखचक्षुषी मीवन्तीं दक्षिणतो भावयेत् ।

ॐ मारीच्यै वर्त्तालि वदालि वरालि वराहमुखि सर्व्वदुष्टान् स्तम्भय वँ स्वाहेति वरालीं देवीं तद्वत् वस्त्राभरणवर्णां तु दक्षिणे वज्रसूचिहस्तां वामे पाश-शोकधरां सर्व्वदुष्टान् स्तम्भयन्तीं पश्चिमे न्यसेत् ।

ॐ मारीच्यै वर्त्तालि वदालि वरालि वराहमुखि सर्व्वसत्त्वान् मे वशमानय होः स्वाहेति वराहमुखीं देवीं रक्तवर्णां तथावस्त्राभरणां च सव्येन वज्रशर-धारिणीं वामे अशोकचापधरां सर्व्वसत्त्वानुपसर्पयन्तीं उत्तरस्यां दिशि न्यसेत् ।

[1] N मन्त्रं । A ०चि । [3] A वराह० ।
[4] A ०धमपि । [5] A ०नां । [6] AN च ।
[7] A वर्णांदिन्तु । [8] A omits.
[9] A ०नशर० । [10] AC ०नुरागय० ।

ततो वज्राङ्कुश्यादिभिर्मुद्राभिः तन्मन्त्रैश्चाकर्षणादिकं कुर्य्यात्। ज्ञानसत्त्वमाकृष्य प्रवेश्य बद्ध्वा वशीकृत्य साधयेत्। तर्ज्जन्यङ्कुशबन्धेन कनिष्ठया महाङ्कुशी बाहुग्रन्थिकटाग्राभ्यां शृङ्खलापृष्ठयोश्च पीडनादिति। ॐ वज्राङ्कुशि जः इत्यनेन ज्ञानसत्त्वमाकृष्य पुरतो अर्घपाद्यादिकं दद्यात्। मारीचीमुद्रणम्। ततः ॐ वज्रपाश हुं इत्यनेन प्रवेशयेत्, ॐ वज्रस्फोट वं अनेन बन्धयेत्, ॐ वज्रावेश होः अनेन तोषयेत्। ततः समयदेवताभिः सदाऽद्वयं कुर्य्यात्। तत्रेयं मुद्रा—

उभौ हस्तौ समौ कृत्वा अञ्जल्याकारमिश्रितौ।
कुर्य्याद् विकसितावग्रावुभावङ्गुष्ठनामितौ॥
मध्यमाङ्गुलिमाश्लिष्टौ कुण्डलाकारबन्धितौ।
पर्य्यङ्केनोपविष्टेन नाभिदेशे तदा न्यसेत्॥
एषा मुद्रा वरा श्रेष्ठा सर्व्वकर्म्मसु योजयेत्।
ततोऽभिषेकं गृह्णीयात् महामुद्रया अनया॥
अङ्गुष्ठसत्त्वपर्य्यङ्का कुञ्चिताग्राग्रविग्रहा।
सममध्यमोत्तमाङ्गा शेषा वज्राञ्जलिप्रभा॥

इति मूर्द्धि स्थाप्य ॐ भूः खं माँ अभिषिञ्चेति मन्त्रेण वैरोचनः कनकाभो बोधद्रुमस्थवस्थितः शिरसि ध्येयः। भावनाखिन्नो जपेन्मन्त्रम्। स्वहृदि चन्द्रस्थं मन्त्रं देदीप्यमानं ॐ मारीच्यै स्वाहेति दृष्ट्वा जपेत्। यथाशक्त्या

[1] A ०ष्ठाद्या०। [2] A अष्ठा०।
[3] A ०मांकार०, N ०मोंकार०, C ०माकार०। *See* Infra.
[4] ANC ०ग्राव०। [5] A जपेत्।

भावनापूर्व्वङ्गमं सर्व्वां देवतीं समुत्तेजयन्तीं पश्यन् मन्त्रं जपेत्। पश्चाच्यूनाधिकविधिः[1] शताक्षरेण पूरयेत्। तचायं मन्त्रः— ॐ वज्रसत्त्व समयमनुपालय, वज्रसत्त्वत्वेनोपतिष्ठ, दृढो मे भव, सुतोष्यो मे भव, अनुरक्तो मे भव, सुपोष्यो मे भव, सर्व्वसिद्धिं मे प्रयच्छ[2], सर्व्वकर्म्मसु च मे चित्तं श्रेयः कुरु, हुं हहहहहोः भगवन् सर्व्वतथागतवज्र मा मे मुञ्च, वज्रीभव महाममयसत्त्व आः। विसर्ज्जनकाले तु सर्व्वमेतत् कुशलं परिणम्य अभिप्रेतां सिद्धिमभियाच्य स्वमुद्रां शिरसि मुञ्चेत् ॐ मारीचि मुरिति। स्वाधिदैवतयोगेन भोजनस्नानदानशयनादिकं सर्व्वं प्रकल्पयेत्। इत्यनेन क्रमेण कायवाक्चित्तरक्षां कृत्वा यथासुखं विहरेदिति।

मारीच्याः साधनं कृत्वा यच्छुभं समुपार्ज्जितम्।
प्राप्नुवन्तु पदं सत्त्वा मारीचीज्ञाननिर्म्मलम्॥

ॐ ख ख खाहि खाहि गृह्ण गृह्ण गृह्णन्तु मार्व्वभौतिका[3] बलिं मम शान्तिं कुर्व्वन्तु स्वाहेति बलिमन्त्रः।

॥ कल्पोक्तमारीचीसाधनं समाप्तम्।
। कृतिरियं पण्डिताचार्य्यगर्भपादानाम्॥

[1] A ०गमनं। [2] Only in N. [3] A पश्चा०।
[4] A ०विधे। [5] AC ०नता०।
[6] AC add मा संशयं कुरु after प्रयच्छ, which is obviously redundant as the letters of the *Mantra* go beyond hundred in that case.
[7] ANC omit. [8] A मुदि०।
[9] A ०नानुदानाशुना०। [10] A सत्वा। [11] N ०तिकाः।

143.

नमो मारीच्यै ।

प्रथमं सूर्य्यमण्डलं तस्योपरि प्रथमचयोदशं बीजमर्द्धेन्दु-बिन्दुशोभितं तन्निष्पन्नां मारीचीं रक्तवर्णां षण्मुखां प्रथमं रक्तं द्वितीयं कृष्णं तृतीयं श्यामं चतुर्थं पीतं पञ्चमं सितं षष्ठमूर्द्ध्वं वराहमुखं कृष्णं अशोकचैत्यालङ्कृतां लम्बोदरीं कपालमालाशोभितां ऊर्द्ध्वकेशां व्याडैर्विभूषितां व्याघ्र-चर्म्मनिवसनां विघ्नघातिनीं नानावर्णशूकररथारूढां मध्ये खड्गवज्रमुपलशरशक्तिचक्रवज्रपरशून् धारयन्तीं वामे तर्ज्जनिकापाशं अशोकपल्लवब्रह्मशिरआपं त्रिशूलं च इत्थं द्वादशभुजां त्रिनेत्रां रक्तवर्णवर्त्तुलां मुखोच्चललत्कारां रथमध्ये द्विभुजां तर्ज्जनिकापल्लवगृहीतां पुरतो द्वितीयां भावयेत् । अहमेव मारीची भगवतीति ततो मुद्रां बन्धयेत् ।

वज्राञ्जलिं समाधाय मध्यमेऽथ निकुञ्चनात् ।
अङ्गुष्ठद्वयपर्य्यङ्ककुञ्चिताग्राग्रविग्रहाम् ॥

ॐ मारीच्यै मां हुँ हुँ फट् स्वाहा ।

॥ मारीचीसाधनं समाप्तम् ॥

AC ०पल्लवं, N ०पर्शून्
A omits.
A मुखाच, N मुखाद्य०
AN ०मार्ये, C ०मोऽथ ।
AC ०स्यावं ।
AC इत्यर्थ ।
AC ०लोन् ।
All the three MSS. A, N and C read समाकुलं which gives no meaning. This emendation is proposed on the strength of other similar stanzas.

144.

शासने कल्पमाचोत्थे सर्व्वोपद्रव शान्तये ।
मारीचीं भावयेत् प्राज्ञः सर्व्वज्ञा कारप्राप्तये ॥
सर्व्वकर्म्मध्वसम्बुद्धमध्यवर्त्तिगुरोः पुनः ।
माँहच्चन्द्रात् ममापूज्य विधिवद्देश नादिकम् ॥
प्रतिदिशाम्यघं सर्व्वमनुमोदे जगच्छुभम् ।
चिरत्नशरणं यामि मम्बोधौ विदधे मनः ॥
दयामद्भावतः शून्यं निर्निमित्तमहेतुतः ।
अतो हेतोः प्रणिहितं चिविमोक्षं जगत् स्वयम् ॥
धर्म्मधातुस्थिते चैत्ये धातुहृद् बु द्धवर्त्मनि ।
स्फुरद्दुद्धौघखव्यापिचतुरस्रादिसंयुते ॥
बहिरन्तश्चतुष्कोणे चिशूकाङ्केन्दुमण्डले ।
दुष्टसत्त्वतलाक्रान्तगिरिराजप्रतिष्ठिते ॥
भावयेत् तत्र माँतत्त्व मशोकस्तवकोद्भवाम् ।
शृङ्गारवीरम द्यैं जाम्बूनदसमप्रभाम् ॥
मध्येन्द्र नीलवर्णा स्यां भयबीभत्सरौद्रकैः ।
करुणाद्भुतशान्तैश्च स्फटिकेन्दितराननाम् ॥

---

[1] A खासन० ।
[2] AC ०न्नाम्नाय
[3] ACN सर्वज्ञता० ।
[4] AC ०युक्त ।
[5] AC ०सम्भवातः ।
[6] A omits ०तत्त्व० ।
[7] AC ०सदेश्य० ।
[8] AC वक्त्रा०, N वम्त्रा०
[9] AC संक० ।
[10] AC प्रज्ञा ।
[11] AC स्तुत्वादिकत्वार्थ० ।
[12] A ०वनदेवा० ।
[13] AC ०हस्तु० ।
[14] AC ०त्रिलस० ।
[15] AC मध्यनी० ।
[16] A ०न्दितरै गर्भा ।

चिविमोक्षमुखैस्त्यक्षां धर्म्मसम्भोगनिर्म्मिताम् ।
पीता(क्ष)भरणसङ्गस्त्रां मयूखसुखवाहिनीम् ॥
सुच्याक्षास्यानि सौवन्तीं बध्नन्तीं मुखचक्षुषी ।
हृन्नलेऽङ्कुशपाशाभ्यां विन्धन्तीं बाणकार्मुकैः ॥
वज्रेण दुष्टहृद् भित्त्वाऽशेकेनामेचनापराम् ।
विमोक्षाष्टाष्टभिस्तान् दुष्टान् नष्टान् प्रभावयेत् ॥
पादविक्षोभमंकोचादात्मदृष्टिं च तद्गतिम् ।
प्रज्ञोपायपदाक्रान्तां मारीचीं भावयेद् व्रती ॥
सर्व्वदिक्चक्रध्वभावात्मस्फुरत्संहारकारकान् ।
जः हुँ वँ होः ब्रुवंस्तस्मिन् सर्व्वबुद्धान् प्रवेशयेत् ॥
बुद्धाङ्गोद्भवविद्याभिर्भृतकुम्भा मृताम्बुधिः ।
रत्नमुकुटपट्टाङ्गां पश्येत् शाश्वतसेकधाम् ॥
सर्व्वपूजा करव्यग्रधूपपुष्पादिवज्रिभिः ।
पूजां स्तुतिं च कुर्य्याद् वै तेन पश्येदिमां ततः ॥
स्तम्भयन् कायवाक्चित्तमामन्त्र्य पिचुवां जपेत् ।
सर्व्वदुष्टप्रदुष्टानां चतुर्थान्तं सशङ्कया ॥
चतुः सन्ध्यं चिसन्ध्यं वा प्रातर्वाऽष्टशतं जपेत् ।
भावयंस्तां महाविद्यां महार्थे तु सहस्रकम् ॥

---

[1] AC ०स्त्राक्षाभा ।
[2] A सुच्याक्षा० ।
[3] A ०वदा० ।
[4] AC ०स्त्रार्थभा० ।
[5] AC ०कुटुम्बा० ।
[6] A र्चेऽन्तं ।
[7] A omits.
[8] N मख० ।
[9] A हृक्नले अ० ।
[10] AC विभा० ।
[11] N omits.
[12] AC ०पूजन० ।
[13] AC चतुःमध्ये ।

जप्त्वा पूजास्तुतिं कृत्वा विनाम्य शुभमर्थतः ।
निवेश्यात्मनि सम्बुद्धान् गतसङ्गो विसर्जयेत् ॥
विसर्ज्जनमधिष्ठानं सामान्यं त्र्यक्षरं स्मृतम् ।
प्रतिष्ठासमये तन्त्रे कायवाक्चित्तसाधने ॥
सन्ध्यान्तरेऽपि पूजादिपुरःसरमितो जपेत् ।
प्राग्विधिना पुनः प्रातर्देवीमङ्गौतिचोदितः ॥
इमां विद्यां तथा चान्यां भावयेत् म समाजपन् ।
तन्त्राम्नायेन सन्मन्त्री रुचितः साधयेद् भृशम् ॥
पिचुवालेशसंलेखाद् यत् पुण्यं समुपार्ज्जितम् ।
तेन लोकोऽस्तु सर्व्वाशः न्यामहं मञ्जुराट् स्वयम् ॥

॥ श्रीमारीचौपिचुवा साधनं समाप्तम् ॥

145.

नत्वा च मारीचीं देवीं सर्व्वदुष्टप्रमर्दनीम् ।
तस्याः साधनं वक्ष्येऽहं सर्व्वकर्म्मप्रसाधकम् ॥
सत्त्वपर्य्यङ्कमासीनां हृदीन्दावोँकारभूषिताम् ।
रक्तवर्णां ज्वलद्दिव्यां विश्वरश्मिसमाकुलाम् ॥

---

[1] AC ०ख्यान्योनि । [2] A प्राण्यां ।
[3] A विश्वारेसरेखा०. N पिचुवालेशालेखा०, [4] पिचुवारेशं लेखा० ।
[5] AN अनेन । [6] A ०पिसच्चा० ।
[7] A ०टोन्द् ॐ० । [8] N ०वर्णा । [9] AC ०दौजं ।

नैर्निष्यादिताः संबुद्धाः बोधिसत्त्वा महर्द्धिकाः।
वन्दित्वा सम्पूज्याभिमन्त्र्य नैवेद्यादि निवेदयेत्॥

अनेन मन्त्रेण— वज्रपुष्पे वज्रधूपे वज्रदीपे वज्रगन्धे वज्रनैवेद्ये ॐ हुँ इति सर्व्वत्र। ततो रत्नत्रयं मे शरणं बोधिचित्तोत्पादनं च। प्रणिधिपूर्व्वकं सर्व्वधर्म्मनैरात्म्यं भावयेत् अनेन ॐ शून्यताज्ञानवज्रस्वभावात्मकोऽहम्। ततः स्थिरचलं सर्व्वभावस्वभावान् विचिन्त्य बीजं च तदनु ॐ स्वभावशुद्धाः सर्व्वधर्म्माः स्वभावशुद्धोऽहम्। तद्बीजनिष्पन्नचक्रं तस्य वरटके भानुमण्डलं तस्योपरि षष्ठस्य पञ्चमबीजं आकारइन्दुबिन्दुशोभितं तत्सर्व्वं निष्पन्नं मतिमारीचीरूपेणात्मानं विचिन्तयेत् रक्तवर्णां वक्त्रद्विगुणभुजां ललितव्याघ्रचर्म्मनिवसनां ऊर्द्धावबद्धजटां रत्नमुकुटिनीं त्रिमुखीं उभयवराहाननां प्रथममुखं सौम्यं प्रहसिताननं सशृङ्गारसविभ्रमं सर्व्वत्र त्रिनेत्रां वामं रक्तं वाराहं वज्रमुद्गरगृहीतनमस्कृतं दक्षिणमुखं वाराहं सैन्यवच्छायं वज्र पाशगृहीतपुरन्दरवन्दितं चैत्यगर्भकृष्णक्रोडालीढेन स्थितां अधो हरिहरब्रह्मादयो महिता वसुलोकपालाः सर्व्वे भीतास्त्रस्ता भट्टारिकावन्द नामाज्ञां च कुर्व्वन्तः स्थिताः, आकर्णपूरितधन्वीं अशोककलिका-

[1] A गुरुबुद्धबोधि०
[2] AC न निवे०।
[3] A वज्रराधे।
[4] A धिरित्य।
[5] A रक्तवर्णावस्त्रां।
[6] N रक्त०।
[7] A चन्द०, N मन्द०।
[8] AN निवे०।
[9] A omits.
[10] A ०वर।
[11] AC omit ०बिन्द०।
[12] A ऊर्द्धाबद्धजटां. N उर्द्धबद्धजटां
[13] AC चक्र०।
[14] A ०रुधीं।

निभेन शरेण साध्यं हृदि विन्धयन्तीं[1] विचिन्तयेत्; रक्तकञ्चुकोत्तरीयां सर्व्वालङ्कारभूषितां अशोकबन्धमकुटां वामकरेणाशोकपुष्पवसुपुष्पधृतां हृदि तर्ज्जनीस्थितां वज्रपाशमहाकपालसूचिशिरोभद्रघटगृहीतहस्तां दक्षिणेन सूचिअङ्कुशभिण्डिपालखड्गकर्त्तिवज्रदण्डकुलिशहस्तां नृपावर्त्तक(!)वर्णाम्। श्रीमद्वैरोचनं वज्रपर्य्यङ्कबोधङ्गी[2] समापन्नं जटामुकुटधरं शान्तं ज्ञानोन्मीलितचक्षुषं शिरसि विचिन्त्य सर्व्वकर्म्म समारभेत। यथोपदेशतः ज्ञानसत्त्वमाकृष्य प्रवेश्य बद्ध्वा वशीकृत्य साधयेत्। अभिषेकं कवचपट्टबन्धपूजास्तुतिं च कृत्वा पश्चात् जापं समारभेत। यथाहि गेहे ज्वलति प्रदीपे अकम्प्य[3] मानानिलप्रयुक्तः तथाहि धर्म्मो ज्वलते शरीरे एकाग्रचित्तस्य जपे रतस्य। ततो मुद्रां बन्धयेत्।

अङ्गुष्ठमत्त्वपर्य्यङ्का कुञ्चिताग्राग्रविग्रहा।
सममध्यमोत्तमाङ्गा शेषा वज्राञ्जलिप्रभा॥

हृदूर्णाकण्ठमूर्द्धि अवस्थाप्यानेन ॐ मारीचि हुँ सर्व्वदुष्टान् मर्दय हुँ फट्। अष्टमस्य तृतीयचतुर्थयोस्तृतीयं मप्तचतुर्थेन पूरितं, [तौ] प्रथमद्वितीयेन भूषितौ, शुक्लं इन्द्राननं प्रदोषे मध्यमया शान्तिमन्त्रं प्रकाशितम्। ॐ

[1] A विश्ववन्तीं। [2] ०बोधश्रो०, N ०बोधयो०।
[3] A adds समाधि before समा०। [4] N ०पल्लव०।
[5] A ज्ञानात्ज्ञालित०, N ज्ञानात्माग्रोभित०।
[6] AC ०देशं। [7] A वमो०।
[8] C omits अभिषेकं.....रतस्य। [9] A प्रदायो।
[10] AC कम्प०। [11] N ज्वलन्तं। [12] A omits.
[13] N सम्पूरयेत् तथैनं।

मारीच्यै देवदत्तस्य शान्तिं कुरु स्वाहा। प्रथमस्य चयोदशं बीजमर्द्धेन्दुबिन्दुशोभितं प्रत्यूषे मध्यमया पीतं कौबेराननं पौष्टिके मन्त्रमुदाहृतम्। ॐ मारीच्यै देवदत्तस्य पुष्टिं कुरु ॐ। अष्टमस्य चतुर्थं च प्रथमस्य चयोदशं षोडशेन समायुक्तं अर्द्धरात्रौ वाऽन्यत् रक्ताऽनामि(का)कया वश्य-वर्णप्रभेदितम्। ॐ मारीच्यै देवदत्तस्य वशमानय होः। हपरं पष्ठेन संयुक्तमर्द्धेन्दुबिन्दुशोभितं मध्यसाध्यप्रवेशितं पष्ठस्य तृतीयकं चतुर्थ्यार्द्धार्थिनं कृष्णयाम्यास्यो मध्याह्ने अभिचारं तर्ज्जन्या एष मन्त्रः प्रचोदितः। ॐ मारीच्यै देवदत्तं मारय हुँ फट्। तृतीयातृतीयकं बीजं षोडशेन समायुक्तं सर्व्वाकर्षणमुत्तमम्। ॐ मारीच्यै अमुकस्य सिद्धिमाकर्षय जः। मारीच्या मण्डलाभिषिक्तो गुरुभक्तो-ऽथ सत्यवाक् सिध्यति। तस्य देवताजप्तविद्यस्य न संशयः। कोटिजापेन मन्त्रः स्यात्। पटस्याग्रतः सुजप्तेन सिध्यन्ति सर्व्वकर्म्माणि मनोऽभिरुचितं यद्भवेत्।

मारीच्युद्भवतन्त्रस्य लिखितं साधनं वरम्।
अनेन कुशलमूलेन सत्त्वा भवन्तु सौगताः॥

॥ मारीच्याः साधनम् ॥

---

[1] A ०चि।
[2] A omits ०बिन्दु०।
[3] A omits पुष्टिं कुरु.....देवदत्तस्य।
[4] A ०मन्विन्दु०।
[5] A मध्यप्रवे०।
[6] N अरारं।
[7] N omits.
[8] A omits.
[9] A खजप्तचान, N प्रधान।

146.

संक्षिप्तमारीचीसाधनं विधीयते। स्वहृदि चन्द्रे माँकारं ध्यात्वा तद्रश्मिभिर्न्निष्पन्नान् गुरुबुद्धबोधिसत्त्वान् अग्रतो दृष्ट्वा वन्दित्वा संपूज्य पापदेशनादिकं कुर्य्यात्। ततः सर्व्वधर्म्ममात्मानं च मायोपमाकारेण प्रतिभाससमं बीजं विचिन्त्य स्वभावशुद्धिं पठेत्। ततः शून्यताधिमोक्षं कुर्य्यात्। ततस्तद्बीजपरिणतं अशोकस्तवकं तदुपरि चन्द्रस्थमाँकारं एतत् सर्व्वं परिणम्यात्मानं मारीचीरूपं पश्येत्। तत पीतवर्णां[1] त्रिमुखां त्रिनेत्रां अष्टभुजां रक्ताम्बरधरां रक्तकञ्चुकोत्तरीयां सर्व्वालङ्कारभूषितां वैरोचनकृतमूर्द्धजां स्फुरद्रश्मिमालाकुलां बन्धूकजवाकुसुमसदृशाधरां वामकरे तर्ज्जनीपाशचापाशोकपल्लवस्तूचधरां दक्षिणे वज्रशरअङ्कुशस्तूचीधरां चैत्यगर्भस्थितां सप्तशूकररथगतां प्रत्यालीढपदां कुमारीं यौवनस्थितां उत्फुल्ललोचनाम्[2]। तदस्या मूलमुखं सौम्यं सशृङ्गारं वामं कृष्णं सरोषं वाराहं भृकुटिकरालभयानकं लललज्जिह्वं दक्षिणमुखं सुरक्तं चटुलं पद्मरागसन्निभं हर्म्यस्थिताशोकतरुकुसुमावकीर्णां अधस्ताद् वायुमण्डलं हूँभवराहुं चन्द्रसूर्य्यौ ग्रसमानं चतुर्हेवौपरिवृतां भगवतीं ध्यायात्[3]।

तच पूर्व्वेण वर्त्तालीं देवीं रक्तवर्णां चतुर्भुजां वामकराभ्यां पाशाशोकौ दक्षिणाभ्यां वज्राङ्कुशस्तूचिधरां

---

[1] N पीतां।
[2] A जम्बूकबीज०।
[3] N adds स्थितां
[4] A ग्रहा०।
[5] AC omit.
[6] AC ०फुल्लेन्दीवरानना।
[7] चतुर् in all MSS.

दक्षिणतो वदालीं देवीं पीतवर्णां चतुर्भुजां वामकराभ्यां पाशवज्रौ दक्षिणे अङ्कुशैकसूचिधरां पश्चिमतो वरालीं देवीं तद्वद्रूपधरां वामकराभ्यां पाशाशोकौ दक्षिणाभ्यां वज्रसूचिधरां उत्तरे वराहमुखीं देवीं रक्तवर्णां चतुर्भुजां वामकराभ्यां अशोकचापौ दक्षिणाभ्यां शरवज्रधरां ध्यायात्। सर्व्वाश्चैता रत्नमकुटा वराहैकमुखाः त्रिनेत्रा विचित्राभरणा रक्तकञ्चुकोत्तरीया ध्यायात्। ततो वज्राङ्कुश्यादिमुद्राभिस्तन्मन्त्रैर्ज्ञानसत्त्वन्याकर्षणादिकं कुर्य्यात् जः हुं वं होः इत्यनेन। ज्ञानसत्त्वमाकृष्य प्रवेश्य बद्धा वशीकृत्य तोषयेत्। ततो मारीचीमुद्रयाऽद्वयं कुर्य्यात्। भावनापूर्व्वकं जापं कुर्य्यात् ॐ मारीच्यै स्वाहा। सर्व्वकुशलं परिणाम्य विसर्ज्जयेत् ॐ मारीच्यै मुरिति।

॥ संक्षिप्तमारीचीसाधनं समाप्तम ॥

[1] Ab omits पीत०।
[2] A adds तारां after this.
[3] AN वामाभ्यां।
[4] AC ०ज्ञसत्त्वं ज्ञा०।

147.

नमो मारीचै ।

मत्त्वपर्य्यङ्कस्थितो धीमान् आलम्बितमहाक्षपः ।
प्रातः सायं च हृच्चन्द्रे मितौंकारेण भावयेत् ॥
वैरोचनाख्यमात्मानं तत्करैः सर्व्वतः मितम् ।
प्राकारं चतुरं चैत्यभूषितो ऽग्निं ज्वलत्प्रभम् ॥
रक्षार्थं पुरतः पश्चात् मध्ये वामेऽथ मूर्द्धनि ।
क्रमान्माचादि दारादि मातुलादि सुतादि च ॥
प्रतिमापट कल्पेन मिश्रपुष्पादिसम्भवात् ।
ततो हृच्चन्द्र माँपीत मारांशैकच्छटो ऽद्भवा ॥
चिन्तयेदार्य्यमारीचीं स्वचौस्वचधरारूपाम् ।
उत्थानाभिनयां मध्ये नामारन्ध्रेण तां पुनः ॥
संस्थाप्य न्यूतनेचाम्यदृष्टान् प्राकारतो बहिः ।
कुर्व्वाणाममलन्नद्धबोध्यङ्गौधारणीं पठेत् ॥
तत ॐ आदि मारीचे स्वाहा मन्त्रो यथाबलम् ।
जप्योऽर्थमन्त्रविद् वाम नामारन्ध्रेण तां हृदि ॥

[a] Ba omits from the beginning up to कुर्व्वाणां सौमबन्धनं Instead of this line A has सायं चन्द्र मितोङ्कारेण भावयेत्
[b] N ०लं
[c] AC मृद्धि ।
[d] N ०कल्पा ।
[e] मामं ।
[f] AC omit.
[g] A विद्वामु० ।
[h] AC ०मृनो० ।
[i] N ०दाम्यादि० ।
[j] A ०गांधित० ।
[k] A ०च्छतोभ० ।
[l] A माटि ।

प्रवेश्याशोककान्ता स्याद् रश्मिभैः पीतशूकरैः
बहिः सम्पिष्य तद्दुष्टैः कुर्व्वाणां सौमबन्धनम्
हेमाभशूकरारूढां तप्तकाञ्चनभास्वराम् ।
लीलयोर्द्ध्वस्थितां चन्द्रबिम्बाम्भोरुहसंश्रयाम् ॥
अशोकवृक्षशाखाग्रविलग्नां वामपाणिना ।
बिभ्रतीं वरदाकारदक्षिणकरपल्लवाम् ॥
दीप्तरत्नोपशोभेन मौलिना बुद्धशेखराम् ।
श्वेतवस्त्रां नमस्यामि मारीचीमभयप्रदाम् ॥

॥ आर्य्यमारीचीधारणीपाठो पदेशः ॥

148.

पर्णशवर्य्यै नमः ।

पर्णशवरीसाधनमुच्यते । पूर्ववत् सर्व्वं विधाय स्वहृदि सितपद्मचन्द्रमण्डले पीतपंकारजं वज्रं तद्वरटके पँकारं तत्सर्व्वपरिणतां भगवतीं पीतवर्णां त्रिमुखां त्रिनेत्रां षड्भुजां प्रथममुखं पीतं दक्षिणं सितं वामं रक्तं ललित-

---

[1] A सापोष्ट०. [2] A त्रिचत्रि. [3] ANC दीप्तानलो०.
[4] A ०नस्तां, Ba ०वर्णां. [5] A ०यथो०, Nb ०पोठो०.
[6] After this *Sādhana* the first part of MS N comes to an end on the reverse side of folia 146, and the end is marked with the usual Buddhist formula नमो धर्म्माय, नमो बुद्धाय, नमो सङ्घाय.
[7] पर्णशवरीसाधनमुच्यते is found only in Ab.
[8] ANC omits. [9] Ab कनकवर्णां.

हासिनीं सर्व्वालङ्कारधरां पर्णपिच्छिकावसनां नवयौवनोद्वतां पीनां खर्व्वलम्बोदरीं ललज्जिह्वां दक्षिणभुजैः वज्रपरशुशरधारिणीं वामभुजैः सतर्ज्जनिकापाशपर्णपिच्छिकाधनुर्धारिणीं पुष्पावबद्धजटामुकुटस्थाक्षोभ्यधारिणीं सूर्य्यप्रभामण्डलिनीं अधो विघ्नान् निपात्य सितपद्मचन्द्रासने प्रत्यालीढस्थां हृदाममुष्टितर्ज्जन्याधो विघ्नगणान् मन्तर्ज्ज दक्षिणवज्रमुष्टिप्रहाराभि नयाम् । अथ तथैव चतुर्भुजां वामभुजयोः सतर्ज्जनिका पाशपर्णपिच्छिके दक्षिणभुजयोर्वज्रपरशुधारिणीमतिभयदां भावयेत् । ततो मन्त्रं जपेत् ॐ पिशाचि पर्णशवरि सर्व्व मारिप्रशमनि स्वाहा । ततो यथावद् विमर्ज्य यथासुखं विहरेदिति ।

॥ पर्णशवरीसाधनम् ॥

Ab ०प्राभं । ANCAbBa पल्लव० ।
A ०नाच्छनां, Ab ०नोदयां ।
खर्व्वलम्बोदरीं ललज्जिह्वां found only in Ab.
Ab omits ०प्राभ० । AC ०पल्लव० ।
A omits. Ab omits.
B वाम० ।
Ab adds after this ०नयेन सन्ध्यार्थं अनया मुद्रया हृद्यादिकमाग्नेयेन मुद्रां स्वाभाविकज्ञानसत्त्वप्रवेशादिकं निष्पाद्य पञ्चनामयुतमेकेनाभिमन्त्र्य सर्व्वोपद्रवनाशं मन्त्री चिन्तयेत् ।
ANCBa omit. [a] A omits पाश० ।
A ०मतीतपरां । [b] Ab ०माभ० ।
A ०प्रणयनि ।

149.

पूर्व्वोक्तविधानेन शून्यताभावनानन्तरं विश्वकमले चन्द्रस्थहरितपँकारजं पर्णशवरीं हरितां त्रिमुखां त्रिनेत्रां षड्भुजां कृष्णशुक्लदक्षिणवामाननां वज्रपरशुशरदक्षिणकरत्रयां कार्म्मुकपत्रच्छटापाशतर्ज्जनीवामकरत्रयां सक्रोधहसिताननां नवयौवनवतीं सपत्रमालाव्याघ्रचर्म्मनिवसनामीषल्लम्बोदरीं ऊर्द्ध्वसंयतकेशीं अधोऽशेषरोगमारीपदाक्रान्तासमोघसिद्धिमुकुटीमात्मानं झटिति निष्पाद्य मन्त्रं जपेत् ॐ पिशाचि पर्णशवरि सर्व्वमारिप्रशमनि हुं फट् स्वाहा ।

॥ पर्णशवरीसाधनम् ॥

150.

नमो रत्नत्रयाय, नमोऽमिताभाय तथागतायार्हते सम्यक्संबुद्धाय, नम आर्य्यावलोकितेश्वराय बोधिसत्त्वाय महासत्त्वाय महाकारुणिकाय, नमो महास्थामप्राप्ताय बोधिसत्त्वाय महासत्त्वाय महाकारुणिकाय ।

वामने त्वां नमस्यामि वामने त्वां भगवति ।
पिशाचि पर्णशवरि पाशपरशुधारिणि ॥

[1] AC omit शून्यता० ।
[2] B ०दरां ।
[3] ANC ०सङ्कट० ।
[4] AC ०रोमरोग० ।
[5] AC omit सर्व्वमारि० ।
[6] AC ०र्हन्ते ।
[7] AC ०स्थान० ।
[8] ANCB add पिशाचि after this.

यानि कानिचित् भयान्युत्पद्यन्ते याः काश्चित् मार्य्यो[1] याः काश्चित् महामार्य्यो याः काश्चिदौतयो ये केचिदुपद्रवा ये केचिदपाया ये केचिदाध्यात्मिका भया ये केचिदुपसर्गा उपसर्गसम्बद्धा वा[2] उत्पद्यन्ते सर्व्वाणि तानि सर्व्वास्ताः सर्व्वे ते बालत एवोत्पद्यन्ते न पण्डिततः[3]। तदनेन सत्येन सत्यवचनेन सत्यवाक्येन ज्रः ज्रः ज्रः ज्रः[4] एभिः पण्डिताधिष्ठितैर्म्मन्त्रपदैर्म्मम सर्व्वसत्त्वानां च रक्षां कुरु, परित्राणं कुरु, परिग्रहं कुरु, परिपालनं कुरु, शान्तिं कुरु, स्वस्त्ययनं कुरु, दण्डपरिहारं कुरु, शस्त्रपरिहारं कुरु, यावद् विषदूषणं[5] कुरु, अग्निपरिहारं कुरु, उदकपरिहारं कुरु, काखोर्द्द[6] च्छेदनं कुरु, सीमाबन्धं कुरु, धरणीबन्धं कुरु। तद्यथा, अमृते अमृते अमृतोद्भवे अमृतसम्भवे आश्वस्ते आश्वस्ताङ्गे मा मर मा मर मा मर मा मर शम प्रशम उपशम सर्व्वव्याधीनुपशम सर्व्वाकालमृत्यूनुपशम सर्व्वनक्षत्रग्रहदोषानुपशम सर्व्वदंष्ट्रिणां[7] चोपशम भगवति पर्णशवरि तुन्न तुन्न वितुन्न वितुन्न तुण तुण तुमुले

[1] AC मार्य्यायाः । N काश्चिन् महामार्य्याः ।
[2] A ०म्बद्धा । Ba उपपद्यन्त ।
[3] AC भवैते । ANCBa पण्डिताः ।
[4] AC omit. The 4th. ज्रः is omitted in A.
[5] ANCBa दूषह । AC ०चारणं ।
[6] ANC शान्तिखस्त्य० । AC omit शस्त्रपरिहारं कुरु ।
[7] N ०दिपदषणं । AC omit उदकपरिहारं कुरु ।
[8] A काखादा०, NC काखोद० ; the meaning is not found in dictionaries. The word may be emended as कपादि० ।
[9] Ba ०दुष्टानां । [10] A तुन, N तुनु ।
[11] One वितुन्न is dropped in all other MSS except B.
[12] Ba तुनय ।

स्वाहा। ॐ गौरि गान्धारि चण्डालि मातङ्गि पुक्कसि स्वाहा। ॐ अङ्कुरे मङ्कुरे कुरुकुरे पर्णशवरि स्वाहा। ॐ नमः सर्व्वशवराणां महाशवराणां भगवति पिशाचि पर्णशवरि पिशाचि पर्णशवरि पिशाचि पाशपरशु-धारिणि यानि कानिचिद् भयानि(यो) स्वाहा। ॐ पिशाचि पर्णशवरि ह्रीः हः हुं फट् पिशाचि स्वाहा।

॥ आर्य्यपर्णशवरी नाराधारणी समाप्ता ॥

151.

ॐ नम आर्य्यप्रज्ञापारमितायै।

अथातः सम्प्रवक्ष्यामि प्रज्ञापारमितोदयम्।
यस्यां भावितमाचार्यां निग्रहः सर्व्ववादिनाम्॥
द्विभुजामेकवदनां सितवर्णां मनोरमाम्।
अर्द्ध चर्च्चरकेशां च श्वेताम्भोरुहसं स्थिताम्॥
पद्मं दक्षिणहस्ते तु रक्तवर्णं विभावयेत्।
प्रज्ञापारमितां वामे वज्रपर्य्यङ्कसंस्थिताम्॥

B कुम्रे | A ०सराणां | AC omit. | पर्णशवरि.....द्वयौ(?) is omitted in all MSS except B. | AC ज | NC omit तारा | B धारिणी० | Ab यया | ACBAb भाषित०। | Ab ०मात्रया। | Ab सर्व्वपरप्रवादिविजयो भवेत्। | A ०चन्द्न० | Ab ०म्बजसं०

सर्व्वालङ्कार सम्पूर्णां भावयेन्नाभिमण्डले ।
अंकारज्ञान सम्भूतां परमानन्दकारिणीम् ॥
समयसत्त्वं निष्पाद्य ज्ञानसत्त्वन्तु भावना ।
षण्मासाभ्यासयोगेन प्रज्ञापारमिता भवेत् ॥
मन्त्रराजप्रयोगेण सर्व्वशास्त्र विशारदः ।
लक्षजापप्रयोगेण शतश्लोकं दिने दिने ।
करोति चाप्रयत्नेन शतग्रन्थं च धारयेत् ॥

तत्र मन्त्रपदानि भवन्ति— ॐ पिचु पिचु प्रज्ञावर्द्धनि ज्वल ज्वल मेधावर्द्धनि धिरि धिरि बुद्धिवर्द्धनि स्वाहा । अनेन मन्त्रेण सप्ताभिमन्त्रितं कृत्वा अयाचितमारनालं षण्मासं यावत् पिबेत् । महाप्राज्ञो भवति । ॐ प्रं स्वाहा अयं मन्त्रः । अक्षोभ्यमुद्रिता चेयम् ।

॥ इति शुक्लप्रज्ञा पारमितासाधनम् ॥

---

[1] ०भुधिनाङ्गो Ab ०निष्पन्नां ।
AN समयं सत्त्वमत्त्वं विनिष्पाद्य, C सत्त्वमत्त्वं etc., B समयमत्त्वं विनिष्पाद्य

[2] C भावयेत् । ANC ०मन्त्र० ।

[3] AC श्लोका, N श्लोकां, B श्लोकान् ।
A त्रिद्रिभि, N द्रिभि, C त्रिद्रि

[4] Ab adds अक्काकरुदिते before अनेन ; this appears to be redundant.

[5] Ba खपा० । Ab यः पिबति प्राज्ञो ।

[6] B अयच्च । B इति प्रज्ञा० Ab प्रज्ञा० ।

152.

पूर्व्वोक्तविधानेनाकारजचन्द्रे पीतधीःकारजविश्वपद्मे पीतह्रःकारमकारादिषोडशस्वरपरिवेष्टितं बहिः ककारादिहाक्षिंशद्वर्णपरिवृतं भावयेत्। ततः श्रीलास्या माल्या नृत्या गीता पुष्पा धूपा दीपा गन्धा इत्यष्टौ योगिनीः। एतत्सकलपरिणामेन ज्ञानचन्द्र उदेति प्रभाभास्वरः तदुपरि पद्मं तदुपरि प्रज्ञापारमितापुस्तकं तदुपरि द्वितीयं चन्द्रमण्डलं तदुपरि द्वितीयपुस्तकम्। सर्व्वमेतत परिणम्य भगवती प्रज्ञापारमिता पीतवर्णा द्विभुजैकमुखी पद्मतथागतमकुटी व्याख्यानमुद्रावती विश्वदलपद्मे चन्द्रासनासीना सर्व्वालङ्कारविभूषिता वामदक्षिणपार्श्वे उत्पलस्थप्रज्ञापारमितापुस्तकधारिणी। मन्त्रः— ॐ आः धीः हुं स्वाहा। पीत ॐकारो ललाटे, शुक्ल आःकारः कण्ठे, पीतधीःकारो हृदि, कृष्णहुंकारो नाभाविति जापकाले चत्वार्य्यक्षराणि अनुचिन्तयेत्।

॥ इति कनकवर्ण प्रज्ञापारमितासाधनं समाप्तम् ॥

---

[1] ACBa ह्रेः०, N ह्रः०।
[2] AC ०ग्रदर्श०; *sic.* ought to be ०ह्यङ्गन०।
[3] A ततस्तोश्री०, NBBa drop श्री०।
[4] A योगिनिः, B योगिनीः; *sic.* ought to be योगिन्यः
[5] A भवति। [6] B ०धारणीमन्त्रः।
[7] B adds ङ after ॐ। [8] ANCAb ञः।
[9] ANCAb ञः। Ba पीत०, C पीतवर्णवर्ण०।

153.

पूर्वोक्तविधानेन शून्यताभावनानन्तरं रक्तपद्मे चन्द्रस्थ-पीतधीःकारपरिणतां प्रज्ञापारमितां पीतां अष्टाभ्या-न्तःस्थजटामुकुटिनीं व्याख्यानमुद्राधरां पुस्तकमहितनीलो-त्पलं वामपार्श्वे धारिणीं षट्रांशुकोत्तरीयां दिव्यवस्त्रा-लङ्कारिणीमित्येवं ध्यात्वा ॐ धीः श्रुतिस्मृतिविजये स्वाहा इति मन्त्रं जपेत् ।

॥ पीतवर्णसंक्षिप्त प्रज्ञापारमितासाधनं समाप्तम् ॥

154.

प्रज्ञापार॰मितायै नमः ।

प्रज्ञापारमिताया योगं तदुच्यते । पूर्वोक्तविधानेन स्वहृदि मितारविन्देन्दुमण्डले मितप्रंकारं विन्यस्य तथैव पूर्ववत् सर्वं विधाय पँकारपद्मपरिणतां भगवतीं द्विभुजां एकमुखां शुक्लां आगमाधिगमरूपां रत्नमकुट-धारिणीं प्रज्ञापारमितापुस्तकाङ्कितकमलद्वयां वाम-

[1] A omits. B ०ध्याम्नां ।
A ०संक्षेप०, B संक्षिप्त० ।
[3] From the *Namaskāra* to तदुच्यते is found only in Ab.
[4] A ०प्र०, N ०प्रा०, C ०पं०, Ab ०पं० ।
[6] A यं०, Ab प्रं०, B प्र०
[7] रत्नमुकुटधारिणीं after शुक्लां is wrongly added in Ab.
[8] Ab ०गमात्मकां, A ०गममुरूपां, C ०गमसरूपां ।

दक्षिणपार्श्वयोरन्तरुत्थितं मन्थार्य्य कराभ्यां व्याख्यान-मुद्रामाबद्ध्य मितपद्मचन्द्रे वज्रपर्य्यङ्किनीं नवयौवनोद्धतां विचित्रवस्त्रालङ्कारभूषितां प्रतिभाममाचां प्रस्फुरन्नाना-रश्मिसमूहैर्गगनमापूरयन्तीं प्रदीपमालामिवाप्रतिघां अनेकप्रज्ञापारमितास्फुरणसंहरणयोगेन सर्व्वमेकस्वभा-वाधिमोक्षेण च तावद् भावयेत् यावत् प्रज्ञापारमितां साक्षान्न कुर्य्यात्। तत औद्धत्यं यदा भवेत् तदा मितपद्मं नामाग्रे चणकप्रमाणमालिखितमिव विभाव्य तत्रस्थां प्रज्ञापारमितां अतिसूक्ष्मां मुक्तरूपां एकाग्रमनाः पुनः पुनराकलयन् भावयेत्। तच्च उत्पत्तिपक्षे मन्त्रः ॐ प्रं स्वाहा, निष्पन्नपक्षे मन्त्रोऽस्तीति परमार्थक्रमः प्रज्ञापारमितायोगोपदेशलभ्यः।

महद्दत्तस्य पुत्रेण कुलनाम्ना च यत्नतः।
लिखितं साधनं स्पष्टं सर्व्वमन्त्रार्थहेतुतः॥

॥ इति मितप्रज्ञापारमितासाधनं समाप्तम् ॥

AC ०रन्तरस्थित०
AC ०भां ;
AC उद्धत्यं ;
Ab omits.
B तत उ०, NC ततो उ०, A तदु०
A निष्पत्तिक्रम०, C निष्पन्नम०, B निष्पन्नपक्षेण ;
Ab ०मितोपदेश्य० ;
A कुलन्नामाभयन्तनः
B omits सित०
Ab ०पूर्य्यन्तो ;
AC ०मोक्षणचेतोवद्धा०
AN ०सूक्ष्मां मुक्त०
Ab ०वलोकयन् ;
A मूचेण ;
AC पुस्तकं ;

155.

प्रज्ञापारमितादेव्या राजते भावनाविधुः ।
यस्योदयेन निद्रान्ति वादिनां मुखपङ्कजम् ॥

कृपावान् सुखासनस्थो योगी स्वहृदि शुक्लपेकार-परिणतं पद्मं ततश्च अभवं चन्द्रमण्डलं तच्च शुक्लमकारं ततो निर्गतै रश्मिभिः नभसि गुरुं प्रज्ञापारमितां बुद्ध-बोधिसत्त्वांश्च पश्येत् । तान् बीजनिर्गतान् पूजोपहारेण पूजयेदिति पूजा । एवं वन्दना त्रिशरणगमनं पाप-देशना अकरणसंवरः पुण्यानुमोदना आत्मनिर्य्यातनं पुण्यपरिणामनं बोधिचित्तात्पादो जिनमार्गाश्रयणम् । पर-मोक्षमभ्युदिच्छा मैत्री, परदुःखापनयनममोहा करुणा, मोदन्तां सत्त्वा इत्याकारा मुदिता, मित्रो दासीनश्चपु अनुनयप्रतिघविरहा कारा संस्काराममतया सत्त्वमाच-मेतदित्याकृतिरुपेक्षा इति चिन्तयेत् । ततः शून्यता । शून्यताबोधको मन्त्रः, ॐ शून्यताज्ञानवज्रस्वभावात्मको-ऽहमिति । ततः पद्मं ततः चन्द्रं विभाव्य तन्मध्ये बीजं ततः शुद्धस्फटिकघटितां भगवतीं एकाननां कृष्णोर्द्ध चर्च्चर-केशपाशां द्विभुजां कृतपर्य्यङ्कां रक्ताधरपाणिपादतलां

[1] A गेवना० ; [2] AC ०पायेन ;
[3] AC प० ; [4] NBa अं० ;
[5] N शुभ्र० ; [6] N ०तेन ;
[7] A ०नानि [8] AC सत्त्वा इत्यानं ;
[9] AC परममुखं०, NC परमुख०, Ba परममोक्ष्य० ;
[10] A ०दान०, C ०दाय० [11] A ०ह्यान्ता ;
[12] शून्यता० is dropped in ANC. [13] AC ०वर्द्धन ;
[14] AC ०धरं ; [15] AC ०धरां ;

सर्व्वालङ्कारभूषितां शुभ्राम्बरधरां मनोरमरक्तकमलस्थित-दक्षिणपाणिपल्लवां तदन्यकरेण हृदयविलिखितपुस्तकां आत्मानं प्रज्ञापारमितास्वभावमुत्पाद्य नाभिमण्डलं एवमपरामपि भगवतीं सर्व्वालङ्कारधारिणीं भावयेत्। अन्यास्य हृदि पद्मे चन्द्रबीजं ततः स्फुरन्तीभिः प्रभाभिरङ्कुशाकाराभिरनादिमंमिङ्गं भगवतीं जः इति मन्त्रेणाकृष्य समभ्यर्च्च हूँ इति प्रवेश्य वं इति बद्ध्वा होः इति मन्त्रोपयेत्। तदनु बीजात् स्फुरणेन निर्गतान अनेकलोकधातुस्थान[1] सत्त्वानामर्थं कृत्वा अनन्तान् प्रज्ञापारमितानिर्म्माणकायान पुनस्तच तान् संहरन् भावयेत्। खिन्नः स्फुरणं संहृत्य भगवत्यहङ्कारेण व्यवहरेत्। एवं मध्यमन्यायां अवमानमन्यायां तु स्फुरणं विभाव्य आहृत्य तदहङ्कारेण मृष्यादिति। पुनः प्रभातमन्यायां मुःकारेण विसृज्य तथैव भावयेत्। तचायं जपविधिः। हृद्बीजाक्षरमध्याद् बहिर्देवीमुखविवरेण निःसृतानि नाभिमण्डलेन तचैवानुप्रविष्टानि स्फटिकाक्षमालाकाराणि शुक्लानि मन्त्राक्षराणि स्फुरणमुपसंहृत्य देवताहङ्कारेण जपेत्। तचायं जप्यो मन्त्रः— ॐ पिचु पिचु प्रज्ञावर्द्धनि ज्वल ज्वल मेधावर्द्धनि धिरि धिरि बुद्धिवर्द्धनि स्वाहा। एवं भावयन् योगी अचिरेणैव कालेन सर्व्वशास्त्रकोविदो भवति। इति प्रज्ञापारमिताभावनाक्रमः।

[1] AC add ङ्ग after ०करेण। [2] ANC पद्मचन्द्र०
[3] A समयाभ्यर्च्च।
[4] After this AC repeat ०च्च समभ्यर्च्च.....सन्तोषयेत्
[5] ०सन्त्या० is dropped in C. [6] A पुष्या०।
[7] A omits.

विधायासादितं पुण्यं प्रज्ञापारमितोदयम् ।
यत् तेनेदं जगद् भूयात् प्रज्ञापारमितोदयम् ॥

॥ शुक्लप्रज्ञापारमितासाधनम् ।
। कृतिरियं पण्डितश्रीपद्मवर्द्धनपादानाम् ॥

156.

स्वहृदये अकारोत्थचन्द्रमण्डले धीःकारं विन्यस्य तस्माद् विनिर्गतरश्मिभिर्गुरुबुद्धबोधिसत्त्वान् सञ्चोद्यानीयाग्रतो विचिन्तनोपविष्टान् दृष्ट्वा मनसा वन्दनापूजापापदेशनापुण्यानुमोदनाशिशरणगमनबोधिचित्तोत्पादपुण्यपरिणामनाक्षमापनाः कुर्य्यात्। ततो मैत्रीकरुणामुदितोपेक्षाभावनाः। ततः शून्यताज्ञानवज्रस्वभावात्मकोऽहं इत्युक्त्वा शून्यतां भावयेत्। ततस्तदेव चित्तं झटिति चन्द्रस्थधीःकारं दृष्ट्वा तत्परिणतां प्रज्ञापारमितां जटामुकुटिनीं चतुर्भुजां एकमुखीं हस्तद्वयेन धर्म्ममुद्राधरां[1] नानारत्नाभरणभूषितां सुवर्णवर्णोज्ज्वलां वामभुजाभक्तप्रज्ञापारमितान्वितनीलोत्पलधरां विचित्रवस्त्रपरिधानोत्तरीयां दक्षिणहस्तेनाभयप्रदां रक्तपद्मोपरि चन्द्रासने वज्रपर्य्यङ्कस्थां भगवतीं विभाव्य ततो दृढाहङ्कारं कुर्य्यात्

[1] AC यत्न० ।
[2] धर्म्ममुद्रा० which is found in all MSS seems to be a contracted form of धर्म्मचक्रमुद्रा ।

या भगवती प्रज्ञापारमिता माऽहं योऽहं मा भगवती प्रज्ञापारमिता। ततो मन्त्रन्यासं कुर्य्यात्। कण्ठे ॐ धीः, जिह्वायां ॐ गीः, कर्णयोः ॐ ज्रीः। ततः स्वहृदये रक्तआःकारोद्भवरक्ताष्टदलपद्मं कर्णिकाकेशरान्वितं विचिन्त्याक्षराणि विन्यसेत् मनसा पद्मपत्रे कर्णिकायां च पीतानि। पूर्व्वपत्रे नमः, आग्नेय्यां पत्रे भगवत्यै, दक्षिणपत्रे प्रज्ञापारमितायै, नैर्ऋत्यां अमृतगुणायै, वारुणपत्रे भक्तिवत्सलायै, वायव्यपत्रे सर्व्वतथागतज्ञानपरिपूरितायै, कौवेरपत्रे सत्त्ववत्सलायै, ऐशानपत्रे तद्यथा, ॐ धीः कर्णिकायां, पूर्व्वेण श्रु, आग्नेय्यां ति, दक्षिणे स्मृ, नैर्ऋत्यां ति, वारुणे वि, वायव्ये ज, कौवेरे ये, ऐशाने स्वाहा, एवं मन्त्राक्षराणि विन्यस्य जपेत्। एतान्येवाक्षराणि विचिन्तयेत्। त्रिसन्ध्यं अष्टसहस्रं वा षण्मासान् यावत्, संवत्सरं वा, ततः श्रुतिधरो भवति।

॥ कनकवर्णप्रज्ञापारमितासाधनं समाप्तम् ॥

C जीः।
A पूर्व्वपत्रे।
AC श्मशानासनो।
AC पद्मान्ते।
A omits दक्षिणे स्मृ

157.

क्वचिन्मनोरमे स्थाने निषद्य च सुखासने ।
मैत्रीकृपान्वितो योगी मन्त्रमुच्चारयेत् त्रिधा ॥

ॐ शून्यताज्ञानवज्रस्वभावात्मकोऽहम् ।
इति स्थिरचलान् भावानात्मदेहं च सर्व्वथा ।
शून्यं विभाव्य चित्तेन स्वप्ने स्वप्नसमेन तु ॥

[1]पँकाराक्षरनिष्पन्नपद्मचन्द्रासनस्थितं पीतधीःकार-मारोप्य तेनात्मानं भगवतीं प्रज्ञापारमितां द्विभुजां विचित्रभूषणां विचित्रवस्त्रधरां व्याख्यानमुद्रया समुपेत-सत्कराम्—

शृङ्गारैकरसोपेतां वज्रपर्य्यङ्कसंस्थिताम् ।
सपुस्तकनीलाब्जं [च] बिभ्राणां वामपार्श्वतः ॥
शिरःकण्ठहृदये[षु] स्थानेषु चन्द्रसंस्थितः ॥—

चितत्त्वकं ॐ आः हूँ,

ॐ आःकारयोर्म्मध्यचन्द्रे धीःकारं पीतरश्मिकम् ।
विभाव्य च ततः पीतां रूपिणीं भावयेद्[त] [व्रती] ॥

प्रज्ञां प्रज्ञापारमितां प्रज्ञासम्वृतियोगतः ।
परमार्थं गतं रूपं वक्ष्ये प्रज्ञात्मकं महत् ॥
यन्निष्ठां प्राप्य सम्बोधिर्जायते क्रमयोगतः ।
विभाव्य मितं चित्तेशं शरच्चन्द्रसमप्रभम् ॥

[1] AC वा ।
[2] AC ॰हृदयान्वितो
[3] AC भवाना॰, N तावाना॰ ।
[4] Ba यं॰ ।
[5] N ॰सुस्थितां ।
[6] AC ॰विलाक्षाचित्राणा॰ ।
[7] AC drop ॐ ।
[8] C omits ॰पारमितां प्रज्ञा॰, AN omit प्रज्ञा ।
[9] Ba ॰सङ्गतं ।

विश्वं सचराचरं तादृक् पश्चात् तदपि [1]खोपमम् ।
निःशेषकल्पनाशून्यं स्वयं शून्यमरूपि वा ॥

रूपशब्दगन्धरसस्पर्शादिग्राह्यग्राहककल्पनैरनालिप्तं चाचिन्त्यप्रत्ययोदयं [2]सम्यक्सम्बोधिपदं चित्तं सर्व्वज्ञतापदम् । तत्रायं जप्यमन्त्रः ॐ प्रज्ञे महाप्रज्ञे श्रुतिस्मृतिविजये धीः स्वाहा । प्रज्ञापारमिताभावनां कुर्व्वता मया यत्पुण्यमवाप्तम्—

तेनास्तु निखिलो लोकः प्रज्ञापारपरायणः ।

॥ प्रज्ञापारमितासाधनम् ॥

158.

प्रथमं तावत् साधकः सुखासनस्थितः स्वहृदि प्रथमस्वरपरिणतचन्द्रमध्ये धीःकारं विभाव्य तस्माद् विनिर्गतपुष्पादिभिर्भाव्यमानां भगवतीं हृद्बीजगर्भस्तुतिभिरानीय तां स्वपुरःस्थितां सम्पूज्य तस्याग्रतः पापदेशनादिकं कुर्य्यात् । तदनन्तरं चतुर्ब्रह्मविहारभावनापूर्व्वकं मुहूर्त्तं शून्यतां भावयेत् । मन्त्रः, ॐ स्वभावशुद्धाः सर्व्वधर्म्माः स्वभावशुद्धोऽहमिति । पश्चादाकाशदेशे प्रथमस्वरपरिणतचन्द्रमण्डले पीतधीःकारमकारादिषोडशस्वरपरि[3]वृतं ततः

---

[1] N खोपगं ।
[2] AC ०स्वाचित्त० ।
[3] Ba ज्ञाप० ।
[4] C च ।
[5] AC ०दकं ।
[6] AC ०ज्ञातं, N ०हृत्तं ।

ककारादिद्वार्चिंशद्वज्रनावलिपरिकलितं धीःकारपरिणामेन प्रज्ञापारमितापुस्तकं बीजोपलक्षितं विभाव्य सर्व्वं परिनमय्य भगवतीं प्रज्ञापारमितां पीतवर्णां विश्वपद्मासने वज्रपर्य्यङ्किनीं द्विभुजामेकमुखीं व्याख्यानमुद्रावतीं सर्व्वालङ्कारभूषितां रत्नमुकुटिनीं वामपार्श्वस्थितपद्ममध्ये प्रज्ञापारमितापुस्तकधारिणीं भावयेत्। पीतओंकारो ललाटे, शुक्लाःकारः कण्ठे, पीतधीःकारो हृदि, कृष्णहुँकारो नाभौ। जपमन्त्रः ओं आः धीः हुं स्वाहा।

॥ कनकवर्णप्रज्ञापारमितासाधनम् ॥

159.

प्रज्ञापारमिताज्ञानमद्वयं सा तथागतः।
साध्यतादर्थयोगेन तच्छब्दं ग्रन्थमार्गयोः॥
प्रज्ञापारमितां नत्वा बोधिबीजमनुत्तरम्।
लिख्यते साधनं तस्या अद्वयज्ञानसिद्धये॥

आदौ तावन्मन्त्री समाहितो भूत्वा प्रज्ञापारमितां हृदि कृत्वा चन्दनेन मण्डलकं कृत्वा तद्भवां गोमयेन तच मध्ये अक्षोभ्यमुद्दिश्य पुष्पं दद्यात् अनेन मन्त्रेण ओं नमोऽक्षोभ्याय हुं ओं वज्रपुष्पे हुं स्वाहा। एवमक्षोभ्याय हुं इति बीजाक्षरमुच्चार्य्य अन्येभ्योऽपि ओं वज्रपुष्पे

[1] A तच्छब्दं, C तच्छब्दं। [2] AC चन्द्रन।
[3] AC भ्रमयेत्। [4] ओं ओं are dropped in AC.
[5] AC omit ओं वज्रपुष्पे हुं स्वाहा।

हुँ स्वाहा, ॐ वज्रधूपे हुँ स्वाहा, ॐ वज्रगन्धे हुँ स्वाहा, ॐ वज्रदीपे हुँ स्वाहा, ॐ वज्रनैवेद्ये हुँ स्वाहा, इति सर्व्वं दातव्यम्। तस्याग्रतः ॐ नमो वैरोचनाय ॐ, ॐ वज्रपुष्पे हुँ स्वाहेति, तथास्यैव दक्षिणे पार्श्वे ॐ नमो रत्नसम्भवाय त्रां ॐ वज्रपुष्पे हुँ स्वाहा, तथा पश्चिमे ॐ नमोऽमिताभाय ह्रीः ॐ वज्रपुष्पे हुं स्वाहा, तथा वामे ॐ नमोऽमोघसिद्धये ॐ खं ॐ वज्रपुष्पे हुं स्वाहा, इत्थमेषां पूजां कृत्वा वैरोचनरत्नसम्भवयोर्म्मध्ये लोचनादेवीः पूजयेत्। ॐ नमो लोचनायै लों ॐ वज्रपुष्पे हुं स्वाहा, रत्नसम्भवामिताभयोर्म्मध्ये ॐ नमः मामकै माँ ॐ वज्रपुष्पे हुँ स्वाहा, पुनरमिताभामोघयोर्म्मध्ये ॐ नमः पाण्डरायै पाँ वज्रपुष्पे हुं स्वाहा, पुनरमोघसिद्धिवैरोचनयोर्म्मध्ये ॐ नमस्तारायै ताँ ॐ वज्रपुष्पे हुं स्वाहा। ततोऽक्षोभ्यस्य स्थाने ॐ नमः प्रज्ञापारमितायै धीः ॐ वज्रपुष्पे हुं स्वाहेति त्रिधा सर्व्वपुष्पादिकं दद्यात्। ॐ सर्व्वतथागतपूजावज्रस्वभावात्मकोऽहमिति नानाविधां दिव्यपूजां कारयेदिति।

मण्डलकर्म्म इदानीं एव चिन्तयति। अमी हि सत्त्वा भवदुःखोपहताः सन्तः पुनः पुनः संसारे संसरन्ति। अहोबत कष्टमेषामिति करुणाचित्तमुत्पाद्य एवं हृदि

[1] A ङ।
[2] Ba omits वैरोचन०....०म्भवयो
[3] Instead of रत्न०....०म्भवयो, Ba has नैऋते।
[4] A omits ॐ नमः, C omits नमः।
[5] Instead of पुन०.....०म्भवयो, Ba has पुनर्वायव्ये।
[6] A omits.
[7] ॐ नमः dropped in A.
[8] AC भगव०।

करोति। प्रज्ञापारमितायोगमागम्यानु त्तरां सम्यक्सम्बोधिं प्राप्य एतेऽपि मया तत्र व्यवस्थापयितव्या यथैषां पुनर्दुःखं न भवति, संसारात् मुच्यन्ते, सुखिताश्च भवन्तीति प्रणिधानलक्षणं चित्तमुत्पादयति। ततः स्वहृदि नीहारहारहरहासनिभं शुभ्रममृतराशिमिव चन्द्रमण्डलं पश्येत्। ततो धीःकारं कनकवर्णमहश्रं अनेकरश्मिशतसहस्रदीपितत्रिमाहस्रलोकधातुं अनेकबुद्धकोटिनियुतशतसहस्राणि विस्फुरितानि द्रष्टव्यानि। अत्रैव प्रज्ञापारमिताऽपि लोचनाद्याश्च देव्यः कल्याणमित्रश्च अनेकाश्च पुष्पधूपदीपगन्धनैवेद्यचक्ररत्नगजरत्नाश्च, रत्नस्त्रीरत्नपुरुषरत्नादयश्च; तद्देषां बुद्धानां भगवतां सर्व्वासां च देवीनां कल्याणमित्रस्य च दिव्यपूजामेघैरेव मनोनिर्य्यातैः पुष्पादिभिः कुर्य्यात् आत्मनिर्य्यातनां त्रिशरणगमनं पापदेशनां पुण्यानुमोदनां च। ततो बुद्धा भगवन्तो लोचनाद्याश्च देव्यो विस्फुरन्ति संहरन्तीति अनिशं ध्यायात्। एवं ध्यायतः प्रस्थानलक्षणं चित्तमुत्पद्यते।

ततः ॐ स्वभावशुद्धाः सर्व्वधर्म्माः स्वभावशुद्धोऽहमिति गाथा पठितव्या। तत आत्मानमेकमेव पश्यन्नन्तरीक्षगतं स्फुरदमृतपुञ्जमिव निर्म्मलं पूर्णिमाचन्द्रमिव मकलकलाकलापपरिपूर्णं देदीप्यमानं तत ॐ शून्यताज्ञानवज्रस्वभावात्मकोऽहमिति पठितव्यम्। पश्यन्नात्मानं न रूपं

[1] A योगम्यानु०। [2] A प्राप्यते।
[3] A च्यते। [4] A व्वीति।
[5] AC तुष्ट०। [6] व्दीप० is omitted in A.
[7] AC व्वतीं। [8] AC दिव्यां।
[9] A व्वन्ति। [10] AC गाद्येयम्प०। [11] AC अरूपं

न सन्नामपीति किन्तर्हि स्फुरदालोकपुञ्जमिव केवलमित्येवं ध्यात्वा पुनरकारपरिणतं चन्द्रमण्डलं ततो धीःकारं [2]तादृशमेव विचिन्त्य तत्परिणत्या[3] विश्वपद्मं तन्मध्ये [4]हःकारो द्रष्टव्यः, अकारादिषोड़शस्वरवेष्टितः तथा ककारादिहाक्षिंशद्वर्णैः[5]। हःकारादयः सर्व्वशुक्लाः। तथाऽस्यैव दले खास्या-माखा-गौता[6]-नृत्या-पुष्पा-धूपा-दीपा-गन्धाद्यष्टयोगिनीभिर्वेष्टित एतत् सर्व्वमपि परिणम्य ज्ञानचक्रमुत्पद्यते। ततो जायते पद्मं तस्योपरि प्रज्ञापारमितापुस्तकं पुनरप्यु[7]परि चन्द्रमण्डलं ततोऽपि प्रज्ञापारमितापुस्तकं द्वितीयम्। पुनरेतत् सर्व्वं परिणम्य विश्वदलपद्मस्थिता व्याख्यानमुद्रान्विता कनकवर्णा सुरूपा सर्व्वाङ्गैस्तथागतैः कृता[8]लङ्कारा वामदक्षिणे चोत्पले प्रज्ञापारमितापुस्तकद्वयं बिभ्रती पञ्चतथागतमुकुटा बुद्धबोधि[9]सत्त्वपरिवृता प्रज्ञापारमिता उपजायते। तदीदृशी प्रज्ञापारमिता भावयितव्येति। यदा तु [10]ध्यातुं न [11]पार्य्यते तदा मन्त्रजापः कर्त्तव्यः अनेन मन्त्रेण ॐ आः धीः हुँ स्वाहा। जापकाले च ॐकारः पीतो ललाटे द्रष्टव्यः, तथा शुक्लआःकारः कण्ठे, पुनः पीतधीःकारो हृदि, हुँकारश्च नीलो नाभाविति।

[2] Ba ०रमेव। [3] Ba तादृग्रं।
[4] AC ०गत०। [5] AC हका०।
[6] The reading ०व्यञ्जनैः occurs also in many places.
[7] गौता is dropped in AC.
[8] C omits ०परि...सर्व्वं। [9] AC ०गतज्ञता०।
[9] AC ०सत्त्वसुत०। [10] AC ध्यानं। [11] AC पर्य्यायते

प्रज्ञापारमिताद्देवीमीदृशीं भावयन्ति ये ।
सर्व्वज्ञं हि पदं धीराः प्राप्नुवन्ति न संशयः ॥

॥ प्रज्ञापारमितासाधनं समाप्तम् ।
। कृतिरियं आचार्य्यासङ्गपादानाम् ॥

160.

[1]प्रज्ञापारमितामेव प्राप्तप्रज्ञाश्रयोदयाम् ।
प्रज्ञाप्रख्यातसत्कीर्त्तिं तां प्रज्ञां प्रणमाम्यहम् ॥

इतरं बोधिसत्त्वानां सुगतं गतकिल्बिषम् ।
प्रज्ञाप्राप्ताग्रनिर्व्वाणं नमामि करुणात्मकम् ॥

या सर्व्वज्ञतया नयत्युपशमं शान्त्यैषिनः श्रावकान्
या मार्गज्ञतया जगद्धितकृता लोकार्थसम्पादिका ।
सर्व्वाकारमिदं वदन्ति मुनयो विश्वं यया सङ्गता
तस्यै श्रावकबोधिसत्त्वगणिनो बुद्धस्य मातृ नमः ॥

॥ [प्रज्ञापारमितास्तुतिः] ॥

---

[1] These three Ślokas are found only in Ba.

161.

नमो वज्रसरस्वत्यै ।

नत्वा वज्रसरस्वतीं गुणमयीं संबुद्धवाणीन्ददां[1]
स्फूर्ज्जद्दुर्ज्जयवादसुन्दररसां स्वाराधकानां[2] हिताम् ।
घोराज्ञानतमोऽपहां भवभिदं[3] तस्याः समाराधनं
वक्ष्ये मत्त्वहिताय [4]सूक्तविधिना दुर्बोधबुद्धिं प्रति ॥

आदावेव मुखादिशुद्धिमगमत्[5] प्रातः कृपावान् क्षमी
मैत्रीमोदमदेन यो[6] मुदितवान्[7] मन्त्री शुचा[8] वासने ।
[9]स्थाने चापि मनोहरे रहसि वा दृष्ट्वा स्वहृत्पङ्कजं
तस्मिन् निर्म्मलमाँभवं[10] शशधरं सम्भावयेत् तच्च च ॥

दोःकारं किरणैर्हिगन्तरमितश्चापूरयन्तं ततो
दृष्ट्वा बुद्ध[11]समूहमग्रत इदं पूजादिकं भावयेत् ।
पुष्पाद्यैरथ वन्दनां पुनरसौ पापप्रकाशं तथा
पुण्यानामनुमोदनां त्रिशरणं सम्यग् व्रजेन्मन्त्रवित् ॥

इत्याद्यप्रणिधानतः सुकृतिनं चा[12]त्मानमालम्ब्य सः ।
शून्यं सर्व्वविकल्पजालमखिलं विश्वं ततो भावयेत् ॥
एकानेकवियोगवत्परिकथाशुद्धं च सं[13]ज्ञानवित्
पठेत् - - ॐ शून्यताज्ञानवज्रस्वभावात्मकोऽहम् ॥ (!)

---

[1] A वाणीमुदां । [2] AC कारां ।
[3] AC भवतोदं, N भगवतो । [4] AC युक्त० ।
[5] AC ०मगति । [6] AC ०मदनया ।
[7] Ab मुदितो । [8] A तुचा० । [9] N omits.
[10] A ०मातरं, N ०तमात्, C ०माईवं, Ba ०मार्तवं ।
[11] Ab मूर्त्त० । [12] Ba ०मुचा ।
[13] A omits च सं०, BAb सद्०, N गतं ।

शून्योद्भूतसरोजचन्द्रनिहितं दोः[1]कार[2]रक्तं पुनः
नानारश्मिसमूहसुन्दरतरं तेनाष्टपत्राब्जम्[3] ।
तस्माद् रक्तमहाद्युतिं भगवतीं सद्भूषणालङ्कृतां
प्रत्यालीढपदस्थितां चिवदनां षड्बाहुभि[4]र्भूषिताम् ॥

सव्ये नीलमुखां बिभर्त्ति च करे पद्मासिकर्त्रौ[5] स्व वै
वामे शुक्ल[6]मुखां च पात्रसहितां सद्रत्नचक्रं तथा ।
हृत्पद्मस्थितचन्द्रमध्यनिहितं तस्यास्व दोर्भास्वरं[7]
नानाज्ञानतमोऽपहैश्व किरणै[8]रापूर्य्यमाणं जगत् ॥

संहृत्य स्वहृदीन्दुबीजविहितां दृष्ट्वा पुनर्निःसृतिं
तस्यैवेति मुहुर्मुहुः प्रतिदिनं ध्यायात् सदाऽतन्द्रितः[9] ।
ध्याने खिन्न इतीह बीज[10]समयैः संहृत्य मन्त्रानसौ
हारादोलदिवाकरक्रममरन् मन्त्रं जपेदीदृशम् ॥

ॐ पिचु पिचु प्रज्ञावर्द्धनि ज्वल ज्वल मेधावर्द्धनि धिरि धिरि बुद्धिवर्द्धनि स्वाहा ।

देवीरूपमनाः[11] सदा प्रमुदितः सन्ध्यासु सर्व्वासु वै
मन्त्रं संपरिजप्य सूक्तविधिना सच्चार्थहेतोरिमम् ।
पुण्यं वा परिणाम्य कार्य्यकरणे ध्यानैकनिष्ठश्चरेद्
यावन्न क्षमपूरितं भवति चापूर्णे[12] च कर्म्मक्रमः ॥

---

[1] Ba हो०
[2] Ab ०पत्रपद्मजं ; this seems to be a better reading but it spoils the metre.
[3] A पद्माहवि०, N षडधातुभि० ।
[4] Ab पीत० ।
[5] CBBa ०सुरं, Ab ०सुरां ।
[6] A खड्ग० ।
[7] A ०विष्टिति, Ab निहितं ।
[8] B तन्मतः ।
[9] ANCAb ध्यानात् ।
[10] A ०समाज, N ०समजे, BBa ०समवे ।
[11] A ०मनाभः ।
[12] Ab ०पूर्ण ।

सर्व्वाकारविपक्षतामुपगतो ध्यानं करोत्येव स[1]
युक्तायां प्रतिपद्यतीव सुमना यावच्छशाङ्कस्थितिः ।
तावत् संस्कृतमेव वै प्रतिनिशं यावत् सुपूर्णः शशी
तस्यामेव च निःश्वासो[2] भवति वै सिद्धः कविर्दुर्ज्जयः ॥

श्रीमत्कृष्णयमारितन्त्र[3]निहिता श्रीकृष्णराजेन या
श्रीमद्वज्रसरस्वती[4] भगवती तस्याः समाराध[5]नम् ।
सत्त्वानां हितहेतवे रचयता पुण्यं मया साम्प्रतं
प्राप्तं तेन जनोऽस्तु कृष्णसदृशो दुर्व्वार[6]सिद्धः कविः ॥

अकारि श्रीधरेणेदं साधनं बौद्धयोगिनाम्[7] ।
श्रीमद्वज्र[8]सरस्वत्या [9]विध्वस्तध्वान्तमान्तरम्[10] ॥

॥ आर्य्यवज्रसरस्वतीसाधनम् ॥

---

[1] Ab ०त्यवस्थ ।
[2] Ab ०विहिता ।
[3] A ०साध० ।
[4] AC ०योगिनों ।
[5] ANC धन्यवार्थान्त० ।
[6] A ०मन्तरं, C मन्तरं, Ab ०मातरं ।
[7] B निश्चेलो ।
[8] ACBa omit.
[9] ACAb ०सिद्धः ।
[10] AC श्रीवज्र० ।

162.

सरस्वत्यै नमः।

पूर्व्वोक्तविधानेन शून्यतां यावदभिमुखीकृत्याधिष्ठाय च सितकमलं सप्तहस्तप्रमाणं तदुपरि शशिमण्डलं तन्मध्ये ह्रीःकारं शुक्लं तेन सितकमलं स्वबीजगर्भं भावयेत्। तेन च भगवतीं महासरस्वतीमनुविचिन्तयेत् शरदिन्दु-[2]कराकारां सितकमलोपरि चन्द्रमण्डलस्थां दक्षिणकरेण वरदां वामेन सनालसितसरोजधरां स्मेरमुखीमतिकरुणा-मयां श्वेत[3]चन्दनकुसुमवसनधरां मुक्ताहारोपशोभितहृदयां नानारत्नालङ्कारवतीं द्वादशवर्षाकृतिं मुदितकुचमुकुल-दन्तुरोरस्तटीं स्फुरदनन्तगभस्तिव्यूहावभासितलोकचयाम्। ततस्तत्पुरतो भगवतीं प्रज्ञां दक्षिणतो मेधां पश्चिमतो मतिं वामतः स्मृतिं एताः स्वनायिकासमानवर्णादिकाः सम्मुखमवस्थिताश्चिन्तनीयाः। ततः स्वनाभिप्रदेशे चन्द्र-मण्डले सितमों[4]कारं ध्यात्वा ततो निस्सरन्तीमशेष-वाङ्मयमाला[5]मविच्छिन्नप्रवाहां चिन्तयन् मन्त्रमावर्त्तयेत्। तचायं मन्त्रः— ॐ ह्रीः महामायाङ्गे[6] महासरस्वत्यै नमः। एवं पोषधिको भूत्वा मौनादवतिष्ठन् निरन्तरं देवता-हङ्कारमुद्वहन् मन्त्रमप्यावर्त्तयन्ननन्यकर्म्मा मासेन [7]सार-

---

[1] AC पूर्वविचि०।
[2] ०कारा० omitted in B.
[3] A ०चन्द्रेन।
[4] AC मां०।
[5] AC ०मविच्छिन्न, AbBa ०वच्छिन्न।
[6] B takes this महासरस्वत्यै नमः as the beginning of a new *Sādhana*.
[7] AC add प्रसार० before सार०; AC read सर०।

स्वतीं वाणीं लभते। मासत्रयेण ब्रह्मघ्नोऽपि सिध्यति। षण्मासैः सरस्वतीसमो भवतीति। अथ भैषज्यमुच्यते—

अजाक्षीराभयाव्योषपाठो[1]ग्रासिग्रुसैन्धवैः।
सिद्धं [2]सारस्वतं सर्प्पिः पिबेत् सप्ताभिमन्त्रितम्॥

चतुर्गुणे अजाक्षीरे घृत[3]प्रस्थं विपाचयेत्।
औषधैः [4]पलिकामात्रैः श्लक्ष्णैर्मृद्वग्निना सुधीः॥

[5]मात्रयं प्रयुञ्जीत वाणीं प्राप्नोत्यनुत्तराम्।
षण्मासोपयोगेन साक्षाद् वागीश्वरो भवेत्॥

मत्तकोकिलनिर्घोषो जायते मधुरस्वरः।
संशयो नेह कर्त्तव्यो विचित्रा भावशक्तयः॥

॥ इति महासरस्वतीसाधनम्॥

163.

पूर्व्वोक्तविधानेन [6]हृदि रक्तसरोजचन्द्रे रक्तदो[7]कार-बीजपरिवृतरक्ताष्टदलकमलं स्वबीजगर्भं तत्परिवृतां भगवतीं वज्रसरस्वतीं त्रिमुखां षड्भुजां सर्व्वाङ्गरक्तां त्रिनयनां नीलसितदक्षिणवाममुखीं पद्मखड्गकर्त्रिधर-

---

[1] B ०ग्रानैग्रा०।
[2] AC सारखतं।
[3] ANCBa ०प्रस्थं।
[4] A पालिका०, Ba परिका०।
[5] Ba ०मात्रं।
[6] A omits.
[7] ०हो० in Ba.

दक्षिणकरां [1]कपालरत्नचक्रधारिवामकरां प्रत्यालीढपदां कुमारीं नवयौवनवतीं नानालङ्कारधरां हृदयाधिष्ठित-चिह्नबीजेन परार्थकरणोत्सुकां आत्मानं विभाव्य ॐ पिचु पिचु प्रज्ञावर्द्धनि ज्वल ज्वल मेधावर्द्धनि धिरि धिरि बुद्धिवर्द्धनि स्वाहा इति मन्त्रं जपेत् ।

॥ वज्रसरस्वतीसाधनम् ॥

164.

नमो वज्रसरस्वत्यै ।

श्रीघनशरदामृतांशोर्निरुत्तरा कौमुदी[2]व या जगतः।
जाड्यतमःशमयित्री सा कुलिशसरस्वती जयति ॥

सोपदेशं समासेन तस्याः साधनमुच्यते ।
दर्शितं डाकिनीवज्रपञ्जरे सर्व्वदर्शिना ॥

स्थाने शुचौ[3] मनोज्ञे च निषण्णस्तादृशासने ।
श्रद्धयाऽनन्यकर्म्मा च ध्यायात् सन्ध्याचयानुगः ॥

दयाप्रभावात् सम्बोधौ कृतप्रणिधिरुद्भुरः[4] ।
स्वप्नमायोपमं विश्वमखिलं कल्पयेत्[5] ततः ॥

हृच्चन्द्रबीजकिरणैरुपनीततथागतान् ।
सम्पूज्य पापमखिलं दिशेद् विश्वहिताशयः ॥

ततः पुनरकरणं प्रतिज्ञाय विधाय च ।
पुण्यानुमोदनां तत्र सम्बोधौ परिणामयेत् ॥

---

[1] B कपाल० ।
[2] ANC कौमुदी च ।
[3] A ०पदेनं ।
[4] AC गुरौ ।
[5] ABa ०खद्भरः ।
[6] ANC कल० ।

रत्नत्रयं च शरणं प्रपद्या[1] बोधिसम्पदः ।
आत्मानं दास[2]भावेन सर्व्वज्ञेषु निवेदयेत् ॥
मैत्र्यादिभावनामेवं कुर्य्याद् द्वेषादिशान्तये ।
ततः किरणसन्दर्भे बीजगर्भे निवेशिनी ॥
सर्व्वाशावदनोद्भासिसितांशुपटलोज्ज्वलाम् ।
पद्मचन्द्रसमासीनां वज्रपर्य्यङ्कशालिनीम् ॥
अर्द्धचर्च्चरभङ्गाङ्ग[3]श्रीसत्केयूरभूषिताम् ।
उन्निद्रारुणराजीवराज[4]त्सव्यकरश्रियाम् ॥
चिचनेपथ्यसौभाग्यां लक्ष्मीख्याताङ्गसम्पदम् ।
प्रज्ञापारमिताभास्वद्वामपाणिसरोरुहाम् ॥
द्विरष्टवत्सराकारां सितवर्णाम्बरामथ ।
चन्द्रबीजादिनिष्पन्नां[5] पश्येदार्य्यसरस्वतीम् ॥
हृदि स्फटिकभीमाभमिन्दुमण्डलमध्यगम् ।
[7]सतारार्द्धविधुप्रायबिन्दुनाद[8]मवस्थितम् ॥
सर्व्वतः स्फुरदुद्दामधाम[9]लक्ष्मीविभूषितम् ।
बिभ्रतीं बीजमँकारं गिरामिव समुच्चयम् ॥
मन्त्रैर्ज्ञःकारादिभिराकर्ष्यादिप्रसाधनोपायैः ।
स्ववपुर्निजाधिदैवतरूपाभिन्नं प्रसाधयेत् तदनु ॥
इमामावेशनिर्माणां जिनानां मूर्त्तिमुद्वहन् ।
अधिबीजं सृजेन्मन्त्री तत्त्वयोगादहर्निशम् ॥

---

[1] Ba ०बोधौ ।
[2] AC दासता० ।
[3] AC ०मेकं ।
[4] AC ०वर्व्वरभूषाङ्गा० ।
[5] ANC ०राजसेव्य० ।
[6] AN ०निपुनां ।
[7] A सतार्द्ध० ।
[8] N ०परिष्कृतं ।
[9] ०धाम० is omitted in AC.

षण्मासाभ्यासतः प्रज्ञापर्य्यन्तमधिगच्छति।
सप्तरात्राभियोगेन सर्व्वशास्त्रेषु कोविदः॥

ध्यानादुपेतखेदस्तु जपं कुर्य्यादनन्यधीः।
नाभौ शशिनि बीजान्तर्वर्णानां निर्गमागमात्॥

वक्त्राद् बहिस्ततश्चाधस्तस्मादूर्द्धमिति क्रमः।
मुक्तारत्नाक्षसूत्रेण समं सर्व्वावभासनात्॥

उपर्य्युपरि वृत्तीनां वर्णानां मध्यवाहिनाम्।
आवृत्तिर्म्मन्त्रमालायास्तुल्यकालावलम्बिनी॥

वँकारजे च लक्षांशौ बीजमादौ निवेशयेत्।
नाभिमध्ये सबीजस्य सिद्धस्यैवोपढौकनम्॥

एवं समाधिमालम्ब्य जपेल्लक्षमनावृतौ।
[1]आवृतौ पुनरध्युष्टं[2]लक्षाण्येवाक्षरव्रतः[3]॥

पाठमाचाच्छतग्रन्थधारणं फलमस्य च।
[4]यदृच्छया शतश्लोककरणं च दिने दिने॥

ब्रह्मचर्य्यामिषत्यागमद्यपानविवर्ज्जनम्।
प्रत्यहं स्नानमित्येष विधिरत्रोपदिश्यते॥

त्रिचेलपरिवर्त्तश्च विकालभोजनं च यत्।
पानीयप्रत्यवेक्षा चेत्ययं विधिरपीष्यते॥

ब्रह्मचर्य्यस्य रक्षायामरक्षायां परस्य च।
फलमालम्बते किन्तु न शीघ्रं नापि सर्व्वथा॥

---

[1] ANC बीजान्तु व०।
[2] N omits.
[3] ACBa लक्षाश्च वोक्षते।
[4] A omits.
[5] ANC •रयुष्ट।
[6] ANC यदि०।

पालने ब्रह्मचर्य्यस्य मद्याचारस्य वर्ज्जने ।
अन्वयव्यतिरेकाभ्यां समानफलता स्मृता[1] ॥
तस्मादिष्टफलाशंसी सम्पूर्णविधिमाचरेत् ।
विश्वविस्मापने शक्तिरस्मादस्योपजायते ॥
आसनाम्भोरुहवर्णा रुचयश्च सिता मताः ।
[2]अकाकरुदितं तज्ज्ञा भा[3]स्वतोऽनुदयं विदुः ॥
अन्वयव्यतिरेकं वा विद्यात् सिद्धिर्यथायथम् ।
दीपस्य दर्शनात् स्वप्ने विद्युता[4] विद्युतस्य च ॥
पिबेदकाकरुदिते वत्सरार्द्धमयाचितम् ।
आरनालैकचुलुकं स्वमन्त्रेणाभिमन्त्रितम् ॥
स्वयं ग्रहः स्वमङ्केतैरन्यैराख्यानमेव वा[5] ।
यच्च नास्ति तमेवाहुरयाचित[6]विधिं बुधाः ॥
प्रज्ञादिसाधनमिदं सुगतोपदिष्टं
आख्याय नः सुविपुलं कुशलं यदासीत् ।
तेनाशु विस्मयकरं च निरुत्तरं च
सर्व्वज्ञताऽपि पदमस्य जनस्य भूयात् ॥

॥ [वज्रसरस्वतीसाधनम्] ।

। कृतिरियं आर्य्यावलोकितेशक्रमकमलानतिधौत-
कल्मष[7]स्य मतिनयविदुष उदारकीर्त्तिप्रभव-
मनोरथरक्षितस्य भिक्षोः ॥

[1] AC मता । [2] A आकागमुदितं
[3] AC प्रज्ञा । [4] AC ०भाखगो०. N ०भावतो० ।
[5] A omits विद्युता० । [6] AC च ।
[7] AC रचित० । [8] AC बुद्धाः । [9] N ०कल्पन० ।

165.

आदौ चक्रधरस्ततः पिचुयुगात् प्रज्ञान्वितो वर्द्धनि
तस्माच्च ज्वलयुग्ममस्य तु परे मेधापरो वर्द्धनि ।
एतस्माच्चरमं धिरिद्वयमतो बुद्धिस्तथा वर्द्धनि
स्वाहान्तः कथितः स एष सुगतैर्म्मन्त्रः कवित्वादिभूः ॥

धर्म्मपादं प्रणम्यादौ प्रज्ञातत्त्वोपदेशकम् ।
सारस्वतमिदं वक्ष्ये चक्रं लोकहितोदयम् ॥
क्वचित् सुखासनस्थोऽसौ योगी शून्यं विभावयेत् ।
यथाविधि ततो बीजं बीजाद्रञं तथैव च ॥
सप्तमस्य द्वितीयस्थमष्टमस्य चतुर्थकम् ।
प्रथमस्य चतुर्थेन भूषितं तत् सबिन्दुकम् ॥
तदुद्भवां सरस्वतीं वीणावादनतत्पराम् ।
चन्द्रावदातनिर्भासां सर्व्वालङ्कारभूषिताम् ॥
निष्पाद्य तां महादेवीं चिन्तयेत् तद् हृदि स्थितम् ।
[7]आँ-इत्यक्षरनिष्पन्नचक्रमष्टारभूषितम् ॥
तन्मध्ये चन्द्रबिम्बस्थं तद्बीजं चिन्तयेत् स्थिरम् ।
तच्च तस्यावभासेन द्योतयेदात्मविग्रहम् ॥
ततस्तं रोमकूपेन निश्चार्य्याशेषसम्भवम् ।
अज्ञानतिमिरं हत्वा पुनस्तस्मिन् प्रवेशयेत् ॥

---

[1] Ba वच्च० ।
[2] A सुतै० ।
[3] A ०दक्षरं ।
[4] AN वर्द्धनः ।
[5] A omits.
[6] A त्वपितकत् (?) ।
[7] AC आच्च० ।
[8] Ba हत्वा ।

पञ्चमाधःस्थितः षष्ठः स्वरो बिन्दुद्वयाङ्कितः ।
[1]आ ई पूर्वं तथा ऊ ऐ औ अंस्तद्दुदाहृतम् ॥
हृदि शिरसि शिखायां कण्ठे नेत्रे च स्कन्धके ।
न्याससमित्थं विधानेन [2]प्रकुर्य्याद् ब्रह्मचर्य्यतः ॥
तदनु भ्रामयेच्चक्रं हृदयस्थमहर्निशम् ।
निश्चलं तु स्वहृद्बीजं भावयेत् स्थिरबुद्धिमान् ॥
लक्षजापं ततः कुर्य्यात् सप्तसङ्ख्यासमन्वितम् ।
प्रसन्ना विचरेत् तस्य हृदि देवी सरस्वती ॥
गद्यपद्यमयाशेषं [3]द्वितीय इव गीष्पतिः[4] ।
जानात्यदृष्टपूर्वं च सर्व्वमैच्यादिवाङ्मयम् ॥

इदं हि चक्रं कविराजतार्थिभि[5]-
र्निषेवितव्यं वर्षार्द्धमुद्यतैः ।
निषेव्यमाणं स्वरमस्वरूपं
समर्पयिष्यत्यचिरादतुल्यम् ॥

॥ वज्रवीणासरस्वतीसाधनम् ॥

[1] AC omit three lines from here.
[2] N तात्रा० ।
[3] N प्रद्वया ।
[4] ANC ०क्ष्वेषु ।
[5] A सोष्यति ।
[6] AC ०तान्विभिः ।

166.

वज्रसरस्वत्यै नमः ।

दृष्ट्वाऽकारं हृदि विनिहितं चिन्तयेच्चन्द्रबिम्बं
तस्मिन् पद्मं तदुपरि लसद् द्रौँ हृतिं तत् समन्तात् ।
पश्चाद् रोमावलिविलगतं भावयेद् बाह्यरश्मिं
देवी तच प्रभवति महाबुद्धिबीजाङ्कुरश्रीः ॥

शुभ्राम्बुजोपरि लसत्तनुमादधानां
नेत्रत्रयं मुकुटसंस्थितमर्द्धचन्द्रम् ।
वामेन पुस्तकधराम्बुजमन्यहस्ते
पश्चात् स्वदेहसमतामनयत् प्रयत्नात् ॥

ततस्तु ध्यानखिन्नोऽसौ जपेन्मन्त्रं समाहितः ।
गुर्व्वादेशवशाल्लब्धं शुचिसाचारतां गतः ॥
हान्तरान्तसमायुक्तं सान्तमौस्वरशोभितम् ।
दुन्दुर्बिन्दुनाऽऽक्रान्तं लिपिं दृष्ट्वा जपेद् गुरौ ॥

॥ वज्रशारदासाधनं समाप्तम् ॥

[1] A वाच्च । [2] AN शुद्धा० ।
[3] Ba ०शौचार० ।

167.

भास्वत्प्रवालमणिसन्निभदिव्यकान्तिं
वज्रत्रयां कुलिशपूर्व्वसरस्वतीं ताम् ।
प[1]द्मासिकार्चिसितचक्रनवांशरत्न-
[2]ब्रह्माब्जभाजनधरां शिरसा नमामि ॥

मनोऽनुकूले विजनप्रदेशे मृदुमञ्जूरकादावुपविश्य स्वहृदि चन्द्रमण्डलमादिस्वरसम्भवं भावयेत् । तदुपरि दोः[4]कारबीजं पद्मरागमणिप्रभं ततो रश्मीन् निश्चार्य्य तै रश्मिभिर्गुरुबुद्धबोधिसत्त्वान् सञ्चोद्य पुरोवर्त्तिनः कुर्य्यात् । ततो वज्रपुष्पादिभिर्म्मन्त्रैर्म्मनोमयीभिः पूजाभिः पूजयेत् । ततः [5]पापदेशनादिकं कुर्य्यात् । ततः ॐ [6]स्वभावशुद्धाः सर्व्वधर्म्माः स्वभावशुद्धोऽहमिति सप्तधा पठेत् । ॐ शून्यताज्ञानवज्रस्वभावात्मकोऽहमिति सर्व्वधर्म्मशून्यतां विभावयेत् । ततः पुरतो रक्तपद्मं सप्तहस्तप्रमाणं विभावयेत् । तदूर्द्ध्वं चन्द्रमण्डलं ईषद्रक्तं अका[7]रसम्भवं तदूर्द्ध्वं [8]दोःकारसम्भवं पङ्कजं पुनः पद्मस्योपरि चन्द्रमण्डलं तदूर्द्ध्वं दोःकारं पुनः । ततो रश्मिमेघं निश्चार्य्य षड्गतिसंगृहीतान् सत्त्वान् अनुत्तरायां सम्यक्सम्बोधौ प्रतिष्ठाप्य वज्रसरस्वत्याकारेण दोःकारे प्रवेशयेत् । ततः स्वयं प्रविशेत् ।

---

[1] ANC ०द्मासिक० । [2] ANC ब्रह्माब्ज० ।
[3] ANC ०लंभ० । [4] Ba होः० ।
[5] C omits पाप० ... ... ततः here, but states the omitted portion after पङ्कजं ।
[6] AN omit स्वभावशुद्धाः सर्व्वधर्म्माः ।
[7] AN अंका०, Ba तांका० । [8] Ba होः० ।

स्वयं प्रविष्टमात्मेन सर्व्वं परिणम्य त्रिमुखां षड्भुजां देवीं नानालङ्कारभूषितां पिङ्गोर्द्ध्वकेशीं प्रत्यालीढपदेन रक्तचन्द्रोपरिस्थितां विभावयेत्। तस्याः प्रथमं मुखं रक्तं दक्षिणं शुक्लं वामं कृष्णं प्रथमदक्षिणभुजे कमलं प्रज्ञापारमितापुस्तकाङ्कितं द्वितीये असिं तृतीये कर्त्रीं प्रथमवामभुजे सितचक्रमष्टारं द्वितीये नवांशरत्नं तृतीये ब्रह्मकपालम्। यथा शून्यतासमाधानन्तरं देवतानिष्पत्तये बीजाक्षरं तथा पुनर्भगवत्या हृदि विभावयेत्। ततो बीजाद् रश्मीन् निश्चार्य्य ज्ञानसत्त्वमानीय पूजयेत् प्रवेशयेच्च। ततो मन्त्रं जपेत् मन्त्री सुसमाहितमानसः। लक्षद्वयं तु जप्त्वा ततः प्रारभ्यते क्रिया। तच्चायं मन्त्रः—

ॐ पिचु पिचु प्रज्ञावर्द्धनि ज्वल ज्वल मेधावर्द्धनि धिरि धिरि बुद्धिवर्द्धनि स्वाहा। शुक्लपक्षप्रतिपदमारभ्य चन्द्रमसमालोकयन् संस्कृतं कुर्य्याद् यावद् अस्तमेति चन्द्रमाः यावत् पूर्णमासीम्। पूर्णिमायां दिवाशायी यावत् कर्म्म तावद् भावयेत्। ततोऽश्रुतपूर्व्वाण्यपि शास्त्राण्यभिमुखीभवन्ति, सहस्रग्रन्थं धारयेद् दिने दिने, सर्व्ववादिप्रमर्द्दकः, प्रियो देवमनुष्यानाम्।

॥ कृष्णयमारितन्त्रोद्धृतवज्रसरस्वतीसाधनं समाप्तम् ॥

[1] ANC ०धान०। [2] ANC दृष्ट्वा।
[3] ANC omit.

168.

नमो वज्रसरस्वत्यै ।

चतुर्ब्रह्मक्रमेण साधनं लिख्यते । पूर्ववद् अँकारं ध्यात्वा हृच्चन्द्रे पापदेशनादिशून्यताबोधिपर्य्यन्तं पँकारज-श्वेताब्जेन्दौ अँबीजात् स्फुरणादिना सम्भूतां सितवर्णां मनोरमां दक्षिणेन रक्ताम्बुजधारिणीं वामेन प्रज्ञा-पारमितापुस्तकधारिणीं वज्रसमाजमुद्रया ॐ वज्र-समाज जः जः जः ज्ञानसत्त्वप्रवेशादिपूर्वकं प्रज्ञापार-मितां वज्रपर्य्यङ्कसमासीनां भावयेत् । तस्या हृदयचन्द्रस्थं अँकारं ध्यात्वा स्फुरणसंहरणक्रमेण मन्त्रं जपेत् ॐ पिचु पिचु प्रज्ञावर्द्धनि ज्वल ज्वल मेधावर्द्धनि धिरि धिरि बुद्धिवर्द्धनि स्वाहा । प्रदीपपङ्क्तिमिव ज्वलन्तीं मुखा-न्निर्गत्य नाभिमण्डलं प्रविशन्तीं विचिन्त्य एवमन्येषां द्रष्टव्यम् । तथा चोक्तम्—

प्रथमं शून्यताबोधिं द्वितीयं बीजसंयुतम् ।
तृतीयं बिम्बनिष्पत्तिं चतुर्थं न्यासमक्षरम् ॥

॥ इति वज्रसरस्वतीसाधनं समाप्तम् ॥

---

[1] AC omit.
[2] AC ०दिकं ।
[3] Ba चिरि चिरि ।

169.

पूर्वोक्तविधानेन पीत[1]भृँकारनिष्पन्नां चतुर्भुजैकमुखीं पीतां, चिनेचां नवयौवनां वरदाक्षसूचधरदक्षिण[2]करां [3]चिद्गण्डीकमण्डलुधरवामकरां अमिताभमुद्रितां पद्मचन्द्रासनस्थां भगवतीं ध्यात्वा मुद्रां बन्धयेत् । प्रसारितहस्तद्वयाङ्गुष्ठाभ्यां कनिष्ठिका[4]नखद्वयं [5]पिधाय ततो मन्त्रं जपेत् ॐ भृँ स्वाहा ।

॥ भृकुटीसाधनम् ॥

---

[1] AC भृं०, B ङ्गं० ।
[2] ANC करधरां ।
[3] Repeated in Ba.
[4] Ba ०ष्ठिकां ।
[5] Ba omits from पिधाय to the end of the *Sādhana*.
[6] ANC भृकुटी ।

170.

[1]नमो भृकुट्यै।

पूर्व्वोक्तविधानेन स्वहृदीन्दुमध्ये बीजं षष्ठस्य चतुर्थं प्रथमाष्टमेन पूरितं [2]शून्यदेवेनाक्रान्तं अर्द्धेन्दुना शिरसि भूषितं तेनैव निष्पन्नां भृकुटीं पीतवर्णां चतुर्भुजां जटामकुटधरां शान्तां दक्षिणे वरदां अक्षसूत्रधरां वामेन चिदण्डी[3]कमण्डलुधरां पद्मचन्द्रासनस्थां भावयेत्। ततो मुद्रां बन्धयेत्। [4]पूर्व्ववद् हस्तद्वयप्रसारितेनाङ्कुष्ठेन कनिष्ठिकानखं पिधाय पृथक् पृथक् शेषा वज्रलक्षणाः, [5]इयं भृकुटीमुद्रा। पश्चात् मन्त्रं जपेत् ॐ [6]भृँ स्वाहा।

॥ भृकुटीसाधनम् ॥

END OF VOLUME ONE.

---

[1] This *Namaskāra* is found only in Ab.
[2] B शून्य०। [3] ANC ०दण्ड०।
[4] Ba omits पूर्व्वव०.....भृकुटीमुद्रा।
[5] A इति। [6] A भ, NBBa भृः।

GAEKWAD'S ORIENTAL SERIES.

Critical editions of unprinted Sanskrit Works, edited by competent scholars and published by the Central Library, Baroda.

		Rs. A
1.	**Kāvyamīmāṃsā** by Rājaśekhara. Re-issue, 1924 ..	2–4
	This book has been set as a text-book for the Acharya Examination of the Patna University.	
2.	**Naranārāyaṇānanda** by Vastupāla, edited by C. D. Dalal. M.A., 1916	1–4
3.	**Tarkasaṃgraha** by Ānandajñāna or Ānandagiri, edited by T. M. Tripathi, B.A., 1917	2–0
4.	**Pārthaparākrama** by Prahlādanandeva, edited by C. D. Dalal, M.A., 1917	0–6
5.	**Rāṣṭrauḍhavaṃśa-Mahākāvya** by Rudrakavi, edited by E. Krishnamacharya. Introduction by C. D. Dalal, M.A., 1917	1–12
6.	**Liṅgānuśāsana** by Vamana, edited by C. D. Dalal, M.A., 1918	0–8
7.	**Vasantavilāsa** by Bālachandrasūri, edited by C. D. Dalal, M.A., 1917	1–8
8.	**Rupakāṣṭaka** by Vatsarāja, edited by C. D. Dalal, M.A., 1918	2–4
9.	**Mohaparājaya** by Yasaḥpāla, edited by Muni Chatur-Vijayaji. Introduction and appendices by C. D. Dalal, 1918	2–0
10.	**Hammīramadamardana** by Jayasiṃhasūri, edited by C. D. Dalal, M.A., 1920	2–0
11.	**Udayasundarīkathā** by Soḍḍhala, edited by C. D. Dalal, M.A., and E. Krishnamacharya. 1920 ..	2–4
12.	**Mahāvidyāviḍambana** by Bhaṭṭa Vādīndra, edited by M. R. Telang, 1920	2–8
13.	**Prāchīnagurjarakāvyasaṃgraha**: collection of old Gujarati poems—12th to 15th centuries, edited by C. D. Dalal, M.A., 1920	2–4
14.	**Kumārapālaprartibodha** by Somaprabhācārya, edited by Muni Jinavijayaji, 1920	7–8
15.	**Gaṇakārikā** by Bhāsarvajña, edited by C. D. Dalal, M.A., 1920	1–4
16.	**Saṅgītamakaranda** by Nārada, edited by M. R. Telang, 1920	2–0

Rs. A.

17. **Kavīndrācārya's List :** List of works in the collection of Kavīndrācārya, a 17th century Pandit, edited by R. A. Shastry, with a foreword by Dr. Ganganatha Jha, 1921 0–12

18. **Vārāhagṛhyasūtra,** edited by Dr. R. Shama Shastry, 1921 0–10

19. **Lekhapaddhati :** Specimen Sanskrit letters, etc., 8th to 15th centuries, edited by C. D. Dalal, M.A. and G. K. Shrigondekar, M.A. .. .. *(Shortly)*

20. **Pañchamīkahā or Bhavisayattakahā,** by Dhanapala, edited by C. D. Dalal, M.A. and Dr. P. D. Gune, M.A., Ph.D., 1923 6–0

21. **A Descriptive Catalogue of the palm-leaf MSS and Important Paper MSS in the Bhandars at Jaisalmere,** compiled by C. D. Dalal, M.A., and edited by L. B. Gandhi, 1924 3–4

22, 23. **Parasurāmakalpasūtra :** with commentary by Rāmesvara and Paddhati by Umananda, edited by A. Mahadeva Shastry, B.A., Director, Adyar Library, 2 vols, 1923 11–0

24. **Tantrarahasya,** edited by Dr. R. Shama Shastry B.A., Ph.D., Curator, Government Oriental Library, Mysore, 1923 1–8

25. **Samarāṅgaṇa,** a work on architecture by King Bhojadeva, edited by Mahamahopadhaya T. Ganapati Shastri, Ph.D., M.R.A.S. 2 vols—vol. 1, 1924 5–0

26. **Sādhanamālā,** edited by Benoytosh Bhattacharyya, M.A., General Editor, Gaekwad's Oriental Series, 2 vols—vol. I, 1925 5–0

BOOKS IN THE PRESS.

1. **Tattvasaṃgraha :** a Buddhist philosophical work of the 8th century by Śāntarakṣita, with Pañjikā by Kamalaśīla : edited by E. Krishnamacharya. 2 vols.

2. **Nyāya-Praveśa :** earliest work on Buddhist logic, by Diṅnāga, with commentaries of Haribhadra Sūri and Pārśvadeva : edited by A. B. Dhruva, M.A., LL.B., Pro-Vice-Chancellor of the Hindu University, Benares.

3. **Sādhanamālā (Vol. II) :** a Buddhist Tantric text of rituals, dated 1165 A.D. consisting of more than 300 small works composed by distinguished writers : edited by Benoytosh Bhattacharyya, M.A. (Illustrated.)

4. **Nāṭyaśāstra** of Bharata, with commentary by Abhinava-Gupta of Kashmir : edited by M. Ramkrishna Kavi, M.A. Illustrated 4 vols.

5. **Catalogue of Sanskrit Manuscripts** in the Central Library, Baroda. Vol. I (Vedic). Compiled by G. K. Shrigondekar, M.A. and K. S. Ramaswamy Sastri, assisted by other members of the Editorial Staff.

6. **Advayavajrasaṃgraha :** consisting of twenty smaller works on Buddhist philosophy by Advayavajra, a Buddhist savant belonging to the 11th century A.D.: edited by Mahamahopadhyaya Pandit Haraprasad Shastri, M.A., C.I.E., F.A.S.B.

7. **Kalpadrumakoṣa of Keśava :** a standard work on Sanskrit Lexicography: edited by Pandit Ramavatara Sarma Sahityacharyya, M.A., of Patna.

8. **Mānava-Gṛhyasutrabhāṣya of Aṣṭāvakra :** edited by Pandit Rāma-Kṛṣna Harshaji of Ahmedabad, with introduction by Prof. B. C. Lele, M.A., of Baroda.

9. **Nalavilāsa :** a drama by Rāmachandra Sūri, pupil of Hemachandra Sūri: edited by Messrs G. K. Shrigondekar, M.A., and L. B. Gandhi of the Central Library Department.

10. **Apabhraṃśa-Kāvyatrayī :** consisting of three works, the *Carcarī*, *Upadeśarasāyana* and *Kālasvarūpa-Kulaka* by Jinadatta Suri (12th century) with commentaries: edited by Pandit L. B. Gandhi of the Central Library Department.

11. **Mānasollāsa** *alias* **Abhilasitārtha-Cintāmaṇi :** divided into one hundred chapters treating of one hundred different topics by Chalukya Someśvaradeva (12th century): edited by Mr. G. K. Shrigondekar, M.A., of the Central Library Department.

12. **A Descriptive Catalogue of MSS in the Jain Bhandars at Pattan** (in two volumes): edited from the notes of the late Mr. C. D. Dalal: by Pandit L. B. Gandhi of the Central Library Department.

13. **Samarāṅgaṇa** of King Bhoja (Vol. II): edited by Mm. Gaṇapati Śāstri of Trivandrum.

Ready January, 1925.

Supplement (or Khatimae) to the Mirat-i-Ahmadi translated from the Persian of Ali Mahamad Khan, the last Moghul Dewan of Gujarat, by Syed Nawabali, M.A., Professor of Persian, Baroda College, Fellow of Bombay University, author of Tarikh-i-Sofar, Tazkirat-ul Mustafa, etc., and Charles Norman Seddon, I.C.S. (retired), late Revenue Minister, Baroda State, with notes, appendices and three illustrations. 270 pages demy 8vo. cloth. Price about Rs. 8.

This work gives an interesting description of the city of Ahmedabad and the Province of Gujarat in the middle of the 18th century.